मैथिलश्रोत्रिय पं० हेमपति झा विरचितः

# शब्दप्रदीपः

वैदेशिक-शब्दव्यवहार्य-वस्त्वभिधानात्मकः
श्लोकमयः कोषः, भाषा शब्दसूचीसहितः
(ग्रन्थकार-पुत्र-वैयाकरण-तुलानन्दकृत-'प्रकाश'
व्याख्यया हिन्दीशब्दार्थेन च समलङ्कृतः)

सम्पादकः

डॉ. शशिनाथ झा

बिहार राज्य संस्कृत अकादमी, पटना

मैथिलश्रोत्रिय पं० हेमपति झा. विरचित:

# शब्दप्रदीप:

वैदेशिक-शब्दव्यवहार्य-वस्त्वभिधानात्मक:
श्लोकमय: कोष:, भाषा शब्दसूचीसहित:
[ग्रन्थकार-पुत्र-वैयाकरण-तुलानन्दकृत-'प्रकाश'
व्याख्यया हिन्दीशब्दार्थेन च समलङ्कृत:]

सम्पादक:
डॉ० शशिनाथ झा

प्रकाशक:
बिहार राज्य संस्कृत अकादमी, पटना

## ॥ श्रुत भक्ति ॥

विक्रम संवत २०७१ ज्येष्ठ शुक्ला १३ दिनांक ३१-०५-२०१५, रविवार के दिन अहमदाबाद (राजनगर) में दिल्ली के उद्योगपति मंडार निवासी संघवी भंवरलालजी रुगनाथमलजी दोशी, की ऐतिहासिक दीक्षा का आयोजन अहमदाबाद एज्युकेशनल ग्राउंड में निर्मित विशाल संयम जहाज में हुआ। इस प्रसंग पर ४१ आचार्य भगवंत, १५०० से अधिक साधु-साध्वीजी भगवंत तथा १ लाख से अधिक श्रावक-श्राविकाओं की उपस्थिति थी। नूतन दीक्षित मुनि **श्री भव्यरत्न विजयजी म.सा.** प.पू. त्रिशताधिक दीक्षा दानेश्वरी आचार्य भगवंत **श्रीमद् विजय गुणरत्नसूरीश्वरजी म.सा.** के १०८ वे शिष्य घोषित किये गये।

**प.पू.आ. श्री गुणरत्नसूरीश्वरजी म.सा.** की प्रेरणा से दीक्षा के ज्ञान खाते की उपज में से इस ग्रंथ का मुद्रण का लाभ संघवी रुगनाथमलजी समरथमलजी दोशी रिलिजियस ट्रस्ट की ओर से लिया गया। खूब खूब हार्दिक अनुमोदना...

- यह ग्रंथ ज्ञानखाते की रकम में से छपा हुआ है। अतः कोई भी गृहस्थ इसकी मालिकी न करें।
- साधु-साध्वीजी भगवंत तथा ज्ञानभंडार को सप्रेम भेट दिया जाता है।

# प्रकाशकीय उद्‌गार

संस्कृत वाङ्‌मय में मैथिलश्रोत्रिय पं० हेमपति झा विरचित **शब्दप्रदीपः** शब्दों की प्रकृति, उसकी रचना और वैदेशिक भाषाओं से उसकी अभिव्यक्ति का मौलिक संस्कृत शब्दावली के बारे में सम्यक जानकारी उपलब्ध करानेवाली सर्वप्रथम कृति है। बिहार राज्य संस्कृत अकादमी, शिक्षा विभाग, बिहार सरकार की ओर से **शब्दप्रदीपः** जैसे शब्द व्यवहार पर आधारित ग्रंथ का प्रकाशित करते हुए गौरव का अनुभव हो रहा है। विदेशी भाषाओं में प्रचलित जन सरोकार से संबंधित शब्दों का संस्कृत शब्दावली होने से यह ग्रंथ हिन्दी शब्द कोश को भी समृद्ध करने में उपयोगी होगा। १५ वर्गो में संकलित शब्दों में स्वर्ग, नर, यन्त्र-यान, शास्त्रस्त्र, पाचित, लैखिक, गृहोपकरण, फल पुष्पादि, देश, गृह आदि वर्गो में उद्‌धृत शब्दों के प्रयोग सामान्य जिज्ञासुओं के लिए भी न सिर्फ पठनीय है बल्कि शब्द ज्ञान वर्द्धन करने योग्य भी है। इस ग्रंथ में विदेशी शब्दों के व्यवहार सहित श्लोकमय कोश तथा भाषा शब्द सूची का विलक्षण समावेश है। ग्रंथ का सुसंपादन करके बिहार के यशस्वी संस्कृत गौरव, भाषा सम्मान से विभूषित यशस्वी विद्वान डा० शशिनाथ झा ने न सिर्फ संस्कृत अकादमी बल्कि संपूर्ण संस्कृत जगत को उपकृत किया है।

संस्कृत शब्दावली के संदर्भ में **शब्दप्रदीपः** लोकप्रियता के नये आयाम गढ़ेगी और संस्कृत अकादमी के लिए यह एक अद्वितीय एवं विशि ट उपलब्धि होगी।

21.6.13

**जितेन्द्र प्रसाद**

अध्यक्ष-सह-निदेशक

बिहार संस्कृत अकादमी, पटना

# भूमिका

भाषाया वैभवः, शब्दसमृद्धिं साहित्यं च दृष्ट्वावगन्तुं शक्यते । तद्दृष्ट्या संस्कृतभाषा परमसमृद्धास्ति । अतिप्राचीनकालादियं लोकभाषा, संस्कृतिभाषा, साहित्यभाषा, राजभाषा, कूटभाषा, राष्ट्रैकसूत्रभाषा इत्यादिरूपेण व्यवह्रियमाणा सर्वविधाभिव्यक्तिसम्पन्ना वर्तते । आवश्यकतानुसारमस्यां काले-काले स्वस्मादेव नूतनाः शब्दाः प्रादुर्भवन्ति, यथा एकस्मात् कदली-वंश-धान्यादिपादपादसंख्याः प्ररोहा जायन्ते ।

प्राचीनकाले यवन-हूणादिशासनावधौ वैदेशिकनवागतशब्दानां कृते संस्कृतस्यैवाभिनवाः शब्दाः प्रादुर्भूता जाता आसन् । आंग्लशासनमये वैज्ञानिकयुगारम्भेऽसंख्या नूतनविषयास्तत्स र्भाश्च विकसिता ये पूर्वं नासन्, सुतरां तत्कृते संस्कृते शब्दा नोपलब्धाः । ततश्च स्वेच्छया पण्डितैस्तदर्थकशब्दाः निर्मिताः, कैश्चित्तु अनुकरणशैल्या आंग्लशब्दानेव संस्कृते गृहीतवन्तः, येन संस्कृतभाषायां वैकृत्यं प्रतीतम् ।

अतएव स्वभाषाया मौलिकतारक्षणाय बद्धपरिकरो वैयाकरणप्रवरो हेमपति झा शर्मा विंशशताब्दारम्भे (1918 ई॰) शब्दप्रदीपाभिधं कोषग्रन्थं रचयामास, यत्र व्यवहार्यवैदेशिकशब्दानां तत्तदाकारसंस्कृत- शब्दप्रस्तुतीकरणस्य सफलः प्रयासोऽस्ति । बाह्यभाषाप्रभावस्तावदेव स्वीकरणीयो येन भाषा विकृता न भवेत् । अनियन्तृत-बाह्यभाषा प्रवाहे स्वकीयरूपस्य हानिरेवेति एतद्ग्रन्थव्याख्यात्रा विषयेऽस्मिन् श्लोकसं-155 इत्यस्य व्याख्यायां विस्तरेण प्रतिपादितम् ।

ग्रन्थोऽयम् अमरकोषशैल्या 500 श्लोकेषु निबद्धः चतुर्दशवर्गेषु विभक्तः प्रचुरसंख्यासु व्यावहारिकशब्दान् सार्धं प्रस्तौति ये शब्दा अर्थतः स्वरूपतश्च सुसंगताः प्रतीयन्ते । कानिचिदुदाहरणानि द्रष्टव्यानि-

ट्रेन-त्वरेनः, स्टेसन-इष्टासनम्, गुमटी-गुप्ताटी, पार्लियामेन्ट- पाल्यामन्त्रः, ऑफिस-आप्यासः, बैंक-व्यङ्कः, सेल-शल्यः, सिगरेट- शीघ्रेतः, कार्पोरेशन-कार्यपौरेशनम्, फैक्टरी-पण्यकरी, कालेज- कलाशाला, कम्पनी-कमापनी,

फिलिस्तान-पणिस्थानम्, यूनान- यावन:, वोर्नियो-वारुण:, कैलडिया-कालकेया, काबुल-कम्बोज:, ईरान-ईराण:, अफगानिस्तान-अपगणस्थानम्, ततार-तारतर:, यूरोप- यवरूप:, फ्रांस-परांश:, अफ्रीका-अपरौक: ।

एतेषां शब्दानां व्युत्पत्ति: ग्रन्थकृत्पुत्रेण वैयाकरणतुलानन्दझा शर्मणा स्वरचितायां व्याख्यायां प्रस्तुतास्ति ।

स्वतन्त्रभारते भाषाविभागेन शब्दकोशनिर्माणसमितिद्वारा एवम्विधं कार्यं प्रचुरतया कृतं, क्रियते च । यदि नाम कोषोऽयं तत्समिते: पुरस्तात् प्राप्त: स्यात् तर्हि मन्ये, बहव एतच्छब्दा एव गृहीता: स्यु: ।

एतद्ग्रन्थस्य प्रकाशनं बहुपूर्वं ग्रन्थकृत्पुत्रेण सुप्रथितकविना वैयाकरणेन पं० श्यामानन्द झा शर्मणा सम्पाद्य कृतम्, किन्तु मुद्रणदोषवशात्तत्र संशोधनमावश्यकमासीत् । ग्रन्थकारोऽयं मिथिलायां मधुबनीमण्डले लालगंजग्रामवास्तव्य आसीत् ।

अत्र ग्रन्थकृतैव भाषाशब्दानां वर्णानुक्रमेण कोष: प्रस्तुतोऽस्ति, येषां पर्यायवाचिसंस्कृतशब्दा अत्र प्रस्तुता: सन्ति । एतेन ग्रन्थस्यास्योपयोगिता वर्धततराम् ।

एतद्ग्रन्थविषये ग्रन्थकारविषये च शोभनं विवरणं हिन्दीभाषायां ग्रन्थकृत्पौत्र: डॉ० रमानन्द झा 'रमण:' प्रस्तुतवान् । तदर्थं स महानुभावो धन्यवादभाजनमस्ति ।

पटनास्था बिहारसंस्कृताकादमी ग्रन्थरत्नमेनं प्रकाश्य धन्यवाभाजनमस्ति । ग्रन्थरत्नस्यास्य परिशुद्धं रूपं दृष्ट्वा संस्कृत- प्रेममवतां चेत: प्रसीदेत्तमामिति ।

**डॉ० शशिनाथ झा**
प्राचार्य: व्याकरणविभागे,
का०सि०द०संस्कृत विश्वविद्यालय:, दरभङ्गा
01/04/2013

# वर्ग सूची


| क्र. सं. | वर्गः | श्लोक सं. | पृ. सं. |
|---|---|---|---|
| 1. | स्वर्ग वर्गः- | 1-15 | -9 |
| 2. | नरवर्गः- | 16-157 | -11 |
| 3. | यन्त्र-यानवर्गः- | 158 | -43 |
| 4. | शस्त्रास्त्रवर्गः - | 199 | -52 |
| 5. | पाचितवर्गः - | 211 | -55 |
| 6. | लैखिकवर्गः- | 238 | -62 |
| 7. | गृहोपकरणवर्गः- | 246 | -64 |
| 8. | परिधेयादिवर्गः- | 278 | -72 |
| 9. | शाकान्नवर्गः- | 304 | -78 |
| 10. | फलपुष्पादिवर्गः- | 325 | -83 |
| 11. | देशवर्गः- | 350 | -90 |
| 12. | गृहवर्गः- | 397 | -97 |
| 13. | अर्थवर्गः- (मानवर्गः) | 436 | -106 |
| 14. | प्रकीर्णवर्गः- | 457 | -110 |
| 15. | उपसंहारः | 519 | -127 |
| | अकारादिक्रमेण शब्दसूची | | -129 |

॥ श्रीः ॥

# शब्दप्रदीपः

## प्रकाश-व्याख्योपबृंहितः

### स्वर्गवर्गः

नत्वा रामविनायकांघ्रियुगलं कोशौघमालोकयन्,
आयुर्वेद-महोदधौ कृतमहायासप्लवो भूसुरः ।
राधे विष्णुपदाब्धिनागधरणीमाने वलक्षे शके,
कुर्वे हेमपतिः कृती कृतिमिमां शब्द-प्रदीपाऽभिधाम् ॥ 1 ॥

नवाभिधानव्यवहार्य्य-वस्तु,
प्रस्तूयतां साधुपदेन केन ।
चिन्तामिमां देवगवीकवीनां,
निहातुकामः कलये प्रयासम् ॥ २ ॥

पुराण काव्य स्मृति तन्त्र पाक-
शास्त्राणि सापेक्षमना निरीक्ष्य ।
आप्तानुसन्धानपरान्निबन्धान्,
विमृश्य चायं क्रियते प्रयत्नः ॥ ३ ॥

### प्रकाशव्याख्या

पितुश्चरणमानम्य तद्वाणीखेलनात्मनः ।
व्याख्या शब्दप्रदीपस्य तुलानन्देन तन्यते ॥ १ ॥

समाप्तिप्रचारयोः प्रतिबन्धकप्रत्यूहव्यूहमपाचिकीर्षुः शिष्य- शिक्षां

चाभिलक्षयन् रामविनायकनत्यात्मकं मंगलमादौ निबध्नाति-नत्वेति । रामश्च विनायकश्च तथोक्तौ राघवगणेशौ तयोः अंघ्रियुगलम् चरणद्वन्द्वम्, तच्च द्वन्द्वान्ते श्रूयमाणतया प्रत्येकमन्वेति, कोशौघम् तत्समुदायम् तावतां स्वोक्तेषु कोशसमुदायपर्य्यालोचनसाध्यप्रामाणिकत्वं सूचितम्, तत्सम्पदे हेत्वन्तरमाह आयुर्वेदमहोदधाविति । महोदधित्वमारोप्य आयुर्वेदस्य स्वल्पैः प्रयत्नैर्नालोड़नं सम्भवतीत्याविःकुर्वाणो ब्रूते-महायासेति-तेन कात्स्न्र्येन तदालोचनं समपद्यतेति ध्वनितम् । भूसुरः ब्राह्मण एतेन स्वस्मिन् कुलीनत्वं व्यञ्जितम् । रचनाकालमाह-राघे इत्यादि । कुलीनत्वेऽपि प्रतिभाविरहे नैतदारब्धुमुचितमित्याह कृतीति निखिलतन्त्रस्वतन्त्र इत्यर्थः । न चैवमात्मश्लाघा प्रकाशेतेत्युदीर्य्यम्, तदुपादानस्य प्रेक्षवत्सापेक्षतालक्षणत्वेनावश्यकतया विपरीताशंकनस्य योग्यताप्रत्यर्थित्वात् । सत्स्वेव तत्तत्कोशे किमिति सिद्धसाधनाडम्बर इत्याशंकाव्युदासायाह-नवाभिधानेति कोशैः प्राचीनैः प्रागूहितवाचकानामुपलब्धिसम्भवेऽपि नूत्नानां तेषां न तत्सम्भवः, तथात्वेऽपि वा एकत्र संकलनाव्यतिरेकेण कवीनां चित्तदौःस्थ्यं नापाकर्त्तुं शक्यते तदियं वस्तुस्थितिः । देवगवीकवीनां गीर्वाणवाणीविदाम्, निर्हातुकामः निराकर्त्तुमनाः, कलये कुर्वे कीर्त्यात्मनस्तत्फलस्यात्मसमवायितया प्रकथने तद्विधानेन नात्मनेपदानौचित्यम् । ननु निर्देक्ष्यमाणानामभिधानानां न कात्स्न्र्येन कोशेषूपलम्भो न वाऽऽयुर्वेदव्यवहार्य्यता, तत्कथं साकल्येन प्रामाणिकत्वं सम्भाव्येतेत्याह पुराणेत्यादि । ननूपेक्षया तन्निरीक्षणे न निरीक्षणचारितार्थ्यमिति ब्रूते सापेक्षेति । ननु तथाप्यत्यन्ताधुनिकानां वैदिशिक-व्यवहार्य्यवस्तुवाचकानां व्यतिरेकः संस्कृतभाषायां नापलपितुं शक्यते, स्वोपज्ञत्वे तु न प्रामाणिकत्वं, तमेतमाक्षेपं क्षिणोति आप्तानुसन्धानेति विमृश्य क्वचित् तदनुसहितं कुत्रचन तदनुसन्धानप्रकारेण स्वानुसंहितं विविच्य, एतेन स्वानुसन्धाने सर्वथा नावीन्येऽपि नापेक्षाप्रक्षयः सम्भवतीतिभावः ।

क्वचित्प्रसिद्धिं विमृशन् पदानां
व्यत्यास्य सामान्यविशेषभावम् ।
कुत्राप्यरूढिं कलयन्नमीषां,
वितर्क्य योगं निदधेऽभिधानम् ॥ ४ ॥

क्वचित्तदभिधानेन साहचर्य्येण कुत्रचित् ।
रूपभेदेन वा क्वाऽपि लिंगमर्थश्च वक्ष्यते ।। ५ ।।

| | | |
|---|---|---|
| **स्वर्ग** | - | देवलोके भवेत्स्वर्गो नाको द्यौः स्वस्त्रिविष्टपम् । |
| **परमेश्वर** | - | परब्रह्म भवेदल्लः परात्मा परमेश्वरः ।। ६ ।। |
| **देवता** | - | दैवतं सुरगीर्वाणौ देवो वृन्दारकोऽमरः । |
| **ब्रह्मा** | - | ब्रह्मणि स्युर्विधिर्वेधा विधाता चतुराननः ।। ७ ।। |

अधिजिगमिषूणां सौविध्याय निर्माणशैलीं प्रकाशयति **क्वचित्प्रसिद्ध**-मित्यादि । पदानां केषाञ्चित् वस्तुविशेषे तत्सामान्ये वा प्रसिद्धिं व्यवहारं विमृशन् अनुसन्दधानः सामान्यविशेषभावम् क्वाऽपि सामान्यभावं सामान्यार्थपरतां कुत्रापि विशेषभावम् विशेषार्थपरतां व्यत्यास्य विपर्य्यास्य सामान्यपराणां विशेषार्थे विशेषपराणां च सामान्यार्थे व्यवहारबलेन व्यवस्थाप्येतितात्पर्य्ये पर्य्यवस्यति । **कुत्रापि** अमीषां पदानाम् **अरूढिम्** रूढिविरहं कलयन् जानन् योगं यौगिकत्वं तत्रेत्यादिः वितर्क्य अभ्यूह्य अभिधानम् वाचकपदम् निदधे संगृह्य रक्षामि, वर्तमानसामीप्ये लट्- प्रयोगः । **क्वचित्तदभिधानेनेत्यादि** । यथा देवलोके भवेत्स्वर्ग इत्यादौ देवलोक इत्याद्यभिधेयाऽभिधानम् । **साहचर्य्येणेति** यथा तुन्नवायः कुविन्दः स्यादित्यादौ रूपभेदेनेति । इदं लिंगमात्रविषयिताप्रयोजक- पदोच्चारणतात्पर्य्येणोक्तम् । **देवलोक** इति, स्वर्ग, नाक, दिव, स्वर, त्रिविष्टप, इत्येतानि पंच स्वर्गनामानि । **परब्रह्मेति** परब्रह्मन्, अल्ल, परात्मन्, परमेश्वर, इत्येतानि चत्वारि सर्वजगदुपादानकारणस्य परब्रह्मणो नामानि ।

| | | |
|---|---|---|
| **नारायण-** | | नारायणे निगद्यन्ते विष्णु-श्रीपति-शौरयः । |
| | | दामोदरो हृषीकेशः केशवो माधवोऽच्युतः ।। ८ ।। |
| | | पुण्डरीकाक्ष-गोविन्दौ स्वभूर्विश्वम्भरो हरिः । |
| | | रामः कृष्णो जगन्नाथो वासुदेवो जनार्दनः ।। ९ ।। |
| **शंकर** | - | शिवे स्युर्धूर्जटिः शम्भुर्भोलानाथो महेश्वरः । |
| | | महादेवेश्वरौ रुद्रः शंकरो गिरिशो हरः ।। १० ।। |

जगदीश्वरी - जगन्माता भवेदक्का तत्रैवाल्ला महेश्वरी ।

ब्राह्मी - ब्राह्मी सरस्वती तुल्ये भारती च निगद्यते ॥ ११ ॥

लक्ष्मी - लक्ष्मीः श्रीः कमला पद्मा विष्णुजाया समार्थकाः ।

उमा - गौर्य्युमा तु भवानी स्याद् अपर्णा पार्वती तथा ॥ १२ ॥

इन्द्र - इन्द्रः पुरन्दरः शक्रः स्वर्गेशो वासवो वृषा ।

गणेश - द्वैमातुरस्तु हेरम्बो विनायक-गजाननौ ॥ १३ ॥

अल्लशब्दस्य शब्दकल्पद्रुमे निर्दिश्यमानतया साधुत्वं बोध्यम् । **दैवतमिति** । दैवत, सुर, गीर्वाण, देव, वृन्दारक, अमर इत्येतानि षट् देवसामान्य-नामानि । **ब्रह्मणीत्यादि**, विधि, वेधस्, विधातृ, चतुरानन इत्येतानि चत्वारि कार्य्यब्रह्मणो नामानि ।

**नारायण इति** विष्णु, श्रीपति, शौरि, दामोदर, हृषीकेश, केशव, माधव, अच्युत, पुण्डरीकाक्ष, गोविन्द्र, स्वभू, विश्वम्भर, हरि, राम, कृष्ण, जगन्नाथ, वासुदेव, जनार्दन इत्येतानि अष्टादश विष्णोर्नामानि । शिव इति शिव, घूर्जटि, शम्भु, भोलानाथ, महेश्वर, महादेव, ईश्वर, रुद्र, शंकर, गिरिशि, हर इत्येतानि शिवस्य नामानि । ब्रह्मणो वचनं श्रुत्वा भोलानाथः कृपानिधिरिति स्मरणात् भोलानाथशब्दस्तदर्थे साधुरिति बोध्यम् । **जगन्मातेति** अक्का, अल्ला, महेश्वरी, जगन्मातृ इत्येतानि चत्वारि परमेश्वरीनामानि । **ब्राह्मीति** ब्राह्मी, सरस्वती भारती इत्येतानि त्रीणि सरस्वतीनामानि । **लक्ष्मीरिति लक्ष्मी**, श्री, कमला, पद्मा, विष्णुजाया इत्येतानि पञ्च लक्ष्म्या नामानि । **गौर्य्युमेति** गौरी, उमा, भवानी, अपर्णा, पार्वती, इत्येतानि पञ्च गौरीनामानि । **इन्द्र इति** इन्द्र, पुरन्दर, शक्र, स्वर्गेश, वासव, वृषन् इत्येतानि षट् इन्द्रस्य नामानि । **द्वैमातुर इति द्वैमातुर**, हेरम्ब, विनायक, गजनन इत्येतानि चत्वारि गणेशस्य नामानि ।

अग्नि - वह्निरग्निः कृशानुः स्युर्दहनाऽनलपावकाः ।

वायु - गन्धवाहाशुगौ वायुर्वाताऽनिलसमीरणाः ॥ १४ ॥

कुवेर - कुबेरः किन्नरेशः स्याद् राजराजो धनाऽधिपः ।

कामदेव - कन्दर्पो मदनो मारः कामः पञ्चशरः स्मरः ॥ १५ ॥

आत्मभूर्दर्पकोऽनङ्गः पुष्पधन्वा समार्थकाः ।

इति स्वर्गवर्गः

**अथ नरवर्गः**

नर - देवोऽदेवो मनुष्यश्च त्रयोऽमी तु नराः स्मृताः ॥ १६ ॥

अदेव - अदेवो दानवो दैत्यो दस्युः पणिरुदीर्य्यते ।

मनुष्य - मनुष्यो मानवस्तुल्यौ तत्रैव मनुजो भवेत् ॥ १७ ॥

हिंन्दु (आर्य्य) सर्वतः प्रथमं सृष्टा भारतीयाऽऽर्य्यहिन्दवः ।

नैतेभ्यः पूर्वतः कश्चिद् नरं धाताऽसृजद्भुवि ॥ १८ ॥

प्रमाणं श्रुतयस्तेषां दृढा वर्णाश्रमे मतिः ।

स्वरूपस्थापको धर्म आत्मसाधनिकाः क्रियाः ॥ १९ ॥

मनुष्यजातौ निर्दिष्टा एते वेदार्थवेदिभिः ।

**वह्निरिति** वह्नि, अग्नि, कृशानु, दहन, अनल, पावक इत्येतानि षट् वह्नेर्नामानि । **गन्धवाहाशुगाविति** गंधवाह, आशुग, वायु, वात, अनिल, समीरण इत्येतानि षट् वायुनामानि । **कुबेर इति** कुबेर, किन्नरेश, राजराज, धनाऽधिप इत्येतानि चत्वारि कुबेरनामानि । **कन्दर्प इति** कंदर्प, मदन, मार, काम, पञ्चशर, स्मर, आत्मभू, दर्पक, अनङ्ग, पुष्पधन्वन्, इत्येतानि दश कामदेवनामानि । **देव इति** नरत्वमत्र ब्रह्मज्ञानयोग्यतावच्छेदकपुंस्त्वरूपमेव, नातो मर्त्त्यमात्रवर्तिता शंक्या नचैवंविधतत्त्वे मानविरह इतिवाच्यम् बहुष्वार्ष-प्रबन्धेषु तथोपनिबद्धत्वात् । देव, अदेव, मनुष्य इत्येतानि त्रीणि नरत्वविभाजकधर्मावच्छिन्नस्य नामानि । नचात्र पुरुषपदानुपादानेन न्यूनता प्रसजतीति वाच्यम् एवंविधन्यूनताया ग्रन्थप्रणेत्रा सोढत्वात् । एवञ्च नरपुरुषौ पर्य्यायाविति सुधीभिरवधेयम् । अदेवत्वं नात्र देवप्रतियोगिकभेदवैशिष्ट्यम् तस्य तथात्वे पशावपि तत्त्वापत्तेः, किन्तु देवत्वप्रतिकूलजातिविशेषवत्त्वम् इतिध्येयम् । **मनुष्यइति** मनुष्य, मानव, मनुज, इत्येतानि त्रीणी मनुष्यनामानि । **अदेवइति** अदेव, दानव, दैत्य, दस्यु, पणि इत्येते पञ्च देवभेदाः ।

**सर्वत इति** भारतीय, आर्य्य, हिन्दु, इत्येतानि त्रीणि आर्य्यनामानि । नच भारतीयत्वमार्य्यभिन्ने यवनादावपि व्यासक्तमितिचेन्न भारतीयत्वस्य भारतावच्छिन्नमूलनिवासित्वपरतया व्याख्येयत्वात् । नच म्लेच्छत्वेनाभिहिते यवनादावेष तत्र मूलनिवासिता आर्य्ये तु अनार्य्यं विजित्यैव भारतवासितेति जनविश्रम्भो विशीर्य्येतेतिवाच्यम् आर्षेतिहासविरोधितया तथाविधजन विश्रम्भरूपभौटंयविशरणस्येष्टत्वात् । न चैवमपि भारतत्वस्यानेकद्वीप-व्यापित्वेन कुमारिकाख्यार्य्यावर्त्तेतरद्वीपनिवास्तव्येऽपि भारतीयत्वस्यावश्याभ्युपगन्तव्यतया तत्र चार्य्यत्वस्याप्रामाणिकत्वेन कथमार्य्यभारतीयपदयोः पर्य्यायत्वं पर्य्यवस्येदिति वाच्यम्, भारतीयपदघटक-भारतपदस्य स्वैकदेशविशेषे औपचारिकत्वस्य स्वीकारेणादोषात् । नच हिन्दुपदस्य सिन्धु-विकाररूपत्वेनासाधुतया वेदेषु स्मृतिषु परत्र वा आर्षसाहित्येषु प्रयोगाभावेनार्य्यपर्य्यायतया तदुपादानमसङ्गतमिति वाच्यम्, हीनं दूषयतीति विगृह्य औणादिकत्वेन साधुत्वस्य सिद्ध्या शब्दानामानन्त्येन कृत्स्नतया सर्वेषां शब्दानामार्षतन्त्रेषु निबद्धुमशक्यतया आर्षव्यवहृता एव साधव इतिनियमे बहुव्याकोपापत्त्या मेरुतन्त्रे तदुपलम्भेन च तदुपादानस्य सामञ्जस्यात् । ब्रह्मणः सृष्टौ प्रथममार्य्या एव सृष्टा इत्याशयेन **सर्वत** इति, तदेव स्पष्टयति **नैतेभ्य** इत्यादि । शुद्धार्य्यलक्षणमाह **प्रमाणं श्रुतय** इत्यादि । नन्वेवं बौद्धार्हतशिष्येषु आर्य्यत्वानापत्त्या हिन्दुत्वानापत्तिरितिचेन्न तत्रार्य्यत्वस्येष्टत्वेऽपि विशुद्धस्य सद्भावानङ्गीकारात्, तदेव ब्रूते **वेदार्थवेदिभिरिति** ।

द्विज - द्विजा द्विजातयः प्रोक्ता वर्णा विप्रादयस्त्रयः ॥ २० ॥

ब्राह्मण - शर्मान्तनामधेयास्ते विप्रब्राह्मणभूसुराः ।

क्षत्रिय - वर्मान्तनामधेयौ तु राजन्यक्षत्रियौ स्मृतौ ॥ २१ ॥

वैश्य - गुप्तान्तनामधेयौ स्तो विड्वैश्यौ सुधियां मतौ ।

शूद्र - दासान्त्यनामधेयोऽन्त्यवर्णः शूद्र उदीर्यते ॥ २२ ॥

शूद्रस्य भेदः सच्छूद्रोऽसच्छूद्रश्च निगद्यते ।
असच्छूद्रस्य भेदास्तु चाण्डालादय ईरिताः ॥ २३ ॥
असच्छूद्रस्य पानीयं सद्वर्णेन न गृह्यते ।

द्विजा इति ब्राह्मण-क्षत्रिय-वैश्या: । द्विज, द्विजातीय इति द्वे द्विजस्य नाम्नी । शर्मान्तेति विप्र, ब्राह्मण, भूसुर इति त्रीणि ब्राह्मणस्य नामानि । ब्राह्मणस्य नाम शर्मान्तं भवति । वर्मान्तेति राजन्य, क्षत्रिय इति द्वे क्षत्रियस्य नाम्नी तच्च वर्मान्तं भवति । गुप्तान्तेति विश्, वैश्य इति द्वे वैश्यस्य नाम्नी वैश्यनाम गुप्तान्तं भवति । दासान्तेति अन्त्यवर्णस्य शूद्र इत्येकं नाम तच्च दासान्तं भवति । दासत्वञ्च प्रधानीभूतश्रमधर्मिकद्विजसेवापरायणत्वम् । अत्रेदमवसेयम् ज्ञान, बल, व्यापार, श्रमाख्यधर्मचतुष्टयम्, परस्परं सहकृत्य कृत्स्नं व्यवहारं निर्वहति तत्रैकस्यापि व्यतिरेके संसारो दौस्थ्यमापद्येत । सोऽयं तत्तद्धर्मो गुणप्रधानभावेन सर्वत्रैव ब्राह्मणादिषु विद्यते । तत्र प्राधान्येनैकं गुणाभावेनेतरान् त्रीन् प्रत्येकं वर्णो बिभर्ति, प्रधानीभूतज्ञानधर्मिकत्वं ब्राह्मणे, तथाभूतबलधर्मिकत्वं क्षत्रिये । एवमन्यत्राऽपि प्रस्फुरति, अतएव स्वे स्वे धर्मे तस्य तस्य प्रकर्षोऽन्यत्र च तद्वैपरीत्यं प्रतीयते । नायं खलु कर्मणा समुत्पाद्यते किन्तु जन्मनैव । तेन तु केवलं स प्रकर्षति, तद्विरहे पततिं, अतएव ब्राह्मणत्वादिकं जननार्थकजातिशब्देनाभिधीयते, इतिसुधीभिरवधेयम् । सच्छूद्रस्य भेदा आभीरादय:, असच्छूद्रस्य चाण्डालादयो ज्ञेया:, तदाह शूद्रस्य भेद इति ।

अहीर - आभीरस्तु भवेद्गोप: आभीरी तस्त्रियां भवेत् ॥ २४ ॥

कमार - कर्मार: कर्मकारश्च वर्द्धकिस्तत्र कथ्यते ।

कसेरा - ताम्रिक: कांस्यकारश्च समानार्थतया स्मृतौ ॥ २५ ॥

कुम्भार - कुलाले कुम्भकार: स्यात्,

माली - मालाकारस्तु मालिनि ।

लोहार - लोहकृल्लोहकार:स्यात् लौहिकश्चापि कीर्त्यते ॥ २६ ॥

तमोली - ताम्बूलाजीविको वाच्यलिंगस्ताम्बूलिको भवेत् ।

भाट - भट्टचारणवैतालिकास्तु वन्दिनि संमता: ॥ २७ ॥

मछवार - मैनिको मच्छवारो द्वौ मीनग्राहे प्रकीर्तितौ ।

सोनार - स्वर्णकृत् स्वर्णकार: स्यात् कलाद: कथ्यते तथा ॥ २८ ॥

नाई - नापितो नखलूः प्रोक्तो दिवाकीर्तिश्च कथ्यते,

हलुआई - आपूपिको भक्ष्यकारो भक्ष्यविक्रेतरि स्मृतौ ।। २९ ।।

पण्डा - उच्यते कोशकारेण, देवाजीवस्तु देवलः ।

डोम - डमो डोमश्च चाण्डालः श्वपचोऽन्त्यज उच्यते ।। ३० ।।

चमार - चर्मरश्चर्मकारश्च पादूकृत् स्युः समार्थकाः ।

**आभीर इति** आभीर, गोप इति गोपस्य नाम तत्स्त्रियास्तु आभीरीति । **कर्मार इति** कर्मार, कर्मकार , वर्द्धकि इति त्रीणि कर्मकारस्य नामानि **ताम्रिक इति** ताम्रिक, कांस्यकार इति द्वे कांस्यकारस्य नाम्नी । **कुलाल** इति कुलाल, कुम्भकार इति द्वे कुम्भकर्तुर्नाम्नी । **मालाकार इति** मालाकार, मालिन् इति द्वे मालाकारस्य नाम्नी । **लोहकृदिति** लोहकृत्, लोहकार, लौहिक इति त्रीणि लोहकारस्य नामानि । **ताम्बूलेति** ताम्बूलाजीविक, ताम्बूलिक इति द्वे ताम्बूलिकस्य नामानि । **भट्टेति** भट्ट, चारण, वैतालिक, वन्दिन् इति चत्वारि वन्दिनो नामानि । **मैनिक इति** मैनिक, मच्छवार इति द्वे मीनग्राहस्य नाम्नी । **स्वर्णकृदिति** स्वर्णकृत्, स्वर्णकार, कलाद इतित्रीणि स्वर्णकारस्य नामानि । **नापित इति** नापित, नखलू, दिवाकीर्ति इतित्रीणि नापितस्य नामानि । **आपूपिक इति आपूपिक, भक्ष्यकार** इति द्वे भक्ष्यविक्रेतुर्नाम्नी । **उच्यत इति** देवाजीव, देवलइति द्वे देवाजीवस्य नाम्नी । **डम इति** डम, डोम, चाण्डाल, श्वपच, अन्त्यज इति पंच चाण्डालस्य नामानि चण्डालश्चैव डोमश्चेतिमत्स्यसूक्ततन्त्रे । **चर्मर इति** चर्मर, चर्मकार, पादूकृत् इति त्रीणि चर्मकारस्य नामानि, चर्मर इतित्रिकाण्डशेषः ।

दुसाध - दुःसाध्यः पुक्कको जातिभेदे विद्वद्भिरिष्यते ।। ३१ ।।

कलवार सुंडि- शुण्डः स्यात् शौण्डिकः कल्यपालस्तत्र निगद्यते ।

भांड - भण्ड एको जातिभेदे विद्वद्भिः परिकीर्त्यते ।। ३२ ।।

तेली - तैली तैलिक एतौ द्वौ तैलकारिणि संस्मृतौ ।

कसाई - कौटिको मांसिकः प्राज्ञैः समानार्थतयोच्यते ।। ३३ ।।

कहार (खतवै) - वाहके शिवकादीनां काहारक उदीर्य्यते ।

रंगरेज - रांगिको रंगकारश्च समानार्थतया स्मृतौ ।। ३४ ।।

सपौरिया - सर्पस्य खेलके प्राज्ञैराहितुण्डिक उच्यते ।

धोबी - रजको धावको निर्णेजकस्तुल्यार्थकाः स्मृताः ।। ३५ ।।

रंग रिपेर करनेवाला-रंगकर्त्तरि संप्रोक्तौ राजकारि-सुधाकरौ ।

जोलहा - तुन्नवायः कुविन्दः स्यात् हिन्दुधर्मच्युतिंगतः ।। ३६ ।।

दरजी - सौचिकः सूचकः सौचिर्विद्वद्भिः परिकीर्त्यते ।

अरकसिया - रथकारः सूत्रधारः काष्ठच्छेतरि कथ्यते ।। ३७ ।।

राज - इष्टिकाभित्तिनिर्माता पलगण्ड उदीर्यते ।

हब्सी भिल्ल - चाण्डालस्य प्रभेदे तु भिल्लो विद्वद्भिरिष्यते ।। ३८ ।।

दुःसाध्य इति दुःसाध्य, पुक्कक इति द्वे स्तेयजीविकजातिविशेषस्य नाम्नी । शुण्ड इति शुण्ड, शौण्डिक, कल्यपाल इति त्रीणि कल्यपालस्य नामानि । भण्ड इति भण्ड इत्येकं स्त्रिया आकृतिं विधृत्य नृत्यकर्त्तुर्नाम्नी । तैलीति तैलिन् तैलिक इति द्वे तैलिकजातिभेदस्य नाम्नी । कौटिक इति कौटिक, मांसिक, इति द्वे इत्याजीविकजातिभेदस्य नाम्नी । बाहक इति काहारक इत्येकं शिवकादिवहनधर्मिकजातिविशेषस्य नाम । रांगिक इति रांगिक, रंगकार इतिद्वे वसस्त्ररञ्जनकर्त्तुर्नाम्नी । सर्पस्येति आहिकतुण्डिक इत्येकं सर्पखेलनाजीविकस्य नाग । रजक इति रजक, धावक, निर्णेजक, इतित्रीणि रजकस्य नामानि । रंगेति राजकारि, सुधाकर, इतिद्वे प्रासादादिरञ्जनकर्त्तुर्नाम्नी । तुन्नवाय इति तुन्नवायं, कुविन्द इतिद्वे कुविन्दस्य नाम्नी । सौचिक इति सौचिक, सूचक, सौचि इतित्रीणि वस्त्रसीवनजीविकस्य नामानि । रथकार इति रथकार, सूत्रधार इतिद्वे काष्ठच्छेतृजातिविशेषस्य नाम्नी । इष्टिकेति पलगण्ड इत्येकं गृहनिर्मातुर्नाम । चाण्डालस्येति भिल्ल इत्येकं चाण्डालप्रभेदस्य नाम ।

गन्धी - गन्धविक्रायके गांधी गांधिकश्चैव कथ्यते ।

भंगी (मेहतर) - मलाकर्षिणि हाडिः स्यात् मलतारो मलेग्रहिः ।। ३९ ।।

भिस्ती - दृतिः पुंसि स्त्रियाञ्चोक्तः,

कुर्म्मी - जातिभेदे तु कुर्मिय: ।

एतेऽपि हिन्दव: पूर्वं राज्ञा म्लेच्छेन पातिता: ॥ ४० ॥

शिक्ख - शिष्यो हिन्दुप्रभेदे स्यात् वेदसम्मतधर्मक: ।

पञ्चगण - पारदाश्चैव कम्बोजा पह्लवा यवना: शका: ॥ ४१ ॥

क्षत्रियाऽपसदा वीरा: पारस्थाननिवासिन: ।

सगरस्य पितु: शत्रुमन्ववर्तन्त हैहयम् ॥ ४२ ॥

सगरेण नृपालेन सर्वे पंचगणा इमे ।

विजित्य विकृतिं नीता म्लेच्छतां प्रापिता: पुरा ॥ ४३ ॥

अछूत (म्लेच्छ)- म्लेच्छास्तु दस्यवोऽस्पृश्या गवेयु: पारदादय: ।

दासा: पञ्चगणाश्चैव वेदद्वेषपरायणा: ॥ ४४ ॥

दुर्निवार्य्येण कालेन विविधं भिन्नतां गता: ।

ईरंजा: पारसीकाश्च तथा युद्धधियो जना: ॥ ४४ ॥

अन्येऽप्येतादृशा: पंचमकारोपासनावशा: ।

कृत्यै: स्वकीयैरेवेमे म्लेच्छा इत्यभिधां गता: ॥ ४६ ॥

गन्धेति गान्धिन्, गान्धिक इतिद्वे गन्धविक्रायकस्य नाम्नी ।

मलाकर्षिणीति हाडि, मलतार, मलेग्रहि इतित्रीणि मलाकर्षणजीविक-जातिभेदस्य नामानि, हाडिरितिवाचस्पत्यबृहदभिधानम्, मलं तारयति अन्यत्र नयतीति तथोक्त: कैश्चित् महत्तरशब्दोऽपि तत्र निर्दिश्यते अतिशयेन महान् अन्यदीयमलाकर्षणेनेति महत्तर इतिव्याख्यायते च । दृतिरिति चर्मभाण्डस्थवारिणा मलशोधकस्य दृतिं इत्येकं नाम, तच्च स्त्रीसाधारणम् । जातिभेदे इति कुर्मिय इत्येकं जातिविशेषस्य नाम । पञ्चपु मोहमादीयत्वेनाभिहिता: सर्वेऽपि हिन्दव एवासन् किन्तु यवनै भारतं विजित्य स्वधर्मे नीता मोहमादीयत्वेनाभिधीयन्ते । शिष्य इति हिन्दुजातिविशेषस्य शिष्य इत्येकं नाम, तद्धर्मप्रचारकनिरूपितशिष्यवंशीयत्वात् तत्तम् स्वधार्मिकग्रन्थत्वेन वेदानङ्गीकारात्रायं हिन्दुरिति तु नैव वक्तव्य।

तथात्वविरहेऽपि वेदसंमतधर्मपरायणत्वेन वस्तुतो वेदानुयायित्वात् तदेव ज्ञापयि- तुमाह वेदसंमतेति । पारदाइति पारद, कम्बोज, पह्लव, यवन, शक इत्यंते पञ्चगण:, ते च म्लेच्छा:, ननु तेषु क्षत्रियत्वस्मरणेन कथं म्लेच्छत्वमङ्गीकर्त्तव्यमित्याह क्षत्रियाऽपसदाइति अन्यत्स्पष्टम् । म्लेच्छा इति म्लेच्छत्वञ्च पञ्चमकारधर्मिकाधर्मत्वाभावप्रकारकानाहार्य्याप्रामण्यज्ञा-नानास्कन्दितनिश्चयसमानाधिकरणजातिविशेषवत्त्वम् । म्लेच्छ, अस्पृश्य, दस्यु इत्येतानि त्रीणि म्लेच्छस्य नामानि । सर्व एते आर्य्यसन्ताना एव क्रियाल्वशात् म्लेच्छतां गता इति क्षत्रियापसदा इति पदेन बोध्यन्ते । पंचमकारेति मद्यमांसादीत्यर्थ: । अन्यत्सर्व सुगमम् ।

जहूदी - वर्षात्तु भारतात्पूर्वं सगरेण महौजसा ।
येषां निर्वासनं चक्रे तेऽसुरा: क्रोधविह्वला: ।। ४७ ।।
युद्धमात्रधियोऽभूवन् तस्माद्युद्धधिय:स्मृता:
तत्रैव यवना आर्य्यैरुच्यन्ते सर्वदर्शिभि: ।। ४८ ।।

मुसलमान - तुरुष्को मोहमादीयो मोहमादन उच्यते ।
खानस्तत्पण्डिते प्रोक्तस्तद्भेदे मीर उच्यते ।। ४९ ।।
तस्यैव भेदे शाखी स्यात् तद्भेदोऽन्योऽपि दृश्यते ।
मोहमादप्रभावेण युद्धधी यवनो जन: ।। ५० ।।
मोहमादमताधायी मोहमादीय उच्यते ।
मोहमादसमुत्पत्ते: पुरानाभूदयं भुवि ।। ५१ ।।

पठान - क्षत्रियास्तु पुराकाले ये केचिन्म्लेच्छतां गता: ।
प्रतिष्ठानपुराधीशै: शिक्षिता: स्वानुगीकृता: ।। ५२ ।।
प्रातिष्ठाना निगद्यन्ते तेऽधुना कोविदोत्तमै: ।

वर्षादिति युद्धधी, यवन इतिद्वे यवनस्य नाम्नी, तत्र युद्धधीत्वं कदारभ्य समुदपद्यतेत्याह वर्षादिति, अन्यत्सुगमम् । तुरुष्क इति तुरुष्क, मोहमादीय, मोहमादन इतित्रीणि तुरुष्कस्य नामानि । तद्भेदमाह खानइति

तुरुष्कजातीयपण्डिते खान इति, तद्भेदे मीर इति तद्भेदे तु शाखिन् इति कथ्यते, पंचखाना: सप्तमीरा इति मेरुतन्त्रे २३ प्रकाशेऽभिहितम् ।

मोहमादाख्यस्य हिन्दुधर्मविपरीतधर्मिकस्य युद्धधीजातीयस्य मतानुवर्त्तनेन युद्धधिय एव पृथग्जातय इव मोहमादीयत्वेनाभिधीयन्ते, यवनशब्दस्तु युद्धधीष्वेव रूढ:, यवनशब्देन मोहमादीयमात्रग्रहणन्तु कथंचिदौपचारिकत्वेन समर्थनीयम् । क्षत्रियास्तु इति प्रातिष्ठान इत्येकं मोहमादीयजातिभेदस्य नाम तदुत्पत्तिप्रकारमाह क्षत्रियास्त्विति । अन्यत्सर्वं सुगमम् ।

| | | |
|---|---|---|
| फरसी | - | पारसीक: पारसिक: पारसी तत्र कथ्यते ॥ ५३ ॥ |
| अरवी | - | आरवोऽरवदेशीय: कथ्यते कोशकोविदै: । |
| अफरीदी | | कुत्सादीनां महीपालश्रेष्ठानां धर्मसेविनाम् ॥ ५४ ॥ |
| | | केचिद्धर्मद्रुहो दस्युजातीया: शत्रवोऽभवन् । |
| | | हत्यापरायणा दुष्टा निगद्यन्तेऽपराधिन: ॥ ५५ ॥ |
| | | तत्रापरीतिन: कैश्चिदपरीतय ईरिता: । |
| क्रिश्चियन | - | कृष्टधर्मानुग: प्राज्ञै: कृष्टीय: परिकीर्त्यते ॥ ५६ ॥ |
| अफगान | - | वैदिके समये दास: सोऽधुनाऽपगण: स्मृत: । |
| अङ्गरेज | - | आंग्ल: फिरङ्गी गौरण्ड ईरेजश्च समार्थका: ॥ ५७ ॥ |
| जर्मन | - | शर्मण्यदेशवास्तव्ये शार्मण्य: कथ्यते बुधै: । |
| ग्रीसवासी | - | गिरिकायनिवास्तव्ये गिरिकायी निगद्यते ॥ ५८ ॥ |
| अफ्रीकन | - | स्मृतोऽपरौकसीय: स्यादपरौकोनिवासिनि । |
| | | तत्तद्देशनिवास्तव्ये एवमेव निरुच्यते ॥ ५९ ॥ |

पारसीक इति पारसीक, पारसिक, पारसिन्, इतित्रीणि पारस्थान-निवासिजातिभेदस्य नामानि । आरव इति आरव, आरवदेशीय इतिद्वे अरवदेशनिवासियवनविशेषस्य-नाम्नी । कुत्सादीनामिति अपरीतिजातेरुत्पत्तिमाह कुसादीनामिति । अपराधिन् अपरीतिन्, अपरीति इतित्रीणि अपरीतेर्नामानि । कृष्टेति कृष्टीय इत्येकं कृष्टप्रवर्तितधर्मानुयायिनो नाम । वैदिक इति अपगण इत्येकं वैदिकसमये भूतपूर्वदासाख्यजातेर्नाम ।

आंग्ल इति आंग्ल, फिरंगिन् गोरण्ड, इरेज इतिचत्वारि आंग्लदेशीयकृ-शतानुयायिनो नामानि । तत्र लण्ड्रज इत्यपि प्रामाणिकमिति सुधिया बोध्यम् । फिरङ्गिणोऽतिसंपर्कात्फिरङ्गिण्याः प्रसंगत इतिभावप्रकाशः, गौरण्डानां दशतमे मौनराज्यं भविष्यतीति श्रीमद्भागवतम् । इरेजा नव षट्पञ्च लण्ड्रजाश्चापि भाविन इति मेरुतन्त्रे 23 प्रकाशः । शर्मण्येति शार्मण्य इत्येकं शार्मण्यवासिनो नाम । गिरिकायेति गिरिकायिन् इत्येकं गिरिकायदेशवासिनो नाम । अपरौकसीय इति अपरौकसीय इत्येकम् अपरौकःसमाख्यदेशवासिनो नाम । अमरौकोदेशवासिनोऽमरौकसीय इति । एवमन्यत्रापि तत्रद्देशवाचकशब्देभ्यस्ततद्देशनिवास्तव्येऽर्थे यथोक्तं प्रत्ययं विधाय संज्ञा स्वीकर्तव्येत्याशयेन ब्रूते तत्तद्देशेति

सौकीन - स्वानर्हसुखसम्प्राप्तिकामे सौखिक उच्यते ।

डेर - डेरको बलिरः टेरः केकश्च समार्थकाः ॥ ६० ॥

अधमरू - अर्ध मृतो मृतप्राय

उजड्डु - उज्जडो मूढमानवे ।

कमीना - अनार्य्योऽपसदो नीचः पामरो जाल्म उच्यते ॥ ६१ ॥

घुमक्कड - नितांतभ्रमणासक्ते यायावर उदीर्यते ।

अतिथि - प्राहुणः प्राघुणः प्राघूर्णिकः प्राघुणिकोऽतिथिः ॥ ६२ ॥

अफीमची - अफेणभक्षणासक्तेऽफेणभक्षी निगद्यते ।

अवारा - अवार्योऽवार एकार्थे कदाचाश्च कथ्यते ॥ ६३ ॥

असामी - भवेदुत्तरवादी तु तत्रास्वाम्यपि कीर्त्यते ।

असुस्त - पीडाग्रस्ते त्वसुस्थः स्यात्तत्रास्वस्थोऽपि कथ्यते ॥ ६४ ॥

आलसी - अलसो दीर्घसूत्री स्तो वाच्यलिंगौ बुधैर्मतौ ।

ओझागुनी - बुधैर्गारुडिकः प्रोक्तो मन्त्रशास्त्रविशारदे ॥ ६५ ॥

कण्ठमलिया - कण्ठमालिनि विद्वद्भिः कण्ठमालिक उच्यते ।

कंजूस - कदर्य्यकृपणौ प्रोक्तौ किंपचानमितंपचौ ॥ ६६ ॥

स्वागर्हेति अयथाविभवं सुखाकांक्षिणः सौखिक इत्येकं नाम । सौखिकइति राजधर्मे महाभारतम् । डेरक इति डेरक, बलिर, टेर केकर इति चत्वारि विकृतचक्षुषो नामानि । अर्द्धमृत इति अर्द्धमृत, मृतप्राय इत्येते मृतप्रायस्य नाम्नी उज्जड इति उज्जड इत्येकं मूढविशेषस्य नाम । अनार्य्य इति अनार्य्य, अपसद, नीच, जाल्म इति चत्वारि अनार्य्यस्य नामानि । नितान्तेति यायावर इत्येकम् अत्यन्तभ्रमणकर्त्तुर्नाम । प्राहुण इति प्राहुण, प्राघुण, प्राघूर्णिक, प्राघुणिक अतिथि इति पंच प्राहुणस्य नामानि । अफेणेति अफेणभक्षिन् इत्येकम् अहिफेणभक्षणव्यसनिनो नाम । भवेदिति उत्तरवादिन् अस्वामिन् इतिद्वे अस्वामिनो नाम्नी । पीडेति असुस्थ, अस्वस्थ इतिद्वे अस्वस्थस्य नाम्नी । अलस इति अलस, दीर्घसूत्रिन् इतिद्वे अलसस्य नाम्नी । बुधैरिति गारुडिक इत्येकं मांत्रिकस्य नाम । कण्ठमालिनीति कण्ठमालिक, कण्ठमालिन् इतिद्वे कण्ठमालिनो नाम्नी । कदर्य्येति, कदर्य्य, कृपण, किंपचान, मितम्पच इति चत्वारि कदर्यस्य नामानि ।

कर्जखोर - अधमर्णऋणी वाच्यलिंगे खादक-खातकौ ।
शरारती - उपद्रवकरे प्राज्ञैः शरारुः कथ्यते त्रिषु ॥ ६७ ॥
चालाक - धूर्तताशीलचतुरेऽधिकल्पी कथ्यते बुधैः ।
चुगलखोर - पिशुनः पृष्ठमांसादः समानार्थतया स्मृतौ ॥ ६८ ॥
जंगली - आरण्यको भवेद्वन्यस्तत्रैवासभ्य उच्यते ।
जालिया - जालिको जालकारे स्यात्
जामिन - प्रतिभू र्लग्नकः समौ ॥ ६९ ॥
झगड़ालू - द्विषत्यकारणं वाच्यलिंगः स्यात्कलहप्रियः ।
डकैत - चिल्लाभो भाचलो वन्दीकारस्तुल्यार्थकाः स्मृताः ॥ ७० ॥
नावालिग - मताद्यनधिकारो यस्तत्र पौगण्ड उच्यते ।
पडौसी · पार्श्ववर्तिजने प्राज्ञैः प्रतिवेशी निगद्यते ॥ ७१ ॥
ऐंचाताना - काडेरो वक्रदृष्टिःस्यात्
पागल - मत्ते विक्षिप्त-पागलौ ।

प्यादा - पादातिक: पदाति: स्यात्

खोर - खोर खोडौ समार्थकौ ।। ७२ ।।

चोर - स्तेने तु चोर चौरौ स्तो

जिलाह - जिह्वलो भोजनप्रिय: ।

दिवालिया - ऋणदायित्वमुक्त्यै यो निर्धनं स्वं निवेदयेत् ।। ७३ ।।

मिथ्यैव स सुधीमान्यै र्निस्वंब्रुव उदीर्यते ।

अधमर्ण इति अधमर्ण, ऋणी, खादक, खातक इत्येतानि चत्वारि ऋणग्रस्तस्य नामानि । उपद्रवेति शरारु इत्येकं वृथोपद्रवस्वभावस्य नाम । धूर्ततेति अधिकल्पिन् इत्येकं चातुर्य्यसपन्नधूर्तस्य नाम । पिशुनइति पिशुन, पृष्ठमांसाद इति द्वे पिशुनस्य नाम्नी । आरण्यके इति आरण्यक वन्य असभ्य इति त्रीणि असभ्यस्य नामानि । जालिकइति जालिक जालकार इतिद्वे मिथ्याभियोगाय प्रमाणाभासनिर्मातुर्नाम्नी । प्रतिभूरिति प्रतिभू, लग्नकेतिद्वे प्रतिभुवो नाम्नी । कलहप्रिय इत्येकं निर्हेतुद्वेष्टुर्नाम । चिल्लाभ इति चिल्लाभ, माचल वन्दीकार इति त्रीणि बलं प्रदर्श्य स्तेयकर्तुर्नाम । मतादीति पोगंड इत्येकं मतादिदाने अनधिकृतस्य नाम पार्श्वेति प्रतिविशेन् इत्येकं पार्श्वनिवास्तव्यजनस्य नाम । काडेर इति काडेर इत्येकं वक्रदृष्टिकस्य नाम। मत्त इति मत्त, विक्षिप्त, पागल इतित्रीणि विक्षिप्तस्य नामानि, पागलायाङ्हीनायेति प्रकृतिखंड 14 अध्याये ब्रह्मवैवर्त्तादय: । पादातिकइति पदातिक, पदाति इतिद्वे पद्भ्यां गत्वा सन्देशादिवाहकस्य नाम्नी । स्तेन इति स्तेन, चोर, चौर इतित्रीणि चोरस्य नामानि, चोर चौर इतिशब्दकल्पद्रुमादय: । जिह्वलइति इति जिह्वल इत्येकं भोजनप्रियस्य नाम । ऋणेति नि:स्वब्रुव इत्येकं स्वस्य मिथ्यानिर्धनत्वं ख्यापयितुर्नाम ।

बादशाह - पातिसाहो भवेत्सम्राड् बादसाहश्च कथ्यते ।। ७४ ।।

जमीन्दार - भूमिस्वामिविशेषे तु ग्रामेश्वर उदीर्य्यते ।

डिक्टेटर - यदृच्छया शासको य: सोऽधिनायक उच्यते ।। ७५ ।।

वाइसराय - वारश्रायो वरश्र्यायो महातन्त्रेश्वरस्तथा ।

सम्राट्प्रतिनिधिः प्राज्ञैस्तुल्यार्थत्वेन कीर्तिताः ।। ७६ ।।

गवर्नर - तन्त्रेश्वरे तु सामन्तो गवार्नर उदीर्य्यते ।

प्रीमीयर - महामात्रो महामन्त्रितरः प्रामात्य उच्यते ।। ७७ ।।

प्रधानमन्त्री तत्रैव विद्वद्भिः परिकल्प्यते ।

म्युनिष्टर - मन्त्री मन्त्रितरोऽमात्यः सचिवः स्युः समार्थकाः ।। ७८ ।।

कमीश्नर - कमीशनर कर्मेशनरः तप्पेशनायकः ।

स्यात्कामेशनरस्तत्र कुमारामात्य इत्यपि ।। ७९ ।।

कलक्टर - कराक्तरस्तु तप्पेशः करेश्वर उदीर्य्यते ।

मजिस्ट्रेट - मान्येष्टेतस्तथा दण्डपतिस्तुल्यौ प्रकीर्तितौ ।। ८० ।।

वारेति वारमवसरं श्रयति वारश्रायः यथावसरं शासनादिकार्य्यकर्तेति पर्य्यवसितार्थः, वारमवरसरवृन्दयोरिति विश्वमेदिन्यौ । वारणं वारः इदमकर्तव्यमितिबुद्ध्या निषेधः । श्रयणं श्रायः इदं कर्तव्यमितिबुद्ध्या स्वीकरणं विधिरित्यर्थः, तावस्येतिविग्रहेऽण्-विधिनिषेधाभ्यनुज्ञानस्वतन्त्र इतिभावार्थः । वरामुत्कृष्टां श्रियं शासनसम्पदमयते-प्राप्नोतीति वरश्र्यायःसर्वोत्कृष्टशासनाधिकारंप्राप्त इतितदर्थः । वारश्राय, वर्श्रयाय महातन्त्रेश्वर सम्राट्प्रतिनिधि इति चत्वारि सम्राट्प्रतिनिधेर्नामानि । तन्त्रेश्वर इति तन्त्रेश्वर सामन्त गवार्नर इतित्रीणि तन्त्रेश्वरस्य नामानि । गां पृथ्वीं शासनीयत्वेन ऋच्छति अधिकरोतीति गवार् कर्त्तरि विच् स चाऽसौ नरश्चेतिविग्रहः कर्मण्यणि तु गवारनरइत्यपि, गां वाणीं विधिनिषेधात्मिकामृच्छतीति वा प्रधानादिपूर्वा इमे शब्दास्तत्प्रधाने भवन्तीति स्वयमूहनीयम् । महेति महामात्र महामन्त्रितर प्रामात्य प्रधानमन्त्रिन् इति चत्वारि प्रधानमन्त्रिणो नामानि । महामात्रः प्रधाने स्यादिति वोपालितः ! मन्त्रीति मन्त्रिन् मन्त्रितर अमात्य सचिव इतिचत्वारि मन्त्रिणो नामानि । कमीशेति कमीशनर कर्मेशनर तप्पेशनायक कार्मेशनर कुमारामात्य इति

पञ्च तप्पेशनायकस्य नामानि । कुमारामात्य इत्याधुनिकवृद्धाः । कं सुखाय प्रकृतिसमवेतसुखसाधनायेत्यर्थः । ईष्टे प्रभवतीति क्रमीशः स चाऽसौ नरश्चेतिविग्रहे कमीशनरइति । कर्मणः शासनात्मकस्य ईष्टे इति कर्मेशः स चासौ नरश्चेतिविग्रहः । कामेशनरइति कामं यथेच्छमीष्टे इतिकामेशः स चाऽसौ नरश्चेत्यर्थः । कराक्तर इति करान् राज्ञे देयभागान् अंचति प्राप्नोतीतिकराक् अतिशयितःस कराक्तरः, कराक्तर तप्पेश करेश्वर इतित्रीणि तप्पेशस्य नामानि । मान्येष्टेत इति मान्येष्टेत दण्डपति इतिद्वे दण्डपतेर्नामानि । मान्यं प्रजाभिरवश्यस्वीकर्त्तव्यमिष्टं राजनियमानुकूलं शासनमितः प्राप्तो मान्येष्टेतः, प्राप्तिश्च तत्कर्तृत्वरूपा ।

सुपरिण्टेण्डेण्ट - कार्य्याध्यक्षः कवीन्द्रेण सुपरित्रेन्द्र उच्यते ।

इन्सपेक्टर - स्यादिनप्रेक्तरः पर्य्येषको वीक्षाकरः समः ।। ८१ ।।

थानेदार - उद्घाटाऽधिपतौ स्थानपाल औद्घाटिकस्तथा ।

कोतवाल - कोट्टपः कोट्टपालश्च कोटपालः समार्थकाः ।। ८२ ।।

सारजेण्ट - सनालयन्त्रो विद्वद्भिः सारयन्त्रो निगद्यते ।

पुलीस - प्राज्ञैर्यष्टिधरे कोटरक्षपालो निगद्यते ।। ८३ ।।

पुरीश राजपुरुष पालेशाः सदृसार्थकः ।

जमादार - द्वारपालाधिपे वाच्यलिङ्गः स्यादधिकर्मिकः ।। ८४ ।।

कांस्टेबुल - स्यात्कामेष्टबलो राजयाष्टीकः सदृशार्थकः ।

दफादार - मुख्ये प्रहारिणां प्रोक्तः प्राज्ञैः प्रहरिनायकः ।। ८५ ।।

चौकीदार - प्रहरी स्यात्प्रहरिको यामिकादिभटस्तथा

कार्य्याध्यक्ष इति कार्य्याध्यक्ष सुपरित्रेन्द्र इतिद्वे कार्य्याध्यक्षविशेषस्य नाम्नी । सुष्ठु परित्रायते प्रजा भयान्मोचयतीति सुपरित्रः 'आतश्चोपसर्गे' इति कः । स्यादिनप्रेक्तर इति । इनप्रेक्तर पर्येषक वीक्षाकर इति त्रीणि पर्य्येषकस्य नामानि । प्रेक्षयति काय्याकार्य्ये प्रदर्शयतीति प्रेक् अतिशयितः स प्रेक्तरः, इनः श्रेष्ठश्च स इनप्रेक्तर इनं यथास्यात्तथा प्रेक्षते कार्य्यजातं वीक्षते इतिविग्रहे तु इनप्रेट्तर इति बोध्यम् । उद्घाटाधिपताविति उद्घाटाधिपति

स्थानपाल औद्घाटिक इतित्रीणि उद्घाटाधिपतेर्नामानि । 'शौल्किकैः स्थानपालैश्च नष्टापहृतमादृतमित्याग्नेयपुराण-याज्ञवल्क्यौ, उद्घाटः पुरीशस्थानमिति शब्दकल्पद्रुमः तस्याधिपतिरित्यर्थः । कोट्टप इति कोट्टप कोट्टपाल कोटपाल इतित्रीणि कोटपालस्य नामानि । सनालेति सनालयन्त्र सारयन्त्र इतिसनालयन्त्रराजपुरुषविशेषस्य नाम्नी । नालयन्त्रेण सहितः सनालयन्त्रः सारः दृढयन्त्रं नालात्मकं यस्यासौ सारयन्त्रः । प्राज्ञैरिति यष्टिधर कोटरक्षपाल पुरीश पालेश राजपुरुष इतिपंच राजपुरुषविशेषस्य नामानि । कोटरक्षपाल इति अपरीक्षितकारके पञ्चतन्त्रे । पुरो नगरस्य ईशः पुरीशः तद्रक्षक इत्यर्थः । द्वारेति अधिकर्मिक इति शब्दकल्पद्रुमः । स्यादिति कामेष्टबल राजयाष्टीक इति द्वे राजयाष्टीकस्य नाम्नी । काममधिकाधिकमिष्टं च बलम् अधिकारो यस्येतित्रिपदबहुव्रीहिः । राजप्रदत्तशासनौपयिकस्वानुरूपशक्तिविशिष्ट इति फलितार्थः । मुख्ये इति प्रहरिकनायकः इत्येकं प्रहरिणां नायकस्य नाम । प्रहरीति प्रहरिन् प्रहरिक यामिकभट इतित्रीणि यामिकभटस्य नामानि ।

चीफ जस्टिस - प्रधानादी जयेष्टीश-न्यायाधीशौ समार्थकौ ॥ ८६ ॥

जस्टिस - न्यायाधीशो जयेष्टीशः स्याद्विचाराधिपस्तथा ।

जज - स्यादक्षपाटकस्तुल्यः प्राड्विवाकोऽक्षदर्शकः ॥ ८७ ॥

तत्रैव विबुधैराधिकरणिक उदीर्य्यते ।

मुन्सिफ - न्यायकर्तृप्रभेदे तु तुल्यौ स्थेय-मनस्विपौ ॥ ८८ ॥

जूरी - न्यायसभ्यो बुधैरुक्तो न्यायकर्तुः सहायके ।

बैरिस्टर - बुधैर्वैरीष्टरो वारेष्टरो वादेष्टरः स्मृतः ॥ ८९ ॥

वादेष्टनर वागिष्टरौ वागीशनरस्तथा ।

प्रधानादीति प्रधानजयेष्टीश प्रधानन्यायाधीश इतिद्वे प्रधान-न्यायाधीशस्य नाम्नी । जयेष्टीशपदस्य विवरणमनुपदमेव वक्ष्यते । न्यायाधीयश इति न्यायाधीश जयेष्टीश विचाराधिप इतित्रीणि विचाराधिपस्य नामानि । अधीशत्वं च प्राड्विवाकसामान्येन न्यायत्वेनाङ्गीकृते तथात्वं

नवेतिविवेचकत्वरूपबोध्यमजये जयप्रदाने जयपदं पराजयस्याप्युपलक्षकम् । इष्टिः स्वीकृतिः तत्र ईशः क्षमः जयेष्टीशः । न्यायप्रार्थिने जयपराजयप्रदानसमर्थ इतिफलितार्थः । स्यादिति अक्षपाटक प्राड्विवाक अक्षदर्शक आधिकरणिक इति चत्वारि आधिकरणिकस्य नामानि । न्यायेति स्थेय मनस्विप इति द्वे न्यायकर्तृविशेपस्य नाम्नी । अत्र न्यायकर इत्यपि कैश्चिदुच्यते । मनस्विनमपराधहीनं पाति न्यायकरणेन रक्षतीति मनस्विपः आतोऽनुपसर्गे इति कः । न्यायेति न्यायसभ्य इत्येकं प्राड्विवाकसहायकसदस्यस्य नाम । बुधैरिति वैरिणो वैरप्राप्तयोरन्यतरस्य इष्टमिच्छाविषयीभूतमर्थं राति आदत्ते तर्कद्वारा साधयतीतिफलितार्थः. इति वैरीष्टरः , वारेण अवसरेण इष्टं राति गृह्णातीत्यर्थोवा, वारमवसरमिष्टं च रातीत्यर्थोवा अथवा वारणं वारः स्वेतरोक्तपक्षस्य युक्तिप्रत्युक्तिभ्यां निराकरणमितितदर्थः । तेन इष्टं विजयं गृह्णातीत्यर्थः । वादैरतदात्मकतर्कैरिष्टं गृह्णातीति वादेष्टरः । वादैस्तर्कात्मकवचनैरतिशयेनेष्टः स्वपक्षसमर्थकत्वेनेच्छाविषयीभूतराथोवतः वाचा इष्टं रातीति वागिष्टरः, वाचामीशो वागीशोऽतिशयितः स वागीशतरः । वागीष्टर इति दीर्घेकारघटितः केषांचित्प्रयोगस्तु प्रक्रियाऽनववोधविजृम्भित एव । ह्रस्वेकारघटितस्य साधुत्वेऽपि तस्य् तथात्वाभावात् । वैरीष्टर, वारेष्टर वादेष्टर वादेष्टनर वागिष्टर वागीशतर इति पट् व्यवहाराजीवश्रेष्टस्य नामानि ।

वकील, एडवोकेट - वाक्कीलः पक्षवादी च व्यवहाराजीव उच्यते ।। १० ।।

सालिसीटर - विवादयोजके प्राज्ञैः व्यवहारविचारकः ।

धाराशास्त्री तथा शास्त्रशिष्टरस्तत्र संमतः ।। ११ ।।

मुखतार - धारावेदी भवेन्मुख्यतारो मुख्यतरः समः ।

केषांचिद्विदुषां तत्र मुखतारोऽपि संमतः ।। १२ ।।

मुद्दै (अभियोक्ता)- अभियोक्त्यर्थिनौ पूर्ववादी वादी समार्थकाः ।

मुद्दालेह - अभियुक्ते निगद्येते प्रत्यर्थि-प्रतिवादिनौ ।। १३ ।।

मोहररीर (मुन्सी) - मसिपण्याक्षरचणौ मुद्राहर-मनस्विनौ ।

वावकील इति वाक्कील पक्षवादिन् व्यवहाराजीव इतीमानि

व्यवहाराजीवस्य नामानि । वाचं कीलयतीति वाक्कील: । व्यवहाराजीव इतिमनुयाज्ञवल्क्यव्याख्याकृत: । विवादेति विवादयोजक व्यवहारविचारक धाराशास्त्रिन् शास्त्रशिष्टर इति चत्वारि विवादयोजकस्य नामानि, विवादस्य व्यवहारपदस्य योजक: युक्तिप्रत्युक्तिभ्यां स्वपक्षोपपादक इत्यर्थ: । एतेन व्यवहारविचारकपदमपिविवृतप्रायम् । शास्त्रेण शासनकरणेन शिष्टमनुशिष्टं राति गृह्णातीति शास्त्रशिष्टर: । राजनियमेषु स्वपक्षानुग्राहकत्व-प्रयोजकतर्कव्यवहारादिसंयोजक इतिफलितोऽर्थ: । धारावेदीति धारावेदिन मुख्यतार मुख्यतर मुखतार इति चत्वारि व्यवहारजीवावरस्य नामानि । मुख्यं गृहीतपक्षप्रमुखं तारयति अभियोगान्मोचयति कृताभियोग-धर्मिकसत्यत्वमिथ्यात्वान्यतरव्यवस्थापनेन गृहीतपक्षं विजयेन योजयतीति मुख्यतार: । अतिशयेन मुख्य: विचारे प्रमुख इति मुख्यतर: । मुखेन उपायेन तारयतीति मुखतार: । मुखमुपाये प्रारम्भे इति हैम: । अभीति अभियोक्तृ अर्थिन् पूर्ववादिन् वादिन् इति चत्वारि व्यवहारपदे अभियोक्तुर्नामानि । अभियुक्त इति अभियुक्त प्रत्यर्थिन् प्रतिवादिन् इतित्रीणि अभियुक्तस्य नामानि । मसिपण्येति मसिपण्य, अक्षरचण, मुद्राहर, मनस्विन् इति चत्वारि मसिपण्यस्य नामानि । मसिपण्यइति वाचस्पत्य-बृहदभिधानादय: । अक्षरचणइति शब्दकल्पद्रुम: । अत्रेदमवधेयम्-मनस्विपद गुणविशेषावच्छिन्नवाचकमिति तच्छक्यतावच्छेदकं कथं मसिपण्यं व्याप्नुयात् तथापि तत्र तद्व्यवहारश्चेन्नियोज्येत सर्वपदाभिधानयोग्यता सर्वत्रैवावकाशेत, न खल्वेवं केचिदामनन्ति मनीषिण:, सर्वे सर्वार्थवाचका इति तु स्फोट प्रसज्याभियुक्ता व्याचक्षते तस्य युक्तजनमुपजीव्यप्रवृत्तेश्च, नैतावता लौकिकप्रयोगौपयिकत्वं तत्रानुमन्तुं क्षमन्ते परीक्षका: । हन्त ! नेदमाशङ्कितुं शक्यते यतोहि सदसद्विवेकव्यधिकरणशास्त्रज्ञानवति पण्डितपदमपि नोपादीयेत, नापमानेतुं पण्डितम्मन्या नानुमन्येरन्नेव, सत्येवं क्वचिदेव महर्षौ सन्निकर्षेत नाधुनिकेऽधीततन्त्रे, तत्रेदञ्चेद्विवदेत् नैव क्वाचित्कीं सन्निकर्षसम्पदं प्रतिपद्य पदं तावतैव शक्यतावच्छेदकानवच्छेद्येऽपि समापद्येत प्रसरम्, तत्रोमितिव्याहृतौ गूढतमेऽपि महर्षिपदं व्याददीताभिधां निधातुम्, चेदेवं प्रसेधेत् सदसद्विवेकौपयिकशास्त्रज्ञानवति पण्डितपदमौपचारिकम्,

तदा ममाभीष्टमपि कः प्रत्याचष्टां गुणविशेषनिरूपितजनकताशालिमननादिविधातरि मनिस्विपदस्यौपचारिकत्वम् तादृशजनकता न संबलते मसिपण्यवृत्तिमननादाविति तु सर्वथैवापार्थम् । यतोहि मनस्विपदविकारीभूतापशब्दवाच्यनिरूपितविलक्षणवृत्तिता तद्वृत्तिमनने निरुक्तजनकत्वसाधनाय सुकरं परिकरं बध्नीयादेव, जनकत्वं क्वचित्स्वरूपयोग्यत्वरूपं क्वचन फलोपधायकत्वस्वरूपं वा यायर्थमुदेष्यति । औपचारिकत्वमुखबन्धाय प्रयोगजनशून्यता न शरणीक्रेलिमा तर्कपरायणैः तथा सति पण्डितपदस्यौपचारिकत्वेऽपि तद्दौःस्थ्यमुपद्रवेत । यत्किंचित्प्रयोजनन्तु सर्वत्रैव निर्देष्टुं शक्यते । वस्तुतस्त्वभिधैव मसिपण्यमपि बोधयन्तो भवते मनस्विपदम् ग्राहककोशादिव्यतिरेकस्तु न पार्य्यते निश्चेतुं मादृशैर्मितदृश्वभिः, तत्रापि जृम्भमाणायां तत्पदविकाररूपत्वहेतुना मनस्विधर्मिकतदर्थनिरूपित-शक्तिमत्तानुमायाम् ।

पटेल - पट्टालो ग्रामिकः प्राज्ञैर्ग्रामाधिकृत उच्यते ॥९४॥

मार्शल - महारथी भवेन्मारशीलो व्यूहविशारदः ।

कमाण्डर इन चीफ - प्रधानपूर्वकौ सेनापतिः कामान्दरः समौ ॥९५॥

कामान्दारस्तथा तत्र बलाध्यक्षो निगद्यते ।

कमाण्डर - सेनासंचालके सेनापतिः कामान्दरस्तथा ॥९६॥

सेनानायक-सेनानी-कामान्दाराः प्रकीर्तिताः ।

गस्ती सेना - सेनाभेदे मतः प्राज्ञैरुपरक्षकसैनिकः ॥९७॥

सफ मैना सैनिक - सैनिके यात्राशीले तु यात्रासैनिक उच्यते ।

मिलिटरी - भवेदायुधिको योधः सेना सैन्यश्च सैनिकः ॥९८॥

सोलजर - शस्त्राजीवः शस्त्रजीवी समानार्थतया स्मृतौ ।

पट्टाल इति पट्टाल ग्रामिक ग्रामाधिकृत इतित्रीणि ग्रामाधिकृतस्य नामानि । पट्टं राज्ञा प्रदत्तमधिकारपत्रमलति प्राप्नोतीति पट्टालः, कर्मण्यण्, ग्रामिकस्थानमवाप्नुयादिति ७ अध्याये मनुः । महारथीति महारथिन्, भारशील व्यूहविशारद इतित्रीणि व्यूहविशारदस्य नामानि । महारथिशब्दो

विशेषसैन्यशालिन्येवान्वमन्यत मान्यै: पुरातनै:, न खल्विदानीं तथात्वं सम्भाव्यते सामरिकविधेर्वैलक्षण्यात् तन्नैव प्रभूयते इदानीन्तनव्यूहविशारदजनमभिधातुं महारथिपदेन, एवंसति प्राड्विवाक-राजामात्यादिपदेष्वपि विप्लव: संघटेत आधुनिकेषु, तद्वाच्यत्वेनानुजिघृक्षितेषु व्यवहारं निरोद्धुम्, यत्किञ्चिदंशसाम्यं सहयोक्ष्यते तथावादिनामिति चेदुच्येत तदा कथमस्मानेव तत्सहकर्तुं तूष्णीमासीत, अन्यथा यादृशाकृतिविशिष्टे यादृशसूत्रविशेषविशिष्टे घटपदं पटपदं वा व्यवहृतमन्वभूयत विचक्षणैर्नाधुना तादृशाकृतिर्घटस्य न तादृशसूत्रं पटस्येति जगदेव सङ्कटे घटेत । मारणं मार: स शीलो यस्यासौ मारशील: । प्रधानेति प्रधानसेनापति, प्रधानकामान्दर, प्रधानकामान्दार बलाध्यक्ष इति चत्वारि बलाध्यक्षस्य नामानि । कामान्दरादिशब्दव्युत्पत्तिरनुपदमेव वक्ष्यते । सेनेति सेनापति कामान्दर कामान्दार सेनानायक सेनानी इति पञ्च सेनापतेर्नामानि । अनिति जीवतीत्यान् कर्त्तरि क्विप् प्राणीति तदर्थ: तस्य दरो भयमित्यान्दर: प्राणिसम्बन्धिभयमितितदर्थ: । काम: अतिशयित: आन्दरो यस्मादिति कामान्दर: । कामं यथेच्छं मान: प्रणिनो दारयतीतिकामन्दार: । पदार्थज्ञानस्य वाक्यार्थबोधौपयिकत्वेन पुरस्तात् पदार्थबोधौपयिकपद शक्तिनिरूपणस्यैवावश्यकतया सेनापतिशब्दादौ शक्तिमनावेद्य प्रधानसेनापतिशब्दे शक्तिज्ञापनं सामान्यज्ञानस्येतिनियमे विरुणद्धीति केचिदुपद्रवन्ते तन्न सामंजस्यमञ्चन्ति वृत्तौ एकार्थीभावस्यैव बुबोधयिषया कोषकृतां कृते: संभवेन पूर्वं पदशक्तिनिरूपणस्याकिंचित्करत्वात् निरुक्तनियमस्तु नेदं विषयीकरोतीति सुधिया सन्तोष्टव्यम् । सेनाभेद इति उपरक्षकसैनिक इत्येकं सेनाविशेषस्य नाम । उच्यत इति यात्रासैनिक इत्येकं यात्राशीलसैनिकविशेषस्य नाम । भवेदिति आयुधिक योध सेना सैन्य सैनिक इति पंच सेनासामान्यस्य नामानि । शस्त्राजीव इति शस्त्राजीव शस्त्रजीविन् इति द्वे शस्त्राजीविनो नाम्नी ।

कम्पाउण्डर - स्यात्कल्प्येनदर: पुंसि समौ भेषजमेलक: ।।९९।।

तत्रैव कथ्यते कैश्चित्प्राज्ञैर्भेषजयोजक: ।

नर्स - सेविकायां मता रुग्णसेविका परिचारिका ।।१००।।

धात्री चिरन्तनैस्तत्र नवीनैर्नरसेविका ।

चान्सनर - विश्वविद्यालयाध्यक्षे प्रधानाध्यक्ष इष्यते ।।१०१।।

तत्रैव स्यात्कुलपतिश्चायेशनर इत्यपि ।

वाइसचान्सनर - प्रधानाध्यक्षचायेशनरौ कुलपतिः समे ।।१०२।।

उपादयः समानार्थाः सुधीभिः परिकल्पिताः ।।

डाइरेक्टर - शिक्षाध्यक्षे भवेत् द्राग्दिक्तरोद्राग्दिष्टरः समः ।।१०३।।

स्यादिति कल्प्येनदर भैषजमेलक भैषजयोजक इति त्रीणि चिकित्सकहायकविशेषस्य नामानि । कल्प्ये चिकित्सकैः परिकल्पनीये भेषजादौ इनः श्रेष्ठो दर आदरो यस्याऽसौ कल्प्येनदरः चिकित्सक संमतौषधौ कृतादर इत्यर्थः । आदरश्च तत्संयोजनादिरूपोज्ञेयः । सेविकायामिति सेविका रुग्णसेविका परिचारिका धात्री नरसेविका इति षट् रुग्णचिकित्सासेवापरायणाया नामानि चिरन्तनैर्नवीनैरित्यनयोर्मतेनेतिशेषः । विवेति प्राधानाध्यक्ष कुलपति चायेशनर इतित्रीणि विश्वविद्यालयाध्यक्षस्य नामानि । चयनं चायः ग्र न्थ नियमादीनां निर्माणरक्षणादिरूपः तस्येशश्चायेशः ईशत्वं च निर्माणक्रियायां प्राधान्येन तद्रक्षणायै शासनकर्तृत्वेन च बोध्यम्, चायेशश्चासौ नरश्चेति चायेशनरः, शिक्षाविषये नियोगपर्य्यनुयोगसमर्थ इतिपर्य्यवसितार्थः । नन्वत्र नरपदमव्यावर्तकं निरुक्तचायेशत्वस्य नरभिन्नेऽप्रसिद्धेरितिचेन्न, विलक्षणज्ञानवैशिष्ट्यव्यंञ्जनायै प्राशस्त्यबोधकतया तदुपादानचारितार्थ्यात् विद्वज्जन इत्यादाविव धर्मिताया व्यावृत्त्याऽनवच्छेदेऽपि क्षतिविरहाच्च । एवमन्यत्रापि कमीशनरादिशब्देषु विबुधैरूहनीयम् । यद्यपि कुलपतिशब्दः शास्त्रविपयिताकज्ञानौपयिकशब्द-प्रयोगावच्छिन्ने एव प्रायुज्यत प्रामाणिकैः न पुविश्वविद्यालयसम्बन्धिप्रबन्धविधातरि शिक्षाकर्तृत्वविरहवति पुरुषे तत एवात्र कुलपतिशब्दो व्यवहर्तुं न शक्यते तन्निरूपितशिष्यत्वस्याप्रसिद्धिरपि तत्र प्रत्यूहिष्यते तच्छक्यतावच्छेदकघटकपदार्थासम्बन्धिन्यपि तत्पदोपचारे तु कुत्र कस्य प्रयोगइति व्यवस्थैव शतधा भिद्येत । सत्यमिदं सर्वथैव, तथाप्यत्र तदुक्तिः पल्लवग्राहिजनप्रसिद्धिमनुरुध्यैव । अतएवानिर्भरताम् ।क- पृथगुक्तिः कृता कोशकृतेति मौनमास्थेयं मनस्विभिरिति । प्रधानाध्यक्षेति उपप्रधानाध्यक्ष उपचायेशनर उपकुलपति इतित्रीणि उपप्रधानाध्यक्षस्य नामानि ।

शिक्षेति शिक्षाध्यक्ष द्राग्दिक्तर द्राग्दिष्टर इतित्रीणि शिक्षाध्यक्षस्य नामानि। अतिशयेन द्राक् शीघ्रं दिशति शिक्षासम्बन्धिकार्य्यं निर्दिशतीति द्राग्दिक्तरः, देशनं दिष्टम् आदेश इतितदर्थः द्राक् आदेशं राति ददातीति द्राग्दिष्टरः।

घोडसवार - अश्ववाहोऽश्ववारः स्यात्

सवार - आरोहारोहिणौ समौ।

उडाका - उड्डायकः कवीन्द्रेण वैमानिक उदीर्य्यते ॥ 104 ॥

जेलर - काराध्यक्षो वध्यपालस्तुल्यार्थत्वेन भाषितौ।

वन्दी - वन्दिः प्राग्रहिकः कारागुप्त एते समार्थकाः ॥ 105 ॥

नजरबन्द - दृष्टिरुद्धो राजरुद्धो निरुद्धो वाच्यलिङ्गिनः।

सिपाही - क्षिप्राही दूतभेदे स्यात्

चेला - चेलस्त्रिष्ववरे भवेत् ॥ 106 ॥

हेल्थ आफिसर - स्वास्थ्यावेक्षः स्वास्थ्यपालः स्वास्थ्याधिकृत उच्यते।

सर्जन - सर्जनः शल्यकारश्च शल्यसर्जन उच्यते ॥ 107 ॥

सिविल सर्जन - पौरादयस्तु पूर्वोक्तास्तत्प्रधाने प्रकीर्तिताः।

डाक्टर - द्राक्तारो द्राक्तरः पुंसि स्त्रियां द्राक्तारिका भवेत् ॥ 108 ॥

अश्वाह इति अश्ववाह अश्ववार इतिद्वेअश्ववाहस्यनाम्नी। आरोहेति आरोह आरोहिन् इतिद्वे यानारूढस्य नाम्नी। उड्डयक इति उड्डायक वैमानिक इतिद्वे वैमानिकस्य नाम्नी। काराध्यक्ष वध्यपाल इतिद्वे काराधिकृतस्य नाम्नी। वन्दिरिति वन्दि प्राग्रहिक कारागुप्त इतित्रीणि वन्देर्नामानि। दृष्टीति दृष्टिरुद्ध राजरुद्ध निरुद्ध इतित्रीणि राजरुद्धस्य नामानि निरुद्ध इति कुल्लूकभट्टः। क्षिप्राहिन् इत्येकं दूतभेदस्य नाम। क्षिप्रमहितुंशीलमस्येति विग्रहः। चेल इति चेल इत्येकं स्वापकृष्टानुगस्य नाम। तत्स्त्रियां चेली भवति चेलं वस्त्रेऽधमेत्रिष्वित्यमरसिंहः। स्वास्थ्यावेक्षइति स्वाथ्यावेक्ष स्थास्थ्यपाल स्वास्थ्याधिकृत इतित्रीणि प्रजास्वास्थ्यरक्षायै राज्ञाधिकृतस्य नामानि। सर्जन इति सर्जन शल्यकार शल्यसर्जन इतित्रीणि शल्यसर्जनस्य

नामानि । शल्यादिद्वारा आरोग्यंसृज्यतेऽनेनेति सर्जनः अरोग्यविधानकरणइत्यर्थः । शल्यं करोतीति शल्यकारः, आरोग्यं सृज्यतेअनेनेति सर्जनः, शल्येन सर्जन इति शल्यसर्जनः शल्यपदं हेतुपरम् । पौरादय इति पौरसर्जन पौरशल्यकार पौरशल्यसर्जन चिकित्साध्यक्ष इति चत्वारि पौरसर्जनस्य नामानि । पौरपदं स्वपर्य्यायस्याप्युपलक्षकम्, तेन नागरिकसर्जनाद्यपि तत्रार्थेऽनुसन्धेयम् । अत्रार्थे केचित् शल्यसर्जन इत्यपि व्यवहरन्ति तत् सामान्यपरस्य विशेषार्थे व्यवस्थापनेन बोध्यम् । द्राक्तार इति द्राक् शीघ्रं तारः तरणं रोगान्मोचनं येनाऽसौ द्राक्तारः, तरणतो रोगात्त्राणम् द्राक्तरो यस्मात् येनेति वा द्राक्तरः । तत्स्त्रियां द्राक्तारिकेति द्राक्तारयतीति कर्त्तरि ण्वुलि सिद्धयति प्रवृत्तिनिमित्तभेदस्तु विषह्य एव सुधीभिः ।

प्रिन्सपल - स्यातां विद्यालयाध्यक्ष-शालाध्यक्षौ समार्थकौ ।
प्रोफेसर - अध्यापकप्रभेदस्तु प्राध्यापक उदीर्य्यते ।। 109 ।।
गार्जियन - मान्येऽभिरक्षके वाच्यलिंगः स्यादभिभावकः ।
मास्टर - शिक्षाप्रदायके वाच्यलिंगः शिक्षक उच्यते ।। 110 ।।
हेडमास्टर - प्रधानशिक्षकस्तेषां प्रधाने कथ्यते बुधैः ।
प्राइभेट्ट्युटर- शिक्षकस्य प्रभेदे तु गृहशिक्षक उच्यते ।। 111 ।।
ग्रेजुयेट - भवेदुपाधिप्राप्तः स य उपाधिविशेषभाक् ।
मैट्रिकुलेट - विद्यालयप्रविष्टस्तु मतिकूलेत उच्यते ।।112 ।।

स्यातामिति विद्यालयाध्यक्ष शालाध्यक्ष इतिद्वे शालाध्यक्षस्य नाम्नी । अध्यापकेति प्राध्यापक इत्येकं महाविद्यालयीयशिक्षकविशेषस्य नाम । मान्य इति अभिभावक इत्येकमभिरक्षकविशेषस्य नाम । शिक्षेति शिक्षक इत्येकं शिक्षणप्रदातुर्नाम । प्रधानेति प्रधानशिक्षक इत्येकं शिक्षकप्रधानस्य नाम । शिक्षकस्येति गृहशिक्षक इत्येकं शिक्षमाणस्य गृहमागम्य शिक्षाप्रदातुर्नाम । भवेदिति उपाधिप्राप्त इत्येकं पाश्चात्योपाधिविशेषभाजो नाम । विद्यालयेति विद्यालयप्रविष्ट मतिकूलेत इतिद्वे विद्यालयविशेषप्रविष्टच्छात्रस्य नाम्नी । मतेर्ज्ञानस्य कूलं तटमितो गत इति मतिकूलेतः ।

रजिस्ट्रार - प्राक्तो राजेष्टितीकारो राजेष्टार: समार्थक: ।
तत्र स्याल्लेख्यपत्रारस्तद्भेदस्त्वथ कथ्यते ।। 113 ।।
परीक्षाध्यक्ष इत्येष परीक्षायोजकस्तथा ।

क्लर्क - लिपिकाराक्षराजीव-कलार्क-लिपिजीविन: ।। 114 ।।

मेयर - नगराधिकृते मान्यनर: स्यान्नगरेश्वर: ।
पौरिकश्च पुराध्यक्षस्तत्र मेयर उच्यते ।। 115 ।।

पोर्टर [कुली] - पोटिकारस्तु विद्विद्भि: पोट्लीहर इष्यते ।
केषांचिद्विदुषां तत्र मत: पोटलिकाहर: ।। 116 ।।

इन्जिनीयर - कुलिकेश: शिल्पप्रज्ञस्तथा स्थायुकनायक: ।
नवीनैर्विबुधैस्तस्मिन्नञ्जोनिर्मेयर: स्मृत: ।।117 ।।

ओभरसियर - शिल्पज्ञोऽवरशिल्पार: स्थायुक: परिकीर्त्यते ।

प्रोक्त इति राजेष्टितीकार राजेष्टार लेख्यपत्रार इतित्रीणि लेख्यपत्रिकारक्षक-सामान्यस्य नामानि । परीक्षाध्यक्ष परीक्षायोजक इतिद्वे तु परीक्षासम्बन्धि लेख्यपत्रिकारक्षाधिकृत नाम्नी । राज्ञा इष्टं राजेष्टं तदस्य संजातं राजेष्टितम् तत्करोतीति राजेष्टितीकार: । राजस्वीकृतिप्रयोजक इतिपर्य्यवसितार्थ: , राजेष्ट-मारयति राजेच्छाविषयत्वं गमयतीति राजेष्टार: । ऋच्छते: कर्मण्यण् इष्टशब्दो धर्मप्रधान: , लेख्यपत्रं क्रयविक्रयादिपत्रमारयति गमयतीति लेख्यपत्रार: । लिपीति लिपिकार अक्षराजीव कलार्क लिपिजीविन् इतिचत्वारि अक्षराजीवस्य नामानि । कलनं कल: संख्यानार्थककलते: 'खनोघचेति 'घ:, संख्यानमितितदर्थ:, तं जीतिकात्वेन अर्कते स्तौतीति कलार्क: पचादित्वादच् कल स्तवने इति भ्वादि: । नागराधिकृत इति नगराधिकृत मान्यनर नगरेश्वर पौरिक पुराध्यक्ष मेयर इति षट् नगराधिकारे सदस्यैर्निर्वाचितस्य नामानि । आर्य्यराज्यकाले त्वयं राज्ञाधिकृत आसीत्, अतएव पुराध्यक्ष: कोट्टपति: पौरिक: दण्डपाशिक' इत्यभिधानचिन्तामणिपरिशिष्टघटक-दण्डपाशिकपर्य्यायतया पुराध्यक्षपदस्योल्लेख: संगच्छते । मेयं सदस्यद्वारा प्रस्तोतव्यविषयं प्रति गृह्णातीति मेयर:, सदस्यप्रस्तावितविषयविचारक इति

फलितोऽर्थः । पोटिकार इति पोटिकार पोटलीहर पोटलिकाहर इतित्रीणि पोटलिकाहरस्य नामानि, पोटिकां राति गृह्णातीति पोटिकारः । कुलिकेश इति कुलिकेश शिल्पप्रज्ञ स्थायुकनायक अञ्जोनिर्मेयर इतिचत्वारि शिल्पप्रज्ञस्य नामानि । अज्जसा निर्मेयं विरचनीयं राति आदत्ते निर्माणेच्छया स्वीकरोतीति अञ्जोनिर्मेयरः सम्यक्तया निर्मातव्यवस्तुनिर्माणदक्षिण इतितदर्थः । शिल्पेति शिल्पज्ञ अवरशिल्पार स्थायुक इतित्रीणि स्थायुकस्य नामानि । शिल्पमृच्छतीति शिल्पारः अवरोऽपकृष्टः सोऽवरशिल्पारः । स्थायुक इति शब्दकल्पद्रुमः ।

अमीन - आमेनोऽवनिमायश्च भूमिमापक उच्यते ॥ 118 ॥

कारीगर - कारुः कार्य्यकरः शिल्पकारः कारुक इष्यते ।

कारीगरों का प्रधान- वाच्यलिंगस्तु कुलिकस्तद्वरे परिकीर्त्यते ॥ 119 ॥

ठेकेदार - पुरस्कृत्य पणं कार्य्यकर्त्ता पाणिक उच्यते ।

मेम्बर - सभ्यः सदस्यः संप्रोक्तौ समानार्थतया बुधैः ॥ 120 ॥

पेशकार - प्रवेशकारः पत्रादिप्रवेशकृति कथ्यते ।

खलासी - नाविकः स्यात्तरीभृत्यः पोतकर्मकरस्तथा ॥ 121 ॥

युद्धमन्त्री - सान्धिविग्रहिको युद्धमन्त्री तुल्यार्थकौ स्मृतौ ।

दलाल - माध्यस्थ्याजीविनि प्राज्ञै र्माध्यस्थ्याजीव उच्यते ॥ 122 ॥

नोकर दासांगमर्दोपस्थातृ-भृत्याभिसर-सेवकाः ।

अनुगानुचरप्रेष्याः कर्मसाङ्कर्य्यलक्षणाः ॥ 123 ॥

आमेन इति आमेन अवनिमाय भूमिमापक इतित्रीणि भूमिमापकस्य नामानि । आ सामन्तान्मान्ति मामाः कर्त्तरि क्विप् तेषु इनः श्रेष्ठः आमेनः । कारुरिति कारु कार्य्यकर शिल्पकार कारुक इतिचत्वारि कारोर्नामानि । कारुकः कारुरितिशब्दकल्पद्रुमः । वाच्येति कुलिक इत्येकं कारुश्रेष्ठस्य नाम । पुरस्कृत्येति पाणिक इत्येकं संख्यातं द्रव्यं कार्य्यसाधनतया स्वीकार्य्य शिल्पकर्त्तुर्नाम । सभ्य इति सभ्य सदस्य इतिद्वे सभ्यस्य नाम्नी प्रवेशेति प्रवेशकार इत्येकं न्यायालयादौ पत्रादिप्रवेशकर्त्तुर्नाम । नाविक इति नाविक

तरीभृत्य पोतकर्मकर इतित्रीणि पोतकर्मचारिणो नामानि । सान्धिविग्रहिक इति सान्धिविग्रहिक युद्धमन्त्रिन् इति द्वे युद्धमन्त्रिणो नाम्नी ।

'माध्यस्थ्याजीविनीति माध्यस्थ्याजीविन् माध्यस्थ्याजीव इतिद्वे माध्यस्थ्यं कृत्वा धनमुपार्जयितुर्नाम्नी । दासेति दास अंगमर्द उपस्थातृ भृत्य अभिसर सेवक अनुग अनुचर प्रेष्य इति नव दासस्य नामानि, एकस्यापि विभिन्नकार्य्यकारित्वरूपसाङ्कर्य्येण तत्तन्नाम निर्दिश्यते, दास: क्रयादिलभ्यो न तु वेतनभोगी, अंगमर्दोऽङ्गसंवाहनकर्त्ता न तूदकाद्याहारक:, उपस्थाता कार्य्यालयादौ तिष्ठन् स्वामिनाऽऽहूयमानो निकटस्थकार्य्यकर्त्ता न तु कौटुम्बिक-कार्य्यकारक:, भृत्यो वेतनभोगी नतु क्रयादिलभ्य:, अभिसरो यात्रादौ अंगरक्षको न तु सेवापरायण:, सेवको रोगाद्यापत्तौ परिचारक: न तु अनुगामी, अनुगानुचरौ पृष्ठगामिनौ न तु संवाहकौ, प्रेष्य: संदेशवाहको न तु गृहकार्य्यकारी, एवं चैषु स्पष्टमेव परस्परं भेदकधर्म उपलभ्यते, किन्तु स्वामिपरतन्त्रतया एकस्मिन्नेव विविधकर्मसाङ्कर्य्यं दृश्यते । दासोऽपि प्रेष्यते अङ्गमर्दोऽप्युपस्थाप्यते ।

अर्दली - आरालिङ्गर इत्येष बुधै: पार्श्वचरे स्मृत: ।

आफीसर - तन्त्रप्रबन्धको राजपुरुष: कर्मचारिणि ॥ 124

कार्य्यालयाधिकारी च स्मृत आप्यासरो बुधै: ।

टिकट कलेटर - शुल्कग्राह: शौल्किक: स्यात् शुल्कपत्रप्रबन्धक: ॥ 125 ॥

चिटिकेशस्तथा प्रोक्त: शुल्कपत्रकराक्तर: ।

पटवारी - पट्टवारी पट्टलेख उभौ तुल्यार्थकौ स्मृतौ ॥ 126 ॥

तत्रैव विबुधै भूमिप्रबन्धक उदीर्य्यते ।

तहसीलदार - प्रकृतिभ्य: करग्राही करग्राहो निगद्यते ॥ 127 ॥

मशीनिष्ट - यन्त्रकारो यन्त्रविज्ञो वाच्यलिङ्गौ प्रकीर्तितौ ।

खलीफा - शिक्षके मल्ल[illegible]या मल्लशिक्षक उच्यते ॥ 128 ॥

निहायत जख्मी - अत्याहतोऽतिविद्ध: स्यान्नितरामाहते जने ।

संमुखवर्त्ती - संमुखीने जने पारिमुखिक: कथ्यते बुधै: ॥ 129 ॥

आरालिङ्कर इति. आरालिंकर पार्श्वचर इतिद्वे पार्श्वचरस्य नाम्नी । तन्त्रेति तन्त्रप्रबन्धक राजपुरुष कर्मचारिन् कार्य्यालयाधिकारिन् आप्यासर इति पंच कार्य्यालयाधिकारिणो नामानि । आप्यासं राति स्वाधिकार्य्यत्वेन गृह्णातीति आप्यासरः, आप्यासः कार्य्यस्थानमित्यग्रे ग्रन्थकृतैव वक्ष्यते । शुल्केति शुल्कग्राह शौल्किक शुल्कपत्रप्रबन्धक चिटिकेश शुल्कपत्रकराक्तर इति पञ्च शौल्किकस्य नामानि । शौल्किकैः स्थानपालैश्चेत्याग्नेयपुराणम् । पट्टवारीति पट्टवारिन् पट्टलेखं भूमिप्रबन्धक इतित्रीणि भूमिप्रबन्धकर्तुर्नामानि । पट्टंवरीतुं शीलमस्येति पट्टवारी, वरणं च लेख्यत्वेन रक्ष्यत्वेन उभयथा वा स्वीकरणम् । प्रकृतिभ्य इति करग्राह इत्येकं प्रकृतिभ्यः करग्राहिणो नाम । यन्त्रेति यन्त्रकार यन्त्रविज्ञ इतिद्वे यन्त्रनिर्माणप्रकारवेत्तुर्नाम्नी । शिक्षक इति मल्लशिक्षक इत्येकं बाहुविद्याशिक्षयितुर्नाम । अत्याहत इति अत्याहत अतिविद्ध इतिद्वे अत्याहतस्य नाम्नी । संमुखीन इति पारिमुखिक इत्येकं संमुखासीनस्य नाम ।

वशवर्त्ती - वश्यः प्रणेयस्तुल्यार्थां वशवर्त्ती वशंवदः ।

लुटेरा - लुण्टाको लुण्टकः पाटच्चरः सर्वे समार्थकाः ।। 130 ।।

पेटू - अग्राद्घने बुधैः प्रोक्तौ औदरिकोदरम्भरी ।

किरायेदार - भवेद्भाटकदायस्तु जने भाटकदातरि ।। 131 ।।

एडीटर - वाच्यसलिङ्गः स्मृतः प्राज्ञैरायव्ययपरीक्षकः ।

स्टेशन मास्टर - इष्टांसनेष्टसदने अध्यक्षान्ते समार्थके ।। 132 ।।

घडीसाज - घटीकारो घटीयन्त्रनिर्माणविदि कथ्यते ।

बाबू - आबुकः स्याज्जने मान्ये ।

पेसेन्जर - पान्थे पथिक-यात्रिणौ ।। 133 ।।

गाम के मुखिया- ग्रामणीर्ग्रामिमुख्ये स्यात् ।

होनहार - भविष्णुर्भावुकः स्मृतः ।

दुकानदार - पण्यकापणिकौ तुल्यौ तद्विशेषे तु मोदकः ।।134 ।।

दरवान - दाण्डिको द्वारपालः स्यात्

सुस्त - मन्दः शिथिल उच्यते ।

होशियार - दक्षिणश्चतुरः प्रोक्तः प्रवीणः कुशले बुधैः ।। 135 ।।

एजेण्ट - त्रिपूच्यते प्रतिनिधिः परस्थाने नियोजितः ।

वश्य इति वश्य प्रणेय वशवर्त्तिन् वशंवद इति चत्वारि स्वाधीनीकृतस्य नामानि । लुण्टाक इति लुण्टाक लुंण्टक पाटच्चर इति त्रीणि पाटच्चरस्य नामानि । आग्राद्वन इति आग्राद्वन औदरिक उदरम्भरि इतित्रीणि उदरपरायणस्यनामानि । भवेदिति भाटकदाय इत्येकं भाटकदातुर्नाम । वाच्येति आयव्ययपरीक्षक इत्येकमायव्ययप्रमापकस्य नाम । इष्टेति इष्टासदनाध्यक्ष इष्टासनाध्यक्ष इति द्वे धूमशकटविश्रमस्थानाधितपतेर्नाम्नी । घटीति घटीकार इत्येकं घटीयन्त्रनिर्माणादिविधातुर्नाम । आवुक इति आवुक इत्येकं माननीयजनस्य नाम, आबुकः पितृभूपयोरितिमेदिनी । पान्थ इति पान्थ पथिक यात्रिन् इतित्रीणि यात्रिणो नामानि । ग्रामणीरिति ग्रामणी ग्राममुख्य इतिद्वेग्रामनेतुर्नाम्नी । भविष्णुरिति भविष्णु भावुक इतिद्वेभावुकस्य नाम्नी । पण्यकेति पण्यक आपणिक इतिद्वे पण्यविक्रेतुर्नाम्नी, नियमेन यस्मात्पण्यं स मांदक इतिख्यायते ।

दाण्डिक इति दाण्डिक द्वारपाल इतिद्वे दौवारिकस्य नाम । मन्द इति मन्द शिथिल इतिद्वे क्रियायां शिथिलस्य नाम्नी । चतुर इति चतुर दक्षिण प्रवीण कुशल इति चत्वारि कार्य्यदक्षिणस्य नामानि । परेति प्रतिनिधि इत्येकं परकीयकार्य्यनिर्वोढुर्नाम ।

एक्सपर्ट - विशेषज्ञानसम्पन्ने विशेषज्ञे निगद्यते । ।। 136 ।।

टी. टी. आई - दर्शके शुल्कपत्राणां शुल्कपत्रपरीक्षकः ।

साथी - सार्थवाही वयस्यः स्यात् साथीं सहचरस्तथा ।। 137 ।।

भागीदार , - अंशभागी भवेद्भागहारस्तुल्यांशके जने ।

एक्टर - अभिनेता पुमानुक्तोऽ-

एक्ट्रेस - भिनेत्री स्त्री निगद्यते ।। 138 ।।

गार्ड - गाडित्रः कथ्यते प्राज्ञैर्गन्त्रीरक्षणकर्त्तरि ।

| | | |
|---|---|---|
| लोभी | - | लोलुपो. लोभशीले स्यात् |
| मूर्ख | - | मूर्खो वैधेय उच्यते ॥ 139 ॥ |
| वोटर | - | मतदाता तथा निर्वाचकः स्तो वाच्यलिंगिनौ । |
| आनरेरी | - | वेतनेन विना कार्य्यकर्त्ताऽवैतनिकः स्मृतः ॥ 140 ॥ |
| चीफ | - | तत्तद्विभागप्रमुखे प्रधानः समुदीर्य्यते । |
| डिप्टी | - | स्वीयकार्य्ये सहायस्तु सहायक उदीर्य्यते ॥ 141 ॥ |
| एकाउण्टेण्ट | - | गणनाजीविनि प्रोक्तोऽङ्कनेन्द्रो विदुषांवरैः । |
| बडा पादरी | - | प्रधानधर्माध्यक्षः स्याद्धर्माध्यक्षे महत्तरे ॥ 142 ॥ |
| पादरी | - | धर्माध्यक्षो भवेद्धर्मोपदेशनविशारदे |

विशेषेति विशेषज्ञ इत्येकं तत्तद्विषयकविशेषज्ञानसम्पन्नस्य नाम ।

दर्शकेति शुल्कपत्रपरीक्षक इत्येकं शुल्कपत्रपरीक्षणकर्तुर्नाम । सार्थेति सॉर्थवाहिन् वयस्य सार्थिन् सहचर इतिचत्वारि सहचरस्य नामानि । अंशेति अंशभागिन् भागहार इतिद्वे समानभागभाजो नाम्नी । अभीति अभिनेतृ इत्येकं नाटकादौ अभिनयकर्तुर्नाम । अभिनयकर्तृस्त्रियान्तु अभिनेत्री भवति । गाडित्र इति गाडित्र इत्येकं गन्त्र्या रक्षणादिकर्तुर्नाम । गाडिं गान्त्रीं त्रायते इति गाडित्रः आतोऽनुपसर्गे इति कः । यद्यप्येतदपभ्रंशीभूतांग्लशब्दो रक्षाकर्तरि वीक्षाकर्तरि चप्रयुज्यते तथाप्यत्र केवलं गन्त्रीरक्षकमुद्दिश्यैव तदर्थप्रतिपादकशब्दः शब्दप्रदीपकृता निरदेशि, तद्वाच्योऽन्योऽर्थस्तु वीक्षकादिशब्दैरेव सुप्रत्येय इति तद्विषये कवेरौदासीन्यं प्रतीयते । लोलुप इति लोलुप इत्येकं लोभशीलस्य नाम । मूर्ख इति मूर्ख वैधेय इतिद्वे मूर्खस्य नाम्नी । मतेति मतदातृ निर्वाचक इतिद्वे निर्वाचने मतदानकर्तुर्नाम्नी । वेतनेनेति अवैतनिक इत्येकं वेतनं विना कर्मकारस्य नाम । तत्तदिति प्रधान इत्येकं प्रमुखस्य नाम । स्वीयेति सहायक इत्येकं स्वकार्ये साहाय्यकर्तुर्नाम । गणनेति अंकनेन्द्र इत्येकं गणनाजीविनो नाम । अंकने गणनायाम इन्दते प्रभवतीति अङ्कनेन्द्रः, इदि परमैश्वर्य्ये भ्वादिस्तत ऋज्रेन्द्र इति रन् । प्रधानेति प्रधानधर्माध्यक्ष इत्येकं महाधर्माध्यक्षस्य नाम । धर्मेति धर्माध्यक्ष इत्येकं धर्मोपदेशकर्तुर्नाम ।

जोहरी - मणिकारो भवेद् रत्नपरीक्षणविशारदे ।। 145 ।।

दुनियाबी - अत्रकस्तु भवेत्सांसारिक: संसारधर्मिणि ।

दकियानूस - प्रोक्त: संकीर्णचित्तस्तु यस्य संकुचितं मन: ।। 145 ।।

हट्टाकट्टा - हृष्टपुस्टस्तु पीने स्यात्

घायल - आहत: क्षतशालिनि ।

मोसाहेब - कथ्यते नर्मसचिव:

दरबारी(चापलूस) - चाटुकारश्च चर्पट: ।। 146 ।।

कका (चाचा) - कर्कश्चर्च: पितृव्य: स्यात्

अघोरी - त्रिष्वघोर: प्रकीर्तित: ।

पिता (बाप) - जनके तु पिता वप्र आवुक: समुदीर्य्यते ।। 147 ।।

हाट का दरोगा - हट्टाध्यक्षोऽधिकर्मी स्यात्

जादूगर - जातुकारैन्द्रजालिकौ ।

पूँजीपति - स्यात्परश्रमजीवी तु मतो मूलस्ववादिनि ।। 148 ।।

साहूकार (महा)- उत्तमर्ण ऋणाद: स्यात् साधुकार: समार्थक: ।

प्रेसिडेंण्ट - अध्यक्ष: प्रमुखस्तुल्यौ

जासूस - चारो गुप्तचरश्चर: ।। 149 ।।

मणीति मणिकार इत्येकं रत्नशास्त्रवेत्तुर्नाम । अत्रक इति अत्रक सांसारिक इतिद्वे संसारधर्मिणो नाम्नी । प्रोक्त इति संकीर्णचित्त इत्येकं संकुचितचेतसो नाम । हृष्टेति हृष्टपुष्ट इत्येकं पीनस्य नाम । आहत इति आहत इत्येकमाघातापन्नस्य नाम कथ्यत इति नर्मसचिव इत्येकं चाटुवचनपरसहचरस्य नाम । चाटि्विति चाटुकार चर्पट इतिद्वे चाटुकारस्य नाम्नी । कर्क इति कर्क चर्च पितृव्य इतित्रीणि पितृव्यस्य नामानि । पितुः कनिष्ठे कर्क:स्यादितिकल्पद्रुम: । त्रिष्विति अघोर इत्येकमघोरकर्मकर्तुर्नाम । जनक इति जनक पितृ वप्र आवुक इति चत्वारि पितुर्नामानि । वप्र: पितरीतिविश्व:, आवुक: पितृभूपयोरिति मेदिनी । हट्टेति हट्टाध्यक्ष

अधिकर्मिन् इतिद्वे हट्टाध्यक्षस्य नाम्नी । जात्विति जातुकार ऐन्द्रजालिक इतिद्वे जातुकारस्य नाम्नी । स्यादिति परश्रमजीविन् मूलस्ववादिन् इतिद्वे परश्रमजीविनो नाम्नी । उत्तमर्ण इति उतमर्ण ऋणाद साधुकार इतित्रीणि उत्तमर्णस्य नामानि । अध्यक्ष इति अध्यक्ष प्रमुख इतिद्वे प्रमुखस्य नाम्नी । चार इति चार गुप्तचर चर इतित्रीणि चरस्य नामानि ।

| | |
|---|---|
| चपरासी | - आकारकेऽभियुक्तादे: साध्यपालो निगद्यते । |
| काश्तकार | - कृषिक: कृषिकारश्च कृषीवल उदीर्य्यते ॥ 150 ॥ |
| टकसाल का मैंनेजर | - नैष्किकष्टंकशालाया मन्त्रिणि प्रोच्यते बुधै: । |
| फोटोग्राफर | - प्राज्ञैश्छायाचित्रकारे छायाचित्रक उच्यते ॥ 151 ॥ |
| सेयरर | - वार्धुषि। स्याद्वार्धुषिको वृद्ध्याजीव: कुसीदक। । |
| सम्पादक | - तन्त्रि-सम्पादकौ तुल्यौ |
| पण्डा | - देवाजीवस्तु देवल: ॥ 152 ॥ |
| पाकशालाध्यक्ष | - पाकशालापतौ प्राज्ञै: पौरोगव उदीर्य्यते । |
| अजनवी | - स्मृतोऽद्भुतजनोऽज्ञाते |
| अदना | - तुच्छ। पामर उच्यते ॥ 153 ॥ |
| धुनिया | - कार्पासिको भवेत्तूलकर्मकारिणि तौलिक; । |
| वरे | - वारजीवी तथा पर्णकारस्तुल्यार्थकौ स्मृतौ ॥ 154 ॥ |
| दासी | - चेडी चेटी तथा दासी समानार्थत्वमागता। । |
| तमोली | - बुधैस्ताम्बूलिक: प्रोक्तस्ताम्बूलाजीव इत्यपि ॥ 155 ॥ |

आकारक इति साध्यपाल इत्येकं न्यायालये अभियुक्ताद्याकारकस्य नाम । कृषक इति कृषक कृषिकार कृषीवल इतित्रीणि कृषकस्य नामानि । नैष्किक इति नैष्किक इत्येकं टंकशालामन्त्रिणो नाम । प्राज्ञैरिति छायाचित्रक इत्येकं छायाचित्रकर्तुर्नाम । वार्द्धुषिरिति वार्द्धुषि वार्द्धुषिक वृद्ध्याजीव कुसीदक इतिचत्वारि वृद्ध्याजीवस्य नामानि । तन्त्रीति तन्त्रिन् सम्पादक इतिद्वे समाचारपत्रसम्पादकस्य नाम्नी । देवेति देवाजीव देवल इतिद्वे देवाजीवस्य

नाम्नी । पाकेति पौरोगव इत्येकं पाकशालापतेर्नाम । स्मृत इति अद्भुतजन इत्येकं नितान्तमपरिचितस्य नाम । तुच्छ इति तुच्छ पामर इतिद्वे तुच्छस्य नाम्नी । कार्पासिक इति कार्पासिक तौलिक इतिद्वे तूलकर्मकर्तुर्नाम्नी । वारेति वारजीविन् पर्णकार इतिद्वं वारजीविजाति-विशेषस्य नाम्नी । चेडीति चेडी चेटी दासी इति त्रीणि दास्या नामानि । चेडी चेटी च कथितेति द्विरूपकोशः । बुधैरिति ताम्बूलिक ताम्बूलाजीव इतिद्वे ताम्बूलविक्रेतुर्नाम्नी । ताम्बूलिक इति कामसूत्रम् ।

अत्रेदमवधातव्यं जिज्ञासुभिः- अपशब्देष्वपि शक्तिमुरीकुर्वन्ति प्रामाणिकाः, तत एवार्थवत्त्वेन शास्त्रविषयतया प्रातिपदिकत्वेन सुबादिगुत्पाद्य असाधुप्रकृतिकानामपि पदानां साधुत्वसिद्ध्या तैरेव संस्कृत्रिमायामपि व्यवहर्तुं शक्यतया मुधैव तदर्थप्रतिपत्त्यै प्रकृतिप्रत्यययोरुभयोरेव साधुत्वचिन्तया साधुप्रकृतिमार्गणप्रयासः । अतएव यर्वाणस्तर्वाणो नाम ऋषयो बभूवुरिति भाष्यं, दिल्लीश्वरो वेति पण्डितराजोक्तिश्च सामञ्जस्यमाधत्ते । अन्यथा असाधूनां शास्त्राविषयतया रुत्वोत्वादीनामनुपपत्तिर्गले पतेत् । अतएव चासाधूनामप्याधुनिकसंज्ञानां सङ्कल्पादौ प्रयोगं, झा, राय, चौधरीत्याद्युपाधीनाञ्च निर्देशं तारतम्यमनागम्य कलयन्ति कवयः । किञ्च यं धर्मं प्रवृत्तिनिमित्तीकृत्य पाश्चात्यास्तत्तच्छब्दं ब्रुवते, नैव तं धर्मं पुरस्कृत्य वारश्राय-पुरीशादिशब्दा व्यवहर्तुं शक्यन्ते, यथा वारश्रायशब्दे विधिनिषेधाभ्यनुज्ञास्वातन्त्र्यं प्रवृत्तिनिमित्तम्, न तद्धर्मं प्रकारीकृत्य पाश्चात्यै र्वाइसराय इतिशब्दः प्रयुज्यते, केचिदित्थमनन्ति समाघ्राततन्त्रा बन्धवः, तन्नानुमन्तुं क्षमन्ते सूक्ष्मदृश्वानः-न केवलमर्थवत्त्वमेव प्रातिपदिकसंज्ञाशास्त्रोद्देश्यातवच्छेदकम् किन्तु साधुत्वमपि, अन्यथा सर्वेभ्योऽपशब्देभ्यः सुबादयो जायेरन् चेत्का क्षतिस्तावतेत्यभ्युपगम्येत, तदा साधुप्रकृतिकपदप्रयोगो वैयर्थ्यमेव न केवलं किन्तु महागौरवमप्युरीकुर्य्यात् । न खल्विदं स्वीकर्तुमर्हन्ति विचक्षणाः । अस्यां स्थितौ प्रकृतिप्रत्यययोरुभयोः शास्त्रविषयत्वे एव साधुत्वमुत्प्रेक्षितुं युज्यते तदिदं स्पष्टं व्याचष्ट नागेशभट्टो मञ्जूषायाम् । यर्वाणस्तर्वाणो नामेतिभाष्यकोपस्तु न कथञ्चित्संभाव्यते, असाधुप्रकृतिकानामप्यनुकरणानां साधुत्वस्य सर्ववादिभिरेव शिरसा स्वीकृतत्वात् । असाधूनामाधुनिकसंज्ञानान्तु न प्रशस्यते संस्कृते प्रयोगः ।

प्रवृत्तिनिमित्ते वैलक्षण्यन्तु न विप्रीयते सुधीसमुदये, नास्माकमाग्रहः पाश्चात्यानुमतधर्मं प्रकारीकृत्य बोधस्य, किन्तु तत्तदर्थविशेषबोधस्यैव, स च प्रवृत्तिनिमित्तान्तरेणाऽपि सम्भवेदेव । नहि यौगिकेन पाचकादिशब्देन पाचकविशेषोऽवबुध्यते, योगरूढिस्तु वक्तुं न शक्यते शिष्टैस्तदननुमतत्वात् प्रवृत्तिनिमित्तस्यान्यत्राऽपिव्यासक्तौ कथं विशेषबोधो जागर्य्यादिति तु नैवोदीर्य्यं पर्य्याकुलैः, चैत्रमुद्दिश्य पाचको गच्छतीति प्रयुक्ते पाचकविशेषचैत्रबोधस्यानुभविकत्वात्, दृश्यते च घटमानयेत्यादौ सामान्यधर्मेण विशेषबोधः, अन्यथा अनन्वयापत्तेः । तथापि चेदेवमुच्यते-अनुकार्य्यस्यासाधुत्वेपि असाधुशब्दानुकरणस्य साधुत्व-सम्भवेन वाइसराय इत्याख्यराजपुरुषो मोटर इत्याख्ययानमेवमादिभिरेवोपपत्तौ पुनस्तदर्थकसाधुशब्दमार्गणप्रयासो विचेष्टैव । हन्त ! कोऽयमनुग्रहोऽपभ्रंशे, साधुशब्देषु जृम्भमाणेषु वाइसराय इत्याख्यराजपुरुष इत्यादिवाक्यप्रयोगे कीदृशं लाघवमपशब्दप्रियैरनुभूयेत कथं वा वाग्देव्यास्तदर्थप्रत्यायनासामर्थ्यं सोढुमिष्येत ।

आर्याणां धर्मस्येव भाषाया अप्ययं स्वभावो यत्साङ्कर्य्यं न सहते, तथात्वे तदीयात्मैव विलीयेत । अतएवाद्यत्वेऽपि हिन्दवो गीर्वाणगिरो वा स्वस्मिन्नधिस्वरूपं निषीदन्ति तत्र चेदपशब्दा विशेयुः संस्कृतजगदेव सङ्कटे घटेत । न खलु देववाणी केवलमर्थमेवाभिधत्ते किन्तु सार्द्धं धर्ममपि प्रसाधयति । तदेतदुक्तं भगवता पतंजलिना "समानायामर्थावगतौ शब्देनापशब्देन च, तत्र धर्मनियमः क्रियते शब्देनैवार्थोऽभिधेयो नापशब्देन, एवं क्रियमाणमभ्युदयकारि भवति", एवमादिकं पर्य्यालोच्य अपशब्दवाच्यवस्तुवाचकसाधुशब्दान्वेषणमतीवावश्यकं प्रतीयते, वैदेशिक-शासके तदीयपभाषया शासनतन्त्रस्य संचालनीयतया स्वातन्त्र्येऽपि तद्भाषाया. प्राधान्येन शनैः संस्कृते सा निगूहेत, चेत्तद्वाच्यावाचकसाधुशब्दो नोपलभ्येत । अथापि ये केचिद्दुराग्रहणन्ति राजपुरुष - यान - यन्त्रादिसामान्यधर्मावच्छिन्नवाचकशब्दैरेव तत्तदर्थविशेषःप्रकरणादिपारवश्यमनु भूयाभिधास्यते पुनरपि वैयर्थ्यमापद्यते साधुशब्दान्तरान्वेषणप्रयास इति ते न विश्रम्भन्ते । प्रायः अपशब्दानां यत्किञ्चिदानुपूर्वीसाम्यमावहन्ति पदानि यथा झटिति विशेषनर्थमभिदधते व्यवहारैश्च सम्पादकादिशब्दवत् रूढ़िमिव

'कलयन्ति, न तथा राजपुरुषादिपदानि तस्य सर्वसाधरण्येन प्रयोगस्य भवद्भिरप्यभ्युपेतत्वात् तदिदं सर्वानुभवानामपरोक्षमेव । पर्य्यन्ते तदिदं पर्य्यवस्यति साधुपदसमुदाये असाधुप्रयोगे नूनं विप्रसभायां चण्डालदर्शनमिवोद्वेजयिष्यत्येव सहृदयानां हृदयानि । हन्त ! देववाचं राष्ट्रभाषीचिकीर्षयाऽपशब्दं प्रयुञ्जानाः स्वामिनः पाटच्चरैरिवापशब्दैर्देववचसः सर्वस्वमेव लुण्ठन्ति, चेदपशब्देभ्योऽपि वैदेशिकेभ्यः प्रत्ययमुत्पाद्य संस्कृते प्रयुञ्जीमहि तदा किमपराद्धं स्वदेशीयापशब्दैर्येन तान् नैव संगृह्णीयाम, इत्यपशब्दसुहृदा हृदये स्वयमेव परामर्ष्टव्यम् । इदानीं यत्पण्डितैः क्वचिदपशब्दः प्रयुज्यते तत्पारवश्यदुश्चेष्टयैव तत्पारवश्यमपाकर्तुमेवायं प्रयासः प्रदीपकृतामिति तदीयेन चिन्तामित्यादिपद्येनावसातुं शक्यते ।

मामा - मामको मातुलस्तुल्यौ

लड़का - लाड़ीको दारकः स्मृतः ।

चरवाह - चारकश्चारवाहः स्यात्

चङ्गा - चङ्गः शोभन उच्यते ॥ 156 ॥

गुण्डा (मवाली)- गुण्डको मलिनाचारे

हुड्ड - हुडुक्को मत्तसंभिदि ।

मलाह (गोढ़ि) - कैवर्तो जालिको गोण्डो जातिभेदे निगद्यते ॥ 157 ॥

इति नरवर्गः

मामक इति, मामक मातुल इतिद्वे मातृभ्रातुर्नाम्नी । मामको मातुल इति मेदिनी । लाडीक इति लाडीक दारक इतिद्वे पुत्रस्य नाम्नी । चारक इति चारक चारवाह इतिद्वे अश्वादेः पालनकर्तुर्नाम्नी । चारणं चारस्तं वहतीति चारवाहः । चारक इति मेदिनी । चंग इति चंग इत्येकं शोभनस्य नाम । चंगस्तु शोभने इति मेदिनी । गुण्डक इति गुण्डक इत्येकं कुत्सिताचारकर्तुर्नाम । हुडुक्क इति हुडुक्क इत्येकं मत्तवत्कार्य्यकर्तुर्नाम । हुडुक्को मत्त इति मेदिनी । कैवर्त्त इति कैवर्त जालिक गोण्ड इतित्रीणि पामरजातिभेदस्य नामानि । गोण्डः पामरजाताविति मेदिनी ।

## ॥ अथ यन्त्रयानवर्गः ॥

काल (मशीन)- यन्त्रमेकं तु तद्भेदा बहुधा परिकीर्तिताः ।

स्वयं वाहकमेकं स्यात् सत्कृत्प्रेर्यं तथाऽपरम् ॥ 158 ॥

अन्यदन्तरितं वाह्यवाह्यमन्यत्त्वदूरत. ।

कूकर - पाकयन्त्रे बुधैरिष्टौ पाकूको बाष्पपाचकः ॥ 159 ॥

स्टोभ (प्राइमेस)- बाष्पान्तिका बुधैः प्रोक्ता

कांटा - नाराच्येषणिका समे ।

चाभी (कुन्जी) - कुञ्जी स्यात्कुञ्जिका ताली प्रतिताली च तालिका ॥ 160 ॥

ताला - तालकं द्वारयन्त्रं स्यात्

घिरनी (जलकी)- स्त्रियां नेमिस्तथाऽत्रिका ।

खुर्दवीन - अणुवीक्षणमर्थज्ञैरुच्यते क्षुद्रवीक्षणम् ॥ 161 ॥

घड़ी - घटीयन्त्रे घटी नालीं यामनाली स्त्रियां भवेत् ।

यामघोषा तथा कालदर्शिका तत्र कथ्यते ॥ 162 ॥

यन्त्रगिति यन्त्र इत्येकं यन्त्रस्य नाम । यन्त्रस्य चत्वारो भेदाः-समरांगणसूत्रधारे भोजराजेन प्रदर्शिताः, तांश्च तन्त्रोक्तेनाविकलेन पद्येन प्रदर्शयति-स्वयंवाहकमित्यादि । यत् स्वयं न तु वाहकान्तरमपेक्षते यथा तडिद्यन्त्रम्, तत् स्वयंवाहकमुच्यते, यत् सकृदेव प्रेरणामपेक्ष्य चलति तत्सकृत्प्रेर्यं कथ्यते यथा मृत्तरादि । यत् अन्तराऽन्तरा परस्य प्रेरणामपेक्ष्य चलति तत् अन्तरितं निगद्यते यथा उद्घातगन्त्र्यादि । यत् वाह्येन वाह्यते तत् वाह्यवाह्यं कथ्यते यथा अश्वगन्त्र्यादि, यन्त्रस्य बहूनां भेदानां सत्त्वेऽप्यत्र संक्षिप्य सामान्यरूप-भेदा दर्शिताः । ननु यन्त्रवर्गे सर्वेषामेव यन्त्राणां कथनमुचितम् तत्कथं कतिपयानामेव तेषां यन्त्रवर्गे निर्देश इतिचेन्न तथात्वेपि जिज्ञासुसौविध्याय व्याप्यधर्मिणो वर्गे समुल्लेखात् । भवेदिति चालकयन्त्र अंजोनय अजोनयन ईजन इति चत्वारि चालकयन्त्रस्य नामानि । अंजसा नयतीत्यञ्जोनयः पचादित्वादच् अञ्जः सम्यक् नयो येनेति वा, नीयतेऽनेनेति

करणेल्युटि अंजोनयनम् । ईजयतीत्यनेनेति विग्रहे उत्तरदेशसंयोगावच्छिन्नव्यापारवाचकधातु - प्रकृतिकण्यन्तादीजयते: करणे ल्युटि ईजनम् । पाकेति पाकूक वाष्पपाचक इतिद्वे वाष्पवाचकस्य नाम्नी । पाकूक इति शब्दकल्पद्रुम: । वाष्पेति वाष्पान्तिका इत्येकं वाष्पचुल्लेर्नाम । नाराचीति नाराची एषणिका इतिद्वे नाराच्या नाम्नी । कुञ्चीति कुञ्ची कुञ्चिका ताली प्रतिताली तालिका इति पञ्च तालिकाया नामानि । अस्योद्घाटनयन्त्रे तु ताल्यपि प्रतिताल्यपीत्यभिधानचिन्तामणि: । तालकमिति तालक द्वारयन्त्र इति इतिद्वे द्वारपिधानयन्त्रस्य नाम्नी ।

स्त्रियामिति नेमि अत्रिका इतिद्वे नेमेर्नाम्नी । अण्विति अणुवीक्षण क्षुद्रवीक्षण इतिद्वं क्षुद्रवीक्षणस्य नाम्नी । घटीति घटीयन्त्र घटी नाली यामनाली यामघोषा कालदर्शिका इति घटीयन्त्रस्य नामानि, नाली यामघोषा इति शब्दकल्पद्रुम: । घटीयन्त्रं यथा मर्त्या भ्रमन्ति मम मायया इति गरुडपुराणम् ।

दीवार घड़ी - भित्तिनाली तथा कुड्यघटी विद्वद्भिरिष्यते ।
हाथ घडी - प्रकोष्ठघटिका हस्तघटिका सदृशे स्मृते ॥ 163 ॥
विजली घड़ी - प्रोच्यते कविमूर्द्धन्यै विंद्युन्नाली तडिद्घटी ।
चश्मा - उपनेत्रे तु चक्षुष्कं सीसकाक्षञ्च नेत्रकम् ॥ 164 ॥
टार्च लाइट - त्वरार्चिरायितं विद्युद्दीपिका हस्तवर्त्तिका ।
टेली प्रिण्टर - वार्त्तामुद्रकयन्त्रे तु तडिन्मुद्रकमिष्यते ॥ 165 ॥
टेलीफोन - त्वरितादिभणे प्रोक्तौ तिरोभणतडिद्भणौ ।
तैल यन्त्र - पराङ्गस्तैलयन्त्रं स्यात्
टीप - स्नेहवस्ति: स्त्रियां भवेत् ॥ 166 ॥

भित्तीति भित्तिनाली कुड्यघटी इतिद्वे कुड्यस्थनाल्या नाम्नी । प्रकोष्ठेति प्रकोष्ठघटिका हस्तघटिका इतिद्वे हस्तबद्धघट्या नाम्नी । क्षुद्रा घटी घटिका प्रकोष्ठस्य सेत्यर्थ: । प्रोच्यते इति विद्युन्नाली तडिद्घटी इतिद्वे विद्युच्चालितनाल्या नाम्नी । उपेति उपनेत्र चक्षुष्क सीसकाक्ष नेत्रक

इति चत्वारि उपनेत्रस्य नामानि । चक्षुरिव चक्षुष्कम्, एतेन नेत्रकमपि विवृतम् । त्वरेति विद्युद्दीपिका हस्तवर्तिका त्वरार्चिरायित इतिहस्तधार्य्य दीपिकाया नाम्नी । वार्तेति तडिन्मुद्रक इत्येकं वार्तामुद्रणतडिद्यन्त्रस्य नाम । त्वरितादीति तिरोभण तडिद्भण त्वरितंभण इतित्रीणि त्वरितभणयन्त्रस्य नामानि । तिरः अन्तर्धानेन भणतीति तिरोभणः भणतीति भणः पचाद्यच्त्वादच् तडिता भण इति तडिद्भणः त्वरितंभणतीति त्वरिद्भणः । पराञ्जइति पराञ्ज तैलयन्त्र इतिद्वे तैलयन्त्रस्य नाम्नी । स्नेहेति स्नेहप्रस्ति इत्येकं स्नेहप्रवाहकयन्त्रविशेषस्य नाम ।

इञ्जन - भवेच्चालकयन्त्रेऽञ्जोनयाञ्जोनयनेञ्जनम् ।

तेकटी - त्रिकाष्ठी तु त्रिकाण्डी स्यात्

तराजू - मानदण्डे तुला स्मृता ॥ 167 ॥

नल (पाइप) - नलिका जलवाहिन्यां तथा पानीयपः स्मृतः ।

तकली - तर्कुटी सूत्रला तर्कूः

दाँत कुतरनी - अथ स्याद्दन्तशोधिनी ॥ 168 ॥

तत्रैव कैश्चिद्विद्वद्भिः कथ्यते दन्तसूचिका ।

फुहारा - विन्दुपातकयन्त्रे तु कथ्यते विन्दुपातिनी ॥ 169 ॥

पम्प - पवनापः कवीन्द्रेण वायुपूर उदीर्य्यते ।

थर्मामीटर - घर्ममात्री भवेद्धर्मामितरो ज्वरमापकः ॥ 170 ॥

बुधैः कतिपयैस्तत्र तापमात्री निगद्यते ।

लाउडस्पीकर - स्याद्ध्वनिक्षेपणी यत्र तत्रैव ध्वनिवर्द्धिनी ॥ 171 ॥

लिफ्ट - उत्थानपिञ्जरं विद्युत्पिञ्जरं परिकीर्त्यते ।

भवेदेति चालकयन्त्र अञ्जोनय अञ्जोनय ईजन इति चत्वारि चालकयन्त्रस्य नामानि । अञ्जसा नयतीति अञ्जोनयः पचादित्यादच्, अञ्जः सम्यक् नयनं येनेति वा, नीयतेऽनेनेति नयनम् अञ्जसा तत् (सम्पृक्तां) करोतीतिधात्यर्थे णिचि इष्ठवद्भावे टिलोपे पुनः क्विपि णिलोपे अञ्जः,

तस्य च निरुक्त एवार्थः पर्य्यवस्यति । एतेन अंजसेत्याकारान्तमव्ययम् इत्युक्तमसमञ्जसमिति परास्तम् । एवमेव अञ्जोनिर्मेयर इति शब्देऽपि बोध्यम् त्रिकाष्ठीति त्रिकाष्ठी त्रिकाण्डी इतिद्वे त्रिकाष्ठ्या नाम्नी । मानेति तुला इत्येकं मानदण्डविशेषस्य नाम । नलिकेति, नलिका जलवाहिनी पानीयप इति त्रीणि जलवाहियन्त्रभेदस्य नामानि । तर्कुटीति तर्कुटी सूत्रला तर्कू इतित्रीणि तर्कुट्या नामानि । तर्कुटी सूत्रला तर्कूरिति हारावली । अथेति दन्तशोधिनी दन्तसूचिका इतिद्वे दन्तसूच्या नाम्नी । विन्द्विति विन्दुपातिनी इत्येकं विन्दुपातकयन्त्रस्य नाम । पवनाप इति पवनाप वायुपूर इतिद्वे पवनपूरकयन्त्रस्य नाम्नी । पवनमापयति प्रापयतीति पवनापः । घर्मेति घर्ममात्री घर्मामितर ज्वरमापक तापमात्री इति चत्वारि तापमात्र्या नामानि । घर्मस्य शीतोष्णतादिरूपस्य आ समन्तान्मितं मानं राति गृह्णातीति घर्मामितरः । स्यादिति ध्वनिक्षेपणी ध्वनिवर्द्धनी इतिद्वे ध्वनिक्षेपकयन्त्रस्य नाम्नी । उत्थानेति विद्युत्पिञ्जर उत्थानपिञ्जर इतिद्वे विद्युत्पिञ्जरस्य नाम्नी ।

दमकल - भवेद्दमकलः पुंसि वह्निनिर्वापणी स्त्रियाम् ।। 172 ।।

दुरबीन - दूरवीक्षणमाख्यातं दूरं येन निरीक्ष्यते ।

पेंच - पर्य्यंचो भ्रामणी प्रत्यावर्त्तनी च निगद्यते ।। 173 ।।

पुर्जा - यन्त्रावयव इत्येष स्मृताऽवयविका बुधैः ।

वेतार का तार - अतन्त्रीतडिदाख्याता विना सूत्रं तडित्स्पृशि ।। 174 ।।

करघा - वाययन्त्रं भवेत् क्लीबे

केमरा - छायाचित्रकमुच्यते ।

लालटेन - प्रच्छन्नदीपो दीपद्युत् दीपसीसकमिष्यते ।। 175 ।।

मेट्रोलाइट - वाष्पप्रदीपकं प्राज्ञै र्वाष्पवर्ति र्निगद्यते ।

एक्सरे - अंतश्चित्रकमेकं स्यात् येनान्तश्चित्र्यते तनोः ।। 176 ।।

केरियर - वाहकं वाहनी तुल्ये

टंकी - पर्णासः पुंसि कथ्यते ।

औजार - अवयन्त्रं भवेद्यान्त्री यन्त्रोपरकणं तथा ।। 177 ।।

भवेदिति दमकल वह्निनिर्वापणी इतिद्वे वह्निनिर्वापकयन्त्रविशेषस्य नाम्नी । दमनं दमः वह्निर्निर्वापणम् तत्कलयतीति विग्रहः । दूरेति दूरवीक्षण इत्येकं दूरवीक्षकयन्त्रस्य नाम । पर्य्यञ्च इति पर्य्यंच भ्रामणी प्रप्यावर्त्तनी इतित्रीणि प्रत्यावर्त्तकयंत्रस्य नामानि । परितः अञ्चति गच्छतीति पर्य्यञ्चः । यन्त्रेति यन्त्रावयव अवयविका इतिद्वे यन्त्रावयवस्य नाम्नी । अतन्त्रीति अतन्त्रीतडित् विना सूत्रसम्बंधं शब्दग्राहकतडिद्यन्त्रविशेषस्य नाम । वायेति वाययन्त्र इत्येकं वयनयन्त्रस्य नाम । छायेति छायान्त्रिक इत्येकं छायाचित्रणयन्त्रस्य नाम । प्रच्छन्नेति प्रच्छन्नदीप दोपद्युत् दीपशलाक इतित्रीणि दीपकविशेषस्य नामानि । वाष्पेति वाष्पप्रदीपक वाष्पवर्त्ति इतिद्व वाष्पद्वारा ज्वलनशीलदीपस्य नाम । अन्तारिति अन्तश्चित्रक इत्येकमन्तरङ्गचित्रणकर्तुर्नाम । वाहक इति वाहक वाहनी इति वाहनयन्त्रस्य नाम्नी । पर्णास इति पर्णास इत्येकं जलाधारयन्त्रस्य नाम । अवेति अवयन्त्र यान्त्री यन्त्रोपरण इतित्रीणि यन्त्रोपकरणस्य नामानि । अवयन्त्र इत्यत्र मूलं मृग्यम्, यन्त्रस्येयं यान्त्री ।

| | | |
|---|---|---|
| थरमस | - | शीतोष्णं यः स्थिरीकुर्यात् स्थिरमर्षः स उच्यते । |
| इस्त्री | - | वस्त्रसाधके यन्त्रे स्यादूर्मित्रोर्मिहारिणी ॥ 178 ॥ |
| वनसी | - | मीनग्राहकयन्त्रे तु वडिशं कथ्यते बुधैः । |
| रेडियो | - | रवक्रियो भवेद्वायुयन्त्रं वाग्यन्त्रमित्यपि ॥ 179 ॥ |
| रिकाड | - | रवकाद्रो बुधैः पुंसि रक्षिताराव उच्यते । |
| मुहर | - | प्रत्यायनी तु मुद्रायां तथा प्रत्ययकारिणी ॥ 180 ॥ |
| हंडी | - | हडिर्बन्धन-यन्त्रे स्यात् |

अथ यानं निगद्यते ।

| | | |
|---|---|---|
| सवारी | - | वाहने युग्ययाने स्तः |
| रथ | - | स्यन्दनो रथ उच्यते ॥ 181 ॥ |
| गाडी | - | शकटं गाडिका गाडी गन्त्री गान्त्री स्त्रियां स्मृताः । |
| छकडा | - | शकटे लघुकाये तु प्राज्ञैः शकटिकोच्यते ॥ 182 ॥ |

ट्रेन - त्वरेनो धूमशकटं पट्टिकायानमुच्यते ।

धूमयानं तथा धूम्रयानं कैश्चिदुदीर्य्यते ।। 183 ।।

शीतोष्णमिति स्थिरमर्ष इत्येकं शीतोष्णस्थिरीकरणयन्त्रविशेषस्य नाम । स्थिरं स्थिरतां (धर्मप्रधाननिर्देश:) मर्षयति सहते इति स्थिरमर्ष: । वस्त्रेति ऊर्मित्रा ऊर्मिहारिणी इतिद्वे वस्त्रसङ्कोचरेखापहारकयन्त्रविशेषस्य नाम । ऊर्मेस्त्रायते इति ऊर्मित्र: । उर्मिर्वस्त्रसङ्कोचरेखायामिति मेदिनी । मीनेति वडिश इत्येकं मीनग्राहकयन्त्रस्य नाम, वडिशमिति शब्दकल्पद्रुम: । रवेति रवक्रिय वायुयन्त्र वाग्यन्त्र इति त्रीणि वायुयन्त्रस्य नामानि । रव: शब्द एव क्रिया यस्यासौ रवक्रिय: । रवकाद्र इति रवकाद्र रक्षिताराव इतिद्वे यथागृहीतशब्दनिष्कासनयन्त्रभेदस्य नाम्नी । रव एव रवक: शब्द इतितदर्थ: तस्मै आ समन्तात् द्राति भ्राम्यति इति रवकाद्र: । गमने तिर्य्यक्त्वमेवात्र कुत्सितत्वं बोध्यम् । रक्षितं स्वान्तर्निधापितशब्दमारौतीति रक्षिताराव: । प्रत्यायनीति प्रत्यायनी मुद्रा प्रत्ययकारिणी इतित्रीणि मुद्राया नामानि । प्रत्ययकारिणीति शब्दकल्पद्रुम:। हडिरिति हडि इत्येकं बन्धनकाष्ठस्य नाम । हडि: काष्ठस्य यन्त्रणं इति शब्दमाला । वाहन इति वाहन युग्य यान इतित्रीणि वाहनसामान्यस्य नामानि । स्यन्दन इति स्यन्दन रथ इतिद्वे रथस्य नाम्नी । शकटमिति शकट गाडिका गाडी गन्त्री गान्त्री इति पञ्च गाडिकाया नामानि, शकटादय: सर्वे शब्दकल्पद्रुमे उक्ता: । शकटे इति शकटिका इत्येकं क्षुद्रशकटस्य नाम । त्वरेन इति त्वरेन घूमशकट पट्टिकायान घूमयान इति पंच धूमशकटस्य नामानि । त्वरया एति गच्छतीति त्वरेन:, इणसिञ्जीत्यादिना एतेरौणादिको नक् ।

पसिंजर ट्रेन - पान्थादिकस्त्वरेनादि: सर्वस्तुल्यार्थक: स्मृत: ।

मेलट्रेन - मेलपूर्वस्त्वरेनादिस्तुल्यार्थत्वेन भाषित: ।। 184 ।।

एलेक्ट्रिक गाड़ी - तडिद्गन्त्री तथा विद्युत्त्वरेन: परिकीर्त्यते ।

स्पेशलटेन - ईशप्रैषलशब्दादिस्त्वरेनादि: समार्थक: ।। 185 ।।

स्वाधीनगन्त्री तत्रैव नामान्यदपि कल्प्यते ।

मालगाडी - गन्त्री गान्त्र्यौ तु मालादी समार्थत्वेन भाषिते ।। 186 ।।

ट्राली - बुधैरुद्घातगन्त्री तु यानभेदे निगद्यते ।

रिक्सा - द्राक्सारिका तु द्राक्सा स्त्री वक्षोवाह्या निगद्यते ।। 187 ।।

एक्का - एकश्विका द्विवेशा च लघ्वी स्यात्क्षुद्रवाहने ।

टमटम - एकाश्वा विबुधैरश्वयानभेदे निगद्यते ।। 188 ।।

पान्थेति पान्थत्वरेन पान्थधूमशकट एवमादीनि पञ्च यात्र्यारूढधूमशकटस्य नामानि । अत्र पान्थपदं स्वपर्य्यायस्याप्युपलक्षकम् पान्थादिक इत्यस्य पान्थपूर्वक इत्यर्थः । त्वरेनादिः त्वरेनप्रभृतयः शब्दा इति तदर्थः । मेलेति मिलति विश्रमस्थाने स्वजातीयेन सम्बध्नाति, मेलयति गन्तव्यं स्थानं पथिकान् प्रापयतीति वा मेलः, स चासौ त्वरेनः । एवमन्यत्राऽपि बोध्यम् । तथाच मेलत्वरेन मेलधूमशकट एवमादीनि पञ्च मेलधूमयानस्य नामानि । अत्र मेलगन्त्रीत्यादिकमप्यूह्यम् । तडिद्गन्त्रीति तडिद्गन्त्री विद्युत्त्वरेन इतिद्वे विद्युच्चालितगन्त्र्या नाम्नी । ईशेति ईशप्रैपलत्वरेन ईशप्रैषलधूमशकट एवमादीनि पञ्च ईशप्रैषलधूमयानस्य नामानि । ईशस्य स्वेशितुरारोहिविशेषस्य प्रै[illegible]रणां लाति गृह्णातीति इशप्रैषलः स चासौ त्वरेन इति, तादृशार्थे स्वा[illegible]धीनगन्त्रीत्यपि बोध्यम् । नामान्यदिति इदञ्च सर्वत्रैव पान्थादिक इत्यादिपद्ये [illegible]ज्यम्, तावता जनगन्त्र्यादेरपि कवितात्पर्य्यविषयत्वं गम्यते । गन्त्रीति मालगन्त्री मालगान्त्री इतिद्वे भाण्डाद्याहारकगन्त्र्या नाम्नी, मलनं मालः धारणमिति तदर्थः, मल धारणे इतिभ्वादिः । तस्य गन्त्रीत्यर्थः । अत्र मालगाडीत्याद्यपि बोध्यम् । बुधैरिति उद्घातगन्त्री इत्येकं पुरुषवाह्यपट्टिकायान भेदस्य नाम । द्रागिति द्राक्सारिका द्राक्सा वक्षोवाह्या इतित्रीणि नरवक्षोवाह्यक्षुद्रयानस्य नामानि । दाक् शीघ्रं सारयति प्रापयतीति द्राक्सारिका । द्राक् साति मार्गं गत्वा विभागेन खण्डयतीति कर्त्तरि क्विपि द्रक्सा । एकेति एकाश्विका द्विवेशा लघ्वी इतित्रीणि [illegible]श्वयानभेदस्य नाम्नी । द्विवेशा इति शब्दकल्पद्रुमः 'लघ्वी प्रभेदे स्यन्दस्य' मेदिनी । एकाश्वेति एका[illegible] इत्येकं यानभेदस्य नाम ।

टाङ्गा - तंगा त्वङ्गा त्रिवेशा स्त्री भाटी तुल्याः प्रकीर्तिताः ।

घोड़ा गाड़ी - अश्वादिपूर्वको गन्त्रीपदान्तः समवाचकः ।। 189 ।।

जोड़ी - स्यादश्वयुगिका याने घोटकद्वयचालिते ।

सिकरम - अश्वगन्त्रीविशेषे तु बुधैः क्षिप्रगमः स्मृतः ।। 190 ।।

ट्राम्बे - स्यात्तडिद्गन्त्रिका यत्र त्वरामस्तत्र कथ्यते ।

मोटर - कारो मरुत्तरः कारयानं मृत्तर उच्यते ।। 191 ।।

जल मोटर - जलपूर्वस्तु कारादिर्यानभेदे निगद्यते ।

मृत्तरेति न तस्यान्ते प्रयुञ्जीत विचक्षणः ।। 192 ।।

बस - वासयानं भवेद्वासो महामृत्तर ईरितः ।

साइकल - स्याद्वायसकलं साध्यकीलं सायकलं तथा ।। 193 ।।

तत्रैवायसकीलं च पादयानं निगद्यते ।

मोटरसाईकिल- स्याद्वायसकलाद्यन्तः काराद्यादिः समार्थकः ।। 194 ।।

तङ्गेति तङ्गा त्वंगा त्रिवेशा भाटी इति चत्वारि अश्वयानभेदस्य नामानि। तङ्गति गच्छति अनया तंगा, खनो घ चेति करणे घः एवं त्वगेत्यत्रापि बोध्यम्। भाटीति शिष्टव्यवहारः। अश्वादीति अश्वगन्त्री अश्वगाडिका एवमादीनि पञ्च अश्वचालितगन्त्र्या नामानि । अश्वेति क्षिप्रगम इत्येकमश्वगन्त्रीविशेषस्य नाम । गमनं गमः, क्षिप्रं गमो येन स क्षिप्रगमः स्यादिति तडिद्गन्त्रिका त्वराम इत्तिद्वे तडिद्गन्त्र्या नाम्नी । त्वरया अमति गच्छतीति त्वरामः । कार इति कार मरुत्तर कारयान मृत्तर इति चत्वारि मरुद्वाह्ययानभेदस्य नामानि, करस्यायं कारः इदमर्थोऽत्र वाह्यरूपः । मरुता वायुना तरति धावतीति मरुत्तरः, मरुदेव तरः तरणोपायो यस्येति वा। मृत्तर इत्याधुनिकव्यवहारः । जलेति जलकार जलमरुत्तर इतिद्वे जलीयकारयानस्य नाम्नी । वासेति वासयान वास महामृत्तर इतित्रीणि वसाख्ययानस्य नामानि । वसति उपविशति अस्मिन्निति वासः अधिकरणे घञ्, तदेव यानमितिवासयानम् एतेन वासोऽपि व्याख्यातः । स्यादिति वायसकल साध्यकील सायकल आयसकील पादयान इति पंच साध्यकीलस्य नामानि । वायसी वयःसम्बन्धिनी उड्डयनरूपा कला यस्य तत् वायसकलम् ।

साध्यानि निष्कासन-प्रवेश योग्यानि कीलानि शङ्कवो यत्र तत् साध्यकीलम् गमनम् अयनमय: तस्य कला अयकला तया सहितं सायकलम् गमनकलाविशिष्टमित्यर्थ: । आयसानि लौहमयानि कीलानि यत्र तदायसकीलम् । स्यादिति कारवायसकल कारसायकल इत्यादि मृत्तरपादयानस्य नाम ।

जहाज - वोहित्थं जलयानञ्च जलाज: पोत उच्यते ।

नैया - तरिस्तरणिनौके स्यु:

डोगी - भेल: स्यादुडुपं प्लव: ॥ 195 ॥

वेड़ा - वेडा वेडी समानार्थे विद्वद्भि: परिकीर्त्यते ।

एरोप्लेन - व्योमयानं विमानोऽस्त्री तद्भेदे पुष्पकं भवेत् ॥ 196 ॥

घोड़ी - अश्वा तु वडवा प्रोक्ता

टट्टू - स्थौरी पृष्ठ्य: समार्थकौ ।

खरखरिया - शिबिका यानभेदे स्यात्

पालकी - पल्यङ्की तत्प्रभेदकं ॥ 197 ॥

याप्ययानश्च तत्रैव

डोली - दोलिका स्यात्तु डोलिका ।

खटोली - खट्विका चाऽपि डोला च कविभि: परिकीर्त्यते ॥ 198 ॥

॥ इति यन्त्रयानवर्ग: ॥

वोहित्थमिति वोहित्थ जलयान जलाज पोत इति चत्वारि पोतस्य नामानि । अजति गच्छति अनेन इत्याज: बाहुलकात्करणे घञ् । जलस्याज इति जलाज: । नौका तरणि तरि इतित्रीणि तरेर्नामानि । प्लव इति भेल प्लव उडुप इतित्रीणि उडुपस्य नाम्नी, भेल: प्लव इति मेदिनी । वेडेति वेडा वेडी जलोत्तरणसाधनयानभेदस्य नाम्नी । वेडा वेडीतिद्विरूपकोश: । व्योमेति व्योमयान विमान इतिद्वे आकाशयानस्य नाम्नी, तद्भेदे पुष्पकम् इत्युच्यते, विमानस्य बहुधा भेदास्तन्निर्माणप्रकाराश्च वेदे समराङ्गणसूत्रधारे

च प्रदर्शिता:, जिज्ञासुभिस्तत एवाधातव्यम् । अश्वेति अश्वा वडवा इतिद्वे अश्वाया नाम्नी । स्थौरिति स्थौरिन् पृष्ठ्य इति यात्रायोग्याश्वस्य नाम्नी । शिबिकेति शिविका इत्येकं नरस्कन्धवाह्ययानभेदस्य नाम । पाल्यङ्कीति पाल्यङ्की याप्ययान इतिद्वे पाल्यङ्क्या नाम्नी । दोलिकेत दोलिका डोलिका इतिद्वे लघुदोलाया नाम्नी । खट्विकेति खट्विका दोला इतिद्वे खट्विकाया नाम्नी ।

## ।। अथ शास्त्रास्त्रवर्ग: ।।

तोप - स्याद्बृहन्नालिकस्तोप: शतघ्नी तोपकं तथा ।

मशीनगन - स्याद्यन्त्रहननो यन्त्रबन्धूकं यन्त्रतोपकम् ।। 199 ।।

तत्र यन्त्रगण: प्राज्ञैश्चक्रास्त्रं च निगद्यते ।

बन्दूक - बन्धूकं नालिकं नालं समार्थत्वेन भाषितम् ।। 200 ।।

राइफल - रिंगल्फलं नालभेदे रिंगत्फलकमुच्यते ।

रिवाल्वर - रिंगन्नालवरो रिंगन्नालिकं घूर्णनालिकम् ।। 201 ।।

पिस्तौल - लघुनाले तु विद्वद्भिर्लघुनालिकमुच्यते ।

टैंक - टंकयानन्तु टंक: स्यात्

बख्तर गाडी - शतांगो यानसंभिदि ।। 202 ।।

सबमेरीन - मत्स्ययन्त्रे भवेत्सर्वमारीणो मग्नमारिणी ।

सुरंग - निगूढस्फोटकं गूढस्फोटकं कथ्यते बुधै: ।। 203 ।।

स्यादिति बृहन्नालिक तोप शतघ्नी तोपक इति चत्वारि बृहन्नालिकस्य नामानि । बृहन्नालिकसंज्ञं तत् काष्ठबुध्नविनिर्मितम्, प्रवाह्यं शकटाद्यैस्तु सुयुक्तं विजयप्रदमिति शुक्रनीति: । शतघ्नी शस्त्रभेदे इति मेदिनी । तोपति हिंसते पचादित्वादच् तोप:, हिंसार्थेषु दण्डकपठितो भ्वादिगणीयस्तुपधातु: । स्यादिति यन्त्रहनन यन्त्रबन्धूक यन्त्रतोपक यन्त्रगण चक्रास्त्र इति पंच चक्रास्त्रस्य नामानि । हन्यतेऽनेनेति हनन: यन्त्रात्मक: स यन्त्रहनन: । बन्धूकमिति बन्धूक नालिक नाल इतित्रीणि बन्धूकस्य नामानि, बन्धूकमिति

शब्दकल्पद्रुमः, नालिकं द्विविधं प्रोक्तं बृहत्क्षुद्रविभेदत इति शुक्रनीतिः । तिर्य्यगूर्ध्वच्छिन्नमूलं नालं पंचवितस्तिकमिति शुक्रनीतिः । रिङ्गदिति रिंगत्फल रिंगत्फलक इतिद्वे दूरघ्ननालिकयन्त्रविशेषस्य नाम्नी । रिंगदेव फलति गोलकं प्रेरयतीति रिंगत्फलम्, रिंगत् भ्राम्यत् फलकं यत्र तत् रिङ्गत्फलकम् । रिगन्नालवर इति रिङ्गन्नालवर रिङ्गन्नालिक घूर्णनालिक इतित्रीणि रिङ्गन्नालवस्य नामानि । रिङ्गश्चासौ नालवर इति रिङ्गन्नालवरः, घूर्णस्य नालिकं घूर्णसम्बन्धीतितदर्थः । लघ्विति लघुनाल लघुनालिक इतिद्वे लघुनालिकस्य नाम्नी । लघुनालिकमप्येतत्प्रधार्य पत्तिसादिभिरितिशुक्रनीतिः । सीसस्य लघुनालार्थे इति शुक्रनीतिः । टङ्केति टङ्कयान टङ्क इतिद्वे टङ्कयानस्य नाम्नी । टं तदात्मकं शब्दं कायतीति टङ्क आतोऽनुपसर्गे इति कः । टंकयति स्वावयवभेदिपरकीयास्त्रं निरुणद्धीति टंकः टकि बन्धने चुरादिः । शताङ्ग इति शताङ्ग इत्येकं युद्धार्थयानभेदस्य नाम । शताङ्ग इत्यमरसिंहः । मत्स्येति मत्स्ययन्त्र सर्वमारीण भग्नमारिणी इतित्रीणि मत्स्याकारयन्त्रस्य नामानि । सर्वमारयितुं शीलमस्येति सर्वमारी तेषु इनः श्रेष्ठः सवमारीनः, श्रेष्ठत्वं च परलक्ष्यत्वाभावरूपम् । भग्ना चासौ मारिणी च भग्नमारिणी । निगूढेति निगूढस्फोटक गूढस्फोटक इतिद्वे अन्तर्निहितविस्फोटकपदार्थकास्त्रविशेषस्य नाम्नी ।

तारपीडो - प्राज्ञैस्त्वरितपीडस्तु शस्त्रभेदे निगद्यते ।

गुब्बारा - वाष्पपोटलिका वाष्पपोटली गुप्तवाष्पिका ॥ 204 ॥

तलवार - तलवारिरसिःपुंसि

गणांस - सर्वला तोमरे स्मृता ।

भाला - भल्लः प्रासश्च कुन्तश्च

छुरी - छुरी तु क्षुरिका भवेत् ॥ 205 ॥

किरीच (गुप्ती)- ईली तु यमधारः स्यात्तत्रैव करवालिका ।

गुलेती - गुल्यायित्री धनुश्चापौ

ढाल - रक्षास्त्रं ढालमुच्यते । ॥ 206 ॥

गुल्ली - गुली सारमये पिण्डे

छर्रा - घुटिकोऽग्निगुलीभिदि ।

कोडा. - कशायान्तु शफा प्रोक्ता

ढेलमाँस(गोफन)- भिन्दिपाले सृगः स्मृतः ॥ 207 ॥

गोला - गोलो गोलकमाग्नेयचूर्णे महति कथ्यते ।

गोली - तस्मिंल्लघुनि गोली च गोलिका च निगद्यते ॥ 208 ॥

प्राज्ञैरिति - त्वरितपीड इत्येकं परकीययुद्धपोतादिभेदनास्त्रविशेष नाम । त्वरितपीड इति परकीययुद्धपोतादि छिनत्तीति त्वरितपीडः पचादित्वादच् त्वरिता पीडा भेदनरूपा येनाऽसौ वा त्वरितपीडः । वाष्पेति वाष्पपोटलिका वाष्पपोटली गुप्तवाष्पिका इतित्रीणि वाष्पपोटलिकाया नामानि । तलेति तलवारि असि इतिद्वे असेर्नाम्नी तलवारिरिति त्रिकाण्डशेषः । सर्वलेति सर्वला तोमर इतिद्वे तोमरस्य नाम्नी । भल्ल इति भल्लः प्रास कुन्त इतित्रीणि भल्लस्य नामानि । भल्लः शस्त्रभेदे इति मेदिनी । छुरीति छुरी छुरिका इतिद्वे क्षुरिकाया नाम्नी । क्षुरी क्षुरिकेति शब्दकल्पद्रुमः । ईलीति ईली यमधार करवालिका इतित्रीणि ईल्या नामानि । यमधार इति शब्दकल्पद्रुमः । गुल्यायित्रीति गुल्यायित्री धनुस् चाप इतित्रीणि चापस्य नामानि । गुलीमाययति प्रेरयतीति एतेर्णिजन्तात्तृचि ङीपि गुल्यायित्री । रक्षेति ढाल इत्येकं रक्षास्त्रभेदस्य नाम । ढालमिति शब्दकल्पद्रुमः । गुलिरिति गुली इत्येकं सारतरमृत्स्नादिपिण्डस्य नाम । घुटिक इति घुटिक इत्येकं वह्निगुटिकाभेदस्य नाम । गोलो लोहमयो गर्भघुटिकः केवलोऽपि वेति शुक्रनीतिः । कशायामिति कशा शफा इतिद्वे कशाया नाम्नी । भिन्दीति भिन्दिपाल सृग इतिद्वे गुलिकादिप्रक्षेपसाधनीभूतचर्ममयास्त्रविशेषस्य नाम्नी । गोल इति गोल गोलक इतिद्वे बृहदाग्नेयचूर्णस्य नाम्नी । स्त्रीत्वे गोला इत्यपि साधु । गोलो लोहमयो गर्भघुटिकः केवलोऽपि वेतिशुक्रनीतिः । क्षुद्रतमे गोले तु गोली गोलिका इतिद्वे निगद्यते ।

टिअर गैस - अश्रुवाष्पं भवेत्तत्र येनाश्रु प्रवहेद्भृशम् ।

टोटा बन्दूकका - अथावचूर्णधानी स्यात् गोली तत्रौपचारिकी ॥ 209 ॥

दारु गोला - चूर्णभेदेऽवचूर्णं स्यात्

बारूद - अग्निचूर्णन्तु तद्विदि ।

बर्छी - शङ्कुः शस्त्रभिदि ख्यातो

बम - गोलो वामश्च कीर्त्तितौ ॥ 210 ॥

॥ इति शस्त्रास्त्रवर्गः ॥

अश्र्विति अश्रुवाष्प इत्येकमश्रुप्रवाहकवाष्पविशेषस्य नाम । अथेति अवचूर्णाधानी गोली इतिद्वे गोल्या नाम्नी, अत्र गोलीशब्दव्यवहारस्तु तास्थ्यादौपचारिको बोध्यः । चूर्णेति अवचूर्ण इत्येकं दाहकचूर्णभेदस्य नाम । अवचूर्णधृक्कर्णमूलकमिति शुक्रनीतिः । अग्नीति अग्निचूर्ण इत्येकं दाहकचूर्णभेदस्य नाम । पिष्ट्वा शर्करवच्चैनमग्निचूर्णं भवेत्खल्विति शुक्रनीतिः । शङ्कुरिति शङ्कु इत्येकं शस्त्रभेदस्य नाम । गोल इति गोल वाम इतिद्वे अवचूर्णधारकविस्फोटकविशेषस्य नाम्नी । वमति अवचूर्णमिति वामः, ज्वलिति कसन्तेभ्य इति कर्त्तरि णः ।

॥ अथ पाचितवर्गः ॥

अदहन - स्यादर्द्धदहनः पुंसि तत्रैवाऽदहनो भवेत् ।

चाय - चायश्चव्यं समानार्थे

वार्ली - याविकं स्याद्यवोदकम् ॥ 211 ॥

पका अन्न - सिद्धान्नं पक्वमन्नं स्यात्

मट्ठा - मथितं मण्ठ उच्यते ।

बघार (छौंक) - तैलपक्वे तु जीरादौ अभिघार उदीर्य्यते ॥ 212 ॥

घोल - घोलं समोदकं प्रोक्तम्

भूजा - भरूजो भृष्ट उच्यते ।

चखना - चक्षणं तूपदंशः स्यात्

झोर - निक्वाथो रसकः समौ ॥ 213 ॥

चुडा - चिपिटः पृथुकस्तुल्यौ तत्रैव स्याच्चिपीटकः ।

मुरही - न्याक्क्वं स्यात्कुहवं तुल्यम्

साग - शाको व्यञ्जनमुच्यते ॥ 214 ॥

बिस्कुट - शुष्कापूपस्तु विकुटः

माण - मण्डो मण्डक इष्यते ।

स्यादिति अर्द्धदहन अदहन इतिद्वे अनोदनाद्यर्थमुष्णीकृतजलस्य नाम्नी । ईषद्दहनं दाहो यत्रासौ अदहनः । चायइति चाय चव्य इतिद्वे चव्यस्य नाम्नी । चव्यते इति कर्मणि घञ् चव्यमिति पृषोदरादिः । चीयते पेयत्वेन गृह्यते योऽसौ चीयते रसोऽत्रेति वा चायः । याविकमिति याविक यवोदक इतिद्वे याविकस्य नाम्नी । सिद्धान्नमिति सिद्धान्न इत्येकं पक्वस्यान्नस्य नाम । मथितमिति मथित मण्ठ इतिद्वे दधिविकारस्य नाम्नी । तैलेति अभिधार इत्येकं सूपादिसुरभीकरणभेदस्य नाम । घोलमिति घोल समोदक इतिद्वे घोलस्य नाम्नी । घोलमित्यमर-व्याख्यासुधाकार-शब्दकल्पद्रुमौ । समोदकमिति हेमचन्द्रः । भरूजइति भरूज भृष्ट भर्जित इति त्रीणि भृष्टान्नस्य नामानि भृष्ट इति शब्दकल्पद्रुमः । चक्षणमिति चक्षण उपदश इतिद्वे चक्षणस्य नाम्नी । उपदंशः चक्षणमितिशब्दकल्पद्रुमः । निक्वाथ इति निक्वाथ रसक इतिद्वे निक्वाथस्य नाम्नी । निक्वाथो रस इति शब्दकल्पद्रुमः चिपिट इति चिपिट पृथुक चिपीटक इतित्रीणि पृथुकस्य नामानि । न्याक्क्वमिति न्याक्क्व कुहव इतिद्वे न्याक्वस्य नाम्नी । न्याक्क्वं कुहवमिति पाकराजेश्वरः । शाक इति शाक व्यञ्जन इतिद्वे पक्वापक्वशाकस्य नाम्नी । विबुधैरिति बिकुट शुष्कापूप इतिद्वे शुष्कापूपविशेषस्य नाम्नी । विकृतः कुटः सुरा यत्राऽसौ विकुटः, विशेषेण कुटति कुटिलीभवति इति वा विकुटः । शुष्कापूप इति शब्दकल्पद्रुमः ।

भाजी - पक्वे वेशनलिप्ते तु शाके भाजी निगद्यते ॥ 215 ॥

रायता - राज्यक्ता खद्यभेदे स्यात्

कढी - क्वाथी च क्वाथिका समा ।

दाल - द्विदले पाचिते सूपो यूषश्च परिकीर्त्यते ॥ 216 ॥
पाचितेऽपाचिते दालि र्द्विदलञ्चापि कथ्यते ।

घुघनी - कुल्माषो विबुधैरुक्तश्चणके जलपाचिते ॥ 217 ॥

तीमन - निष्ठानं तेमनं प्रोक्तं

बड़ा - वटकः स्याद्वडो बडा ।

बडी - वटिका तु बटी ख्याता

खिचरी - मिश्रितान्नं तु खेचरः ॥ 218 ॥

काढा - पेयभेदे भवेत्क्वाथः

भडतू - भटित्रं भक्ष्यसंभिदि ।

लप्सी - लप्सिका खाद्य संभेदे विद्वद्भिः परिकीर्तिता ॥ 219 ॥

दमपोख - प्रलेहश्च प्रलेह्यश्च विशिष्टे व्यञ्जने भवेत् ।

घोल बडा - काञ्जीयवटकं प्रोक्तं यद् घोलेन विमिश्रितम् ॥ 220 ॥

पक्व इति भाजी इत्येकं वेसनलिप्तपाचितशाकभेदस्य नाम, भाजीति स्वरप्रक्रिया कौमुदी । राज्यक्तेति राज्यक्ता इत्येकं दध्यादिमिश्रित- शाकभेदस्य नाम, राज्यक्तेति शब्दरत्नावली । क्वाथीति क्वाथी क्वाथिका इतिद्वे क्वाथ्या नाम्नी । क्वाथी क्वाथिकेति शब्दकल्पद्रुमः । द्विदल इति सूप यूष इतिद्वे पाचितद्विदलस्य नाम्नी । दालि द्विदल इतिद्वे पाचिताऽपचितयोर्द्विदलयोर्नाम्नी । दालयश्चणकानान्तु इति भावप्रकाशः । कुल्माष इति कुल्माष इत्येकं जलेन सह पाचितचणकस्य नाम । निष्ठानमिति निष्ठान तेमन इतिद्वे सार्द्रव्यञ्जनस्य नाम्नी, तेमनं व्यञ्जने इत्यनेकार्थसंग्रहः । वटकः इति वटक वड वडा इतित्रीणि वटकस्य नामानि, बटक इति शब्दकल्पद्रुमः, पिडं चूर्णे वडो वडेति शब्दचन्द्रिका । वटिकेति वटिका वटी इतिद्वे वटिकाया नाम्नी । वटिका वटीति शब्दकल्पद्रुमः । मिश्रेति मिश्रितान्न खेचर इतिद्वे मिश्रितान्नस्य नाम्नी । खेचर इति पाकराजेश्वर-शब्दकल्पद्रुमौ । पेयेति क्वाथ इत्येकं पेयभेदस्य नाम । भटित्रमिति भटित्र इत्येकं भक्ष्यभेदस्य नाम, भटित्रमिति शब्दकल्पद्रुमः । लप्सिकेति लप्सिका इत्येकं भक्ष्यविशेषस्य

नाम, सिद्धैषा लप्सिका मतेति भावप्रकाशः । प्रलेह इति प्रलेह प्रलेह्य इतिद्वे प्रलेहस्य नाम्नी । प्रलेह इति शब्दकल्पद्रुमः । काञ्जीयेति काञ्जीयवटक इत्येकं वटकभेदस्य नाम ।

रोटी - अभ्यूषो रोटिका रोटी क्लीब आपक्वमिष्यते ।

कबाबरोटी - शूल्यं शूलाकृतं शूलपाक एते समार्थकाः ॥ 221 ॥

पावोरोटी - फिरङ्गिरोटी पाश्चात्यभक्ष्यरोटीप्रभेदके ।

पूरी - शष्कुली पूपुली पौलिः पोल्यः पूरी च कीर्त्तिताः ॥ 222 ॥

भाकडी - पूरिका रोटिकाभेदे

चपेती - चपेटी शष्कुलीभिदि ।

परौठा - पोलिका तत्प्रभेदे स्यात्

फलका - फुल्लकः फुल्लिका भवेत् ॥ 223 ॥

कचौरी - कर्चरिका बुधैः प्रोक्ता कचोरी च कचोरिका ।

तत्प्रदे माषगर्भा पिष्टगर्भा च कथ्यते ॥ 224 ॥

पीठी - पीठिका पिष्टिका पिष्टिः

लूची - लोचिका शष्कुलीभिदि ।

लिट्टी - लेटी स्याद्भक्ष्यभेदे स्त्री

पापड़ - पर्पटः खाद्यसंभिदि ॥ 225 ॥

पकौडी - स्मृता पक्ववटी पक्ववटिकायाः प्रभेदके ।

अभ्यूष इति अभ्यूष रोटिका रोटी आपक्व इति चत्वारि रोटिकाया नामानि । शुष्कगोधूमचूर्णेन किञ्चित्पुष्टाञ्च रोटिकाम् इति भावप्रकाशः । रोटिका रोटीति शब्दकल्पद्रुम-विश्वकोषौ । शूल्यमिति शूल्य शूलाकृत शूलपाक इतित्रीणि शूल्यस्य नामानि । एते सर्वे शब्दकल्पद्रुमे निर्दिष्टाः । फिरंगीति फिरङ्गिरोटी इत्येकं फिरङ्गिजातीयभक्ष्यरोटिकाया नाम । फिरङ्गिरोटी, शब्दकल्पद्रुमः । शष्कुलीति शष्कुली पूपुली पौलि पोली पूरी इति पञ्च शष्कुल्या नामानि । अथ पोली पूपुलीति त्रिकाण्डशेषः, पूरीति शब्दकल्पद्रुमः ।

पूरिकेति पूरिका इत्येकं रोटिकाविशेषस्य नाम । समितावेसने जीरहिंगुमारीचयोजिते, घृताक्ते जलसंयुक्ते पीठस्योपरि वेल्लिते । घृतेन वाथ तैलेन भर्जिता पूरिका मतेति भोजनकौतूहलम् । चर्पटीति चर्पटी इत्येकं शष्कुलीविशेषस्य नाम । चर्पटीति त्रिकाण्डशेष: । पोलिकेति पोलिका इत्येकं शष्कुलीप्रभेदस्य नाम । लघ्वी पोली पोलिका । फुल्लक इति फुल्लक फुल्लिका इतिद्वे फुल्लिकाया नाम्नी । बुधैरिति कर्चरिका कचोरी कचोरिका इतित्रीणि कर्चरिकाया नामानि । कर्चरिकेति पकराजेश्वर: कचोरीति सूदशास्त्रम् । माषगर्भा पिष्टगर्भा इति कर्चरिकाप्रभेदस्य नाम्नी । पीठिकेति पीठिका पिष्टिका पिष्टि इतित्रीणि पिष्टेर्नामानि, इमे शब्दकल्पद्रुमे निर्दिष्टा: लोचिकेति लोचिका इत्येकं शष्कुलीविशेषस्य नाम, लोचिकेति शब्दकल्पद्रुम: ।

लेटीति लेटी इत्येकं गोमयाग्नौ पाचितपिष्टकपिण्डस्य नाम, लेटीति शब्दकल्पद्रुम: । पर्पट इति पर्पट इत्येकं खाद्यभेदस्य नाम, पर्पट इति राज वल्लभ: । बुधैरिति पक्ववटी इत्येकं पाचितवटिकाया नाम ।

सेव - सेविका सूत्रिका तुल्ये

पुआ - पूपोऽपूप: समार्थकौ ।। 226 ।।

छांछ - घोलञ्च छच्छिका तुल्ये

तक्र - तद्भेदे तक्रमुच्यते ।

खडी (खोया) - किलाटी कूर्चिका प्रोक्ता तत्रैव स्यात्किलाटिका ।। 227 ।।

जलेवी - बुधै: कुण्डलिका प्रोक्ता कुण्डलिन्यां च कुण्डली ।

चुरमा - चूर्णिका मिष्टसंभेदे

अमृती - प्रोच्यते कविनाऽमृती ।। 228 ।।

खाजा - फेनक: फेनिका चेति मिष्टभेदे निगद्यते ।

घेवर - प्राज्ञैर्घृतवरं क्लीबे घृतपूर उदीर्य्यते ।। 229 ।।

छेना (खिरसा) - पयोविकृतिसंभेदे कथ्यते तक्रकूर्चिका ।

पेडा - पिण्डीभूते दुग्धसारे कीर्त्यते दुग्धकूपिका ।। 230 ।।

रसगुल्ला - रसादिगुलिका प्राज्ञै रसगोल उदीर्य्यते ।

लड्डू - लड्डुको लड्डुकस्तुल्यौं मोदकश्चैव कथ्यते ।। 231 ।।

सेविकेति सेविका सूत्रिका इतिद्वे सूत्रिकाया नाम्नी, इमे द्वे शब्दकल्पद्रुमे निर्दिष्टे । पूप इति पूप अपूप इतिद्वे पूपस्य नाम्नी, पूपापूपावित्यमरः। घोलमिति घोल छच्छिका इतिद्वे घोलस्य नाम्नी, घोलमित्यमरव्याख्यासुधाकारः । तदिति तक्र इत्येकं घोलभेदस्य नाम । किलाटीति किलाटी कूर्चिका किलाटिका इति त्रीणि कूर्चिकाया नामानि, कूर्चिका क्षीरविकृतावित्यनेकार्थसंग्रहः, किलाटी कूर्चिका तथेति हैमनाममाला । बुधैरिति कुण्डलिका कुण्डलिनी कुण्डली इतित्रीणि कुण्डल्या नामानि । कुण्डलीति पाकराजेश्वरः । चूर्णिकेति चूर्णिका इत्येकं मिष्टविशेषस्य नामनी । चूर्णिकेति पाकराजेश्वरः । प्रोच्यत इति अमृती इत्येकं मिष्टभेदस्य नाम । फेनक इति फेनक फेनिका इतिद्वे मिष्टभेदस्य नाम । फेनक इति शब्दकल्पद्रुमः । प्राज्ञैरिति घृतवर घृतपूर इतिद्वे घृतवरस्य नाम्नी । अवगाह्य घृते पक्त्वा घृतपूरोऽयमुच्यते इतिराजवल्लभः, घृतवरमिति हेमचन्द्रः । पय इति तक्रकूर्चिका इत्येकं दुग्धविकारभेदस्य नाम । तक्रेण पक्वं यत्क्षीरं सा भवेत्तक्रकूर्चिका इति मेदिनी। पिण्डीति दुग्धकूपिका इत्येकं पिण्डीभूतदुग्धसारस्य नाम । रसादिगुलिकेति रसगुलिका रसगोल इतिद्वे रसगोलकस्य नाम्नी । लड्डुक इति लड्डुक लड्डु मोदक इतित्रीणि लड्डुकस्य नामानि ।

मोतीचूरलड्डू - स्यान्मुक्ताचूर्णलड्डूके तपणो मुद्गमोदकः ।

सन्देश - मिष्टभेदे तु संदेशः कथ्यते कोषपण्डितैः ।। 232 ।।

मलाई - सन्तानिका कवीन्द्रेण दुग्धसारे निगद्यते ।

हलुआ - मिष्टान्नभेदे संयावः

पोलाव - पलान्नं मिष्टसंभिदि ।। 233 ।।

शिखरिन - शिखरिण्यां रसाला स्यात् चक्रिका मिष्टसंभिदि ।

मिष्टमण्ठं तथा चैव

छाली - दुग्धफेने तु शार्कक: ॥ 234 ॥

मोहन भोग - प्रोक्तो मोहनभोगस्तु मिष्टभेदे सुधीवरैः ।

मुरब्बा - मिष्टपाकः कवीन्द्रेण कीर्त्यते रागखाण्डवम् ॥ 235 ॥

राव - ऐक्षवे फाणितं प्रोक्तं

गुड़ - तद्भेदे गुड उच्यते ।

खाँड़ - उच्यते शर्करा खण्डम्

मिशरी - मत्स्यण्डी तत्प्रभेदकं ॥ 236 ॥

मत्स्यण्डिकाऽपि तत्रैव कविना परिकल्प्यते ।

बतासा - खण्डस्फाटा वर्तुलाशा मिष्टभेदे निगद्यते ॥ 237 ॥

अचार - सन्धानं सन्धितं सन्धानिकाऽऽचारः प्रकीर्त्यते ।

॥ इति पाचितवर्गः ॥

स्यादिति मुक्ताचूर्णलड्डूक तर्पण मुद्गमोदक इतित्रीणि मुद्गमोदकस्य नामानि, तर्पणो मुद्गमोदक इति भावप्रकाशः । मिष्टेति सन्देश इत्येकं मिष्टविशेषस्य नाम, सन्देश इति शब्दकल्पद्रुमः । सन्तानिकेति सन्तानिका इत्येकं क्षीरविकृतिभेदस्य नाम । सन्तानिकाऽपि क्षीरादिसारे इति मेदिनी । मिष्टेति संयाव इत्येकं मिष्टान्नविशेषस्य नाम, संयाव इति शब्दकल्पद्रुमः पलेति पलान्न इत्येकं मिष्टभेदस्य नाम, पलान्नमिति शब्दकल्पद्रुमः । शिखरिण्यामिति शिखरिणी रसाला इतिद्वे रसालाया नाम्नी । एषा वृकोदरकृता सरसा रसाला याऽऽस्वादिता भगवता मधुसूदनेनेतिसूदशास्त्रम्, शिखरिणीति हैमनाममाला । चक्रिकेति चक्रिका इत्येकं मिष्टभेदस्य नाम । चक्रमस्यां क्षुद्रायामस्तीति चक्रिका । मिष्टेति मिष्टमण्ठ इत्येकं मिष्टभेस्य नाम । दुग्धेति शार्कक इत्येकं दुग्धफेनस्य नाम, शार्कक इति मेदिनी । प्रोक्त इति मोहनभोग इत्येकं मिष्टान्नविशेषस्य नाम । मोहनभोग इति पाकराजेश्वरः । मिष्टेति मिष्टपाक रागखाण्डव इतिद्वे मिष्टपाकस्य नाम्नी । मिष्टापाकइति शब्दकल्पद्रुमः । ऐक्षव इति फाणित इत्येकमिक्षुविकारस्य नाम । तदिति

गुड इत्येकं घनीभूतेक्षुरस्य नाम । उच्यत इति शर्करा खण्ड इतिद्वे सितायाः नाम्नी । खण्डमिति शब्दकल्पद्रुमः । मत्स्यण्डीति मत्स्यण्डी मत्स्यण्डिका इतिद्वे मत्स्यण्डिकाया नाम्नी । इमे द्वे शब्दकल्पद्रुमे निर्दिष्टे । खण्डेति खण्डस्फाटा वर्तुलाशा इतिद्वे मिष्टभेदस्य नाम्नी । सन्धानमिति सन्धान सन्धित सन्धानिका आचार इति चत्वारि सन्धानस्य नामानि ।

॥ अथ लैखिकवर्गः ॥

| | |
|---|---|
| कलम | - अथाक्षरजनन्यान्तु लेखनी कलमो भेवत् ॥ 238 ॥ |
| फाउन्टेनपेन | - पानीयपेनः स्यादन्तमसिका मसिवाहिनी । |
| पेनशील | - ईशिका पणशीलो लेपनशीलस्तथोच्यते । 239 ॥ |
| खड़ी | - पाकशुक्ला शिलाधातुः कक्खटी स्यात्खड़ी खटी । |
| कूची | - तूलिका कूचिका कूर्च कूची स्याच्चित्रलेखनी ॥ 240 ॥ |
| शलाका | - रेखादण्डः शलाका स्यात् |
| स्याही | - मसि लेंखनसाधने । |
| दावात | - मसिधानी मसिमणिर्मेलानन्दो मसिप्रसूः ॥ 241॥ |
| कागज | - कागदं कर्गदं प्रोक्तम् |
| रफ | - रुक्षं तद्भेद उच्यते । |
| ग्लेज | - स्निग्धं तु मसृणं तुल्ये |
| गोंद | - निर्य्यासो द्रवसंभिदि ॥ 242 ॥ |
| पीन | - कीलकं पत्रवेधिन्याम् |
| सेफ्टीपीन | - कीलस्तद्भेद उच्यते । |

अथेति अक्षरजननी लेखनी कलम इतित्रीणि लेखन्या नामानि । अक्षरजननीति शब्दकल्पद्रुमः । कलमः पुंसि लेखन्यामिति मेदिनी । कलयत्यक्षराणीति कलमः, कलिकद्योरित्युणादिसूत्रेणामप्रत्यये साधुः । पानीयेति पानीयपेन अन्तर्मसिका मसिवाहिनी इतित्रीणि अन्तर्मसिकाया नामानि । पानीयं मस्यात्मकं पान्ति रक्षन्तीति पानीयपास्तेषु इनः श्रेष्ठः

पानीयपेन: । ईशिकेति ईशिका पणशील लेपनशील इतित्रीणि लेपनशीलस्य नाम, पणनं पण: लेखादिव्यवहार: स शीलं यस्यासौ पणशीलो, लेपनशील: । पाकेति पाकशुक्ला शिलाधातु कठिनी कक्खटी खडी इंति शब्दचन्द्रिका, खटीति शब्दकल्पद्रुम: । तूलिकेति तूलिका कूचिका कूर्च कूची चित्रलेखनी इतिपञ्च कूच्या नामानि, कूर्च कूचिकेति शब्दकल्पद्रुम:, कूचीचित्रलेखनिकेत्युणादि: । रेखेति रेखा दण्डशलाका इतिद्वे रेखादण्डस्य नाम्नी । मसिरिति मसि इत्येकं रक्तकृष्णादिद्रवपदार्थस्य नाम । मसीति मसिधानी मसिमणि मेलानन्द मसिप्रसू इति चत्वारि मसिधान्या नामानि । मसिधानी मसमणिर्मेलान्धुर्वणकूपिका इति त्रिकाण्डशेष:, मेलानन्दोमसिप्रसूरिति हारावली । कागदमिति कागद कर्गद इतिद्वे कागदस्य नाम्नी, कागदं चाष्टगन्धेनेति मन्त्रकल्पद्रुम: । कर्गदमिति शब्दकल्पद्रुम: । रुक्षमिति रुक्ष इत्येकं रुक्षस्य नाम । स्निग्धमिति स्निग्ध मसृण इतिद्वे स्निग्धस्य नाम्नी । निर्यासइति निर्यास इत्येकं द्रवभेदस्य नाम ।

| | |
|---|---|
| लिफाफा | - लेख्यावारस्तु लिप्याप: |
| लेटर पेपर | - कथ्यते पत्रपत्रिका ॥ 243 ॥ |
| स्लेट | - शिलापट्टस्तु फलकम् |
| सोंखता | - शोषपत्रं तु शोषिका । |
| सादा कागज | - सञ्च: कर्गदभेदे स्यात् |
| पोस्टकार्ड | - पत्रभित् प्रेष्यकर्गदम् ॥ 244 ॥ |
| रजिस्टर बही | - वञ्जिकायां कवीन्द्रेण राजेष्टितमुदीर्यते । |
| कापी | - साञ्ची च पञ्जिका चैव तुल्यार्थत्वेन भाषिते ॥ 245 ॥ |
| डायरी | - वासरी दैनवृत्ती च दैनदिन्यां प्रकीर्तिते । |

॥ इति लैखकवर्ग: ॥

कीलक इति कीलक इत्येकं पत्रवेधनस्य नाम । कील इति कील इत्येकं पत्रवेधनविशेषस्य नाम । लेख्येति लेख्यावार लिप्याप इतिद्वे पत्रावरणस्य नाम्नी । लेख्यमावृणोतीति लेख्यावार:, लिपिम् आपयति

स्वान्तः प्रापयतीति लिप्यापः । कथ्यते इति पत्रपत्रिका इत्येकं पत्रार्थपत्रिकाया नाम । शिलेति शिलापट्ट फलक इतिद्वे लेखार्थशिलापट्टस्य नाम्नी । पाण्डुलेख्येन फलके भूमौ वा प्रथमं लिखेदिति व्यवहारतत्त्वम् । शोषेति शोषपत्र शोषिका इतिद्वे शोषिकाया नाम्नी । सञ्च इति संच इत्येकं कागदभेदस्य नाम श्रीताडीपत्रजे सञ्चे इति देवीपुराणम् । पत्रेति प्रेष्यकर्गद इत्येकं प्रापणीयकर्गदभेदस्य नाम । वञ्जिकायामिति वञ्जिका राजेष्टित इतिद्वे आयव्ययादिलेखनपुस्तिकाया नाम्नी । वञ्जिका आयव्ययलिखनार्थेति मुकुटः । राजेष्टितशब्दो राजेष्टितीकारशब्दे विवृत एव । सांचीति सांची पंचिका इतिद्वे लेखपुस्तिकाया नाम्नी । सञ्चस्येयं सांची पंचिकेति हेमचन्द्रः । वासरीति वासरी देनवृत्ती दैनन्दिनी इतित्रीणि वासर्य्या नामानि । वासरस्येयं वासरी दिनवृत्तस्येयं दैनवृत्ती । दैनन्दनीत्याधुनिकव्यवहारः ।

## ।। अथ गृहोपकरणवर्गः ।।

फर्नीचर - पारिणाह्यं कवीन्द्रेण गृहोपस्कर उच्यते ।। 246 ।।

आलमारी - स्त्रियामालयमारी त्वालयामाली निगद्यते ।

तिजोरी (सेफ) - निर्दिश्यते लौहधानी सुदृढे लौहपेटके ।। 247 ।।

मचिया - हौणासो मंचिका वेत्रासनं वेत्रास उच्यते ।

आराम कुरसी - तद्विशेषे तु विद्वद्भिरासन्दी स्त्री निगद्यते ।। 248 ।।

पलङ्ग - तुल्यौ पर्य्यङ्क-पल्यङ्कौ

चौकी - चतुष्की पीठिकाभिदि

खाट(चारपाई) - खट्वासन्दी चतुष्पादी

तिपाई (स्टूल) - स्यात्त्रिपादी त्रिपादिका ।। 249 ।।

टेबल - लेखोद्बलस्तथा लेखमंचस्तुल्यौ प्रकीर्तित्तौ ।

बेंच - दारुणा घटिते दीर्घासने फलकमिष्यते ।। 250 ।।

डेस्क - लिपिपीठं पीठभेदे

झूला - प्रेङ्खा ढोला समे स्त्रियाम् ।।

पारीति पारिणाह्य गृहोपस्कर इतिद्वे गृहोपकरणस्य नाम्नी । परिणाह्यमिति शब्दकल्पद्रुमः । स्त्रियामिति आलयमारी आलयमाली इतिद्वे आलयमार्य्या नाम्नी । आलयस्य मां शोभाम् आरयति प्रणयतीति आलयामारी अणन्तान्ङीप । माल्यते धार्य्यते यत्रासौ माली आलयस्य सा आलयमाली अधिकरणे धञ् मल धारणे भ्वादिः । निरिति लौहधानी इत्येकं सुदृढलौहपेटकस्य नाम । हौणास इति हौणास मञ्चिका वेत्रासन वेत्रास इति चत्वारि मञ्चिकाया नामानि । आस्यतेऽत्रेत्यासः हूणसम्बन्धी स हौणासः एतेन अस्यासनस्य पाश्चात्यीयत्वं व्यञ्जितम् । तदिति आसन्दी इत्येकं मञ्चिकाविशेषस्य नाम । तुल्याबिति पल्यङ्क पर्य्यंक इतिद्वे पर्य्यंकस्य नाम्नी । चतुष्कीति चतुष्की इत्येकं पीठिकाप्रभेदस्य नाम । खट्वेति खट्का आसन्दी चतुष्पादी इति त्रीणि खट्वाया नामानि । स्यादिति त्रिपादी त्रिपादिका इतिद्वे त्रिपाद्या नाम्नी । लेखोद्बल इति लेखोद्बल लेखमंच इतिद्वे लेखमञ्चस्य नाम्नी । उद्बलयतीत्युद्बलः साधक इतितदर्थः, लेखाय स लेखोद्बलः लेखसज्जाधानादिद्वारा सहायक इतिपर्य्यवसितोऽर्थः । दारुणेति फलक इत्येकं काष्ठासनविशेषस्य नाम । दारुणा घटिते दीर्घासने फलकमिति गोऽश्वोष्टेतिमनुवचनं विधृण्वन् कुल्लूकभट्टः । लिपीति लिपिपीठ इत्येकं पीठभेदस्य नाम । प्रेङ्खेति प्रेङ्खा दोला इतिद्वे दोलाया नाम्नी ।

पीढ़ा - पीठी पीठप्रभेदे स्यात् ।

कुण्डा - मणिकः स्यादलञ्जरः ॥ 251 ॥

मटका - मट्टकं भाण्डभेदे स्यात्

गगरा - गर्गरः कलशो घटः ।

गगरी - गर्गरी मन्थनी तुल्ये

पातिली - मृद्भाण्डे पातिली भवेत् ॥ 252 ॥

भाण - भाण्डः ॥ पात्रविशेषे स्यात्

हांडी - हण्डी तद्भेद उच्यते ।

हंडिया - तस्यां लघ्व्यां तु विद्वद्भिर्हण्डिका परिकल्प्यते ॥ 253 ॥

सरबा - शरावो वर्द्धमानः स्यात्

लोटा - कंसः पानिलमुच्यते ।

सुवरना - सुवर्णा तु लघौ पानपात्रभेदे निगद्यते ॥ 254 ॥

टुकनी - कसकस्तत्र क्षुद्रे स्यात्

प्याला - पारी-चषक-पायिकाः

बदना - वर्द्धनी शाखिजातीयपानपात्रे निद्यते ॥ 255 ॥

पीठीति पीठी इत्येकं पीठभेदस्य नाम । मणिकेति, मणिक अलञ्जर इतिद्वे महामृद्भाण्डस्य नाम्नी । मणिकालिञ्जरावित्यमरसिंहः । मट्टकमिति मट्टकइत्येकं मृद्भाण्डविशेषस्य नाम । मट्टकमिति शब्दकल्पद्रुमः । गर्गर इति गर्गर कलश घट इति त्रीणि घटस्य नामानि गर्गर इति शब्दकल्पद्रुमः। गर्गरीति गर्गरी मन्थनी इतिद्वे क्षुद्रघट्या नामनी । गर्गरी चापि मन्थनी इति जटाधरत्रिकाण्डशेषौ । मृदिति पातिली इत्येकं मृद्भाण्डविशेषस्य नाम । पातिली नारीपात्रभेदयोरिति मेदिनी । भाण्डमिति भाण्ड इत्येकं पात्रविशेषस्य नाम । हण्डीति हण्डी भाण्डभेदस्य नाम । हण्डीति शब्दकल्पद्रुमः। तस्यामिति हण्डिका इत्येकं क्षुद्रहण्ड्या नाम । शराव इति शराव वर्द्धमान इतिद्वे शरावस्य नाम्नी । कंस इति कंस पानिल इतिद्वे पानपात्रस्य नाम्नी। पानिलमिति शब्दकल्पद्रुमः । सुवर्णेति सुवर्णा इत्येकं लघुपानपात्रविशेषस्य नाम । कसक इति कसक इत्येकं क्षुद्रपानपात्रस्य नाम। पारीति पारी चषक पायिका इतित्रीणि चषकस्य नामानि । आहुश्चषकं पानपात्रं पारीमप्यनुतर्षणं कवीन्द्रैरिति हारावली । वर्द्धनीति वर्द्धनी इत्यंकं यवनजातीयपानपात्रस्य नाम । शाखी यवनजातिभेदः । शाखी तुरुष्काख्यजने प्रभाविति मेदिनी । वर्द्धनीति शब्दकल्पद्रुमः ।

बालटी - वार्घटी वारिधानी स्यात्

पिकदानी - भवेत्प्रोण्ठः पतद्ग्रहः ।

खल - पेयपात्रेषु विद्वद्भिः खल्लः पुंसि निगद्यते ॥ 256 ॥

वर्तन - भवेदावपनं पात्रममत्रं भाजनं तथा ।

| | |
|---|---|
| तमघैल | - ताम्रघटः स्यात्किट्टालः |
| अढिया | - कर्करी स्याद् गलन्तिका ॥ 257 ॥ |
| बट्लोही | - प्रवणी च पिठरकः पांकपात्रे लघीयसि । |
| लोहिया | - लोहिका लौहपात्रे स्यात् |
| कराह | - कटाहः पात्रसंभिदि ॥ 258 ॥ |
| करछू | - दर्वी कम्बिः खजाका स्त्री पाकपात्रप्रभेदके । |
| करछूल | - दर्विका कम्बिका तुल्ये कवीन्द्रैः परिकल्पिते । 259 ॥ |
| तबा | - ऋजीषं पिष्टपचनम् |
| सरसी | - सण्डिशः पाकसाधने । |
| चिमटा | - सुचुटी स्त्री सदंशिका |
| डब्बू | - तदर्दूर्हस्ताकृतौ भवेत् ॥ 260 ॥ |

वार्घटीति वार्घटी वारिधानी इतिद्वे जलपात्रभेदस्य नाम्नी, वारः जलस्य घटीति वार्घटी । भवेदिति प्रोष्ठ पतद्ग्रह इतिद्वे प्रोष्ठस्य नाम्नी । पेषेति खल्ल इत्येकं पेषणपात्रभेदस्य नाम ।

भवेदिति आवपन पात्र अमत्र भाजन इति चत्वारि पात्रसामान्यस्य नामानि । ताम्रेति ताम्रघट किट्टाल इतिद्वे ताम्रघटस्य नाम्नी, किट्टाल इति मेदिनी । कर्करीति कर्करी गलन्तिका इतिद्वे गलन्तिकाया नाम्नी । प्रवणीति पिठरक प्रवणी इतिद्वे लघुपाकपात्रस्य नामी । प्रवणीति पाकदर्पणाम् । लोहिकेति लोहिका इत्येकं लौहपात्रभेदस्य नाम । लोहिकेति शब्दकल्पद्रुमः । कटाह इति कटाह इत्येकं पात्रभेदस्य नाम । दर्वीति दर्वी कम्बि खजाका इति त्रीणि कम्बेर्नामानि । कन्दाविति कन्दु स्वेदिनी इतिद्वे कन्दोर्नाम्नी । दर्विकेति दर्विका कम्बिका इतिद्वे लघुदर्वीप्रभेदस्य नाम्नी । ऋजीषमिति ऋजीष पिष्टपचन इतिद्वे पिष्टपचनस्य नाम्नी । सण्डिश इति सण्डिश इत्येकं पाकसाधनविशेषस्य नाम । सण्डिशैरपकृष्यन्ते इति मार्कण्डेयपुराणम् । सुचुटीति सुचुटि सदंशिका इतिद्वे सदंशिकाया नाम्नी । सुचुटीति शब्दकल्पद्रुमः । तदर्दूरिति तदर्दू इत्येकं हस्ताकृतिपात्रभेदस्य नाम ।

| | |
|---|---|
| कटोरा | - कटोरा स्त्री कटोरं स्यात् |
| कटोरी | - खर्वा सा तु कटोरकम् । |
| थाल | - स्थालं पात्रविशेषे स्यात् |
| थाली | - स्थाली खर्वं तदुच्यते ॥ 261 ॥ |
| चुल्हा | - अन्तिका चुल्लिचुल्ल्यः स्युः |
| दमचुल्हा | - प्रोक्ता लौहान्तिका स्त्रियाम् । |
| सलाई | - इषीका तु शलाका स्यात् |
| चमच | - चमसः पानसाधनम् ॥ 262 ॥ |
| दियासलाई | - दीपेषीका तथा दीपशलाका कथ्यते बुधैः । |
| अँगेठी | - अङ्गारपाभ्यामङ्गारिः स्त्रियामङ्गारधानिका ॥ 263 ॥ |
| कठौत | - द्रोणी स्त्री काष्ठपात्रे स्यात् |
| जाँत | - घरट्टः पेषणी भवेत् |
| झाडू | - निर्णेजनी वर्द्धनी च मार्जनी स्यात्समूहिनी ॥ 264 ॥ |
| लोढ़ी | - शिलापुत्रो घर्षणालः |
| सिलौट | - शिवापट्टस्तु पेषणे |
| सूप | - धान्यादिशोधने सूपः |

**कटोरा** इति कटोरा कटोर इति व्यञ्जनादिपात्रस्य नाम्नी । कटोरेति शब्दकल्पुद्रमः । **खर्वेति** कटोरक इत्येकं क्षुद्रस्य व्यञ्जनादिपात्रस्य नाम । काचकटोरके य इति मेरुतन्त्रम् । **स्थालमिति** स्थाल इत्येकं पात्रविशेषस्य नाम । यद्यप्ययं शब्दः पाकपात्रे व्ययह्रियते तथापि लोकप्रसिद्धिमनुरुध्य भोजनाद्यर्थमहापात्रपर्य्यायतया समुल्लेखः कवेरिति बोध्यम् । एवं स्थालीशब्देऽपि वोध्यम् । **स्थालीति** क्षुद्रभोजनादिपात्रस्य स्थाली इत्येकं नाम । **अन्तिकेति** अन्तिका चुल्लि चुल्ली इतित्रीणि चुल्लेर्नामानि । चुल्लिः चुल्लीति शब्दकल्पद्रुमः । तेमनी चुल्लिभिद्यपीति हेमप्रयोगश्च । **प्रोक्तेति** लौहान्तिका इत्येकं लौहचुल्लेर्नाम । **इषीकेति** इषीका शलाका इतिद्वे शलाकाया नाम्नी।

चमस इति चमस इत्येकं पानसाधनविशेषस्य नाम । दीपेषीकेति दीपेषीका दीपशाला इतिद्वे दीपशलाकाया नाम्नी । अंगारिति अङ्गारपात्री अंगारि अङ्गारधानिका इतित्रीणि अंगारधानिकाया नामानि । द्रोणीति द्रोणी काष्ठपात्र इतिद्वे काष्ठपात्रस्य नाम्नी । निर्णजनीति निर्णजनी वर्द्धनी मार्जनी समूहिनी इति चत्वारि वर्द्धन्या नामानि । वर्द्धन्यां च समूहिनीति हेमचन्द्रः । शिलेति शिलापुत्र घर्षणाल इतिद्वे घर्षणालस्य नाम्नी । शिवेति शिवापट्ट इत्येकं प्रस्तरमयपेषणपट्स्य नाम । सूप इत्येकं धान्यादिशोधनपात्रस्य नाम ।

चलनी - चालनी चालने भवेत् ।। 265 ।।

चकला - चकला चक्रिका प्रोक्ता

वेलन - वेल्लना तत्सहायके ।

दहीकट्टा - भवेत्कुन्तलिका तत्र दधि येन निकृन्तति ।। 266 ।।

छोलनी - छोदनी छोदनास्त्रे स्यात्

दौना - पुटकं पर्णपात्रके ।

कुप्पा - कूपकं कुतुपः पुंसि

कूपी - कूपी खर्वः स उच्यते ।। 267 ।।

कैंची - कर्त्तन्यां पत्रपाली स्यात्

पौती - मञ्जूषा पिट उच्यते ।

झोली - प्रसेवः सोन एकार्थो

बोरा - गोणी धौतकटः स्मृतः ।। 268 ।।

तखता - तक्षिता तक्षिते काष्ठे

कङ्घी - कङ्कती स्यात् प्रसाधनी ।

चानलीति चालनी चालन इतिद्वे चालनस्य नाम्नी । क्षुद्रछिद्र शतोपेतं चालनमिति कात्यायन-रत्नकोषौ । चक्रलेति चक्रला चक्रिका इति द्वे चक्रिकाया नाम्नी ।

वेल्लनति वेल्लना इत्येकं शष्कुलीवेल्लनसाधनस्य नाम । भवेदिति

कुन्तलिका इत्येकं दधिकर्तन्या नाम । कुन्तलिकेति शब्दकल्पद्रुमः । छोदनीति छोदनी इत्येकं शाकादितक्षणसाधनस्य नाम । पुटक इति पुटक इत्येकं पर्णपात्रस्य नाम । कूपकमिति कूपक कुतुप इतिद्वे तैलादिपात्रस्य नाम्नी । कूपीति कूपी इत्येकं खर्वकूपकस्य नाम । कर्त्तनीति कर्तनी पत्रपाली इतिद्वे कर्तन्या नाम्नी । मंजूषेति मञ्जूषा पिट इतिद्वे मञ्जूषाया नाम्नी । पिटइति हेमचन्द्र-शब्दकल्पद्रुमादयः । प्रसेवइति सोन प्रसेव इतिद्वे स्यूतस्य नाम्नी । गोणीति शब्दकल्पद्रुमः । तक्षितेति तक्षिता इत्येकं तक्षितकाष्ठस्य नाम । कङ्कतीति कङ्कती प्रसाधनी इतिद्वे प्रसाधन्या नाम्नी । कङ्कती प्रसाधिनीति मेदिनी ।

| | |
|---|---|
| डाला | - डल्लकं वंशपात्रे स्यात् |
| टोकरा | - कण्टोलः पुंसि तद्विदि ॥ 269 ॥ |
| फुलडाली | - आधानिका तु पुष्पादेरुच्यते पुष्पडल्लिका । |
| पिटारी | - पिटकः पात्रभेदे स्यात् |
| पेटी | - पेटी पेटकमुच्यते ॥ 270 ॥ |
| मच्छरदानी | - चतुष्की स्यान्मशहरी |
| रस्सा | - स्थूलरज्जौ वराटकः । |
| तोसक | - तूलतल्पं तु तूलस्य शय्यायां कथ्यते बुधैः ॥ 271 ॥ |
| उलोंच | - उल्लोचश्च वितानं च प्रच्छदश्च समार्थकाः । |
| तकिया | - उपधानं तूपबर्हे |
| सूई | - सूची सूचकमुच्यते ॥ 272 ॥ |
| डोरा | - दोरको डोरकं डोरम् |
| गोली ताक | - अथ पिप्पलको भवेत् |
| बोतल | - काचकूपी तु सिंहाणं काचपात्रे निगद्यते ॥ 273 ॥ |
| शीशी | - कोशमर्मविदा प्रोक्ता खर्वा सा काचकूपिका । |
| हँसू | - कल्किनी दात्रमसिदः |

डल्लकमिति डल्लक इत्येकं वंशपात्रस्य नाम । डल्लकं वस्त्रसंयुतमिति ब्रह्मवैवर्त्तादय: । कण्डोल इति कण्डोल इत्येकं वंशनिर्मितपात्रस्य नाम । आधानिकेति पुष्पडल्लिका इत्येकं पुष्पादिरक्षणपात्रस्य नाम । पिटकइति पिटक इत्येकं वंशपात्रविशेषस्य नाम । पेटीति पेटी पेटक इतिद्वे लौहपात्रभेदस्य नाम । पेटीत्यमर: पिट्यते पिट शब्दसङ्घातयो: घञ्, गौरादित्वान्ङीष् । पेटकं पुस्तकादीनामिति मेदिनी । चतुष्कीति चतुष्की मशहरी इतिद्वे चतुष्क्या नाम्नी । चतुष्कीति मेदिनी, मशकहरीत्यपि बोध्यम् । स्थूलेति वराटक इत्येकं स्थूलरज्जोर्नाम । वराटक: स्थूलरज्जाविति विश्वप्रकाश: । तूलेति तूलतल्प इत्येकं तूलशय्याया नाम । उल्लोच इति उल्लोच वितान प्रच्छद इतित्रीणि उल्लोचस्य नामानि । उल्लोच इति शब्दकल्पद्रुम: । उपेति उपधान उपबर्ह इतिद्वे उपधानस्य नाम्नी । सूचीति सूची सूचक इतिद्वे सीवनद्रव्यविशेषस्य नाम्नी । दोरक इति दोरक डोरक डोर इतित्रीणि डोरस्य नामानि । हस्तादाकृष्य तड्डोरं क्षिप्तवान् पावकोपरीति भविष्यपुराणम् । अथेति पिपलक इत्येकं सीवनादिसूत्रगोलस्य नाम । पिप्पलकं सीवनसूत्रके इति मेदिनी । काचेति काचकूपी सिंहाण इतिद्वे काचपात्रस्य नाम्नी । सिंहाणंकाचपात्रं चेति विश्वप्रकाश: । कोषेति काचकूपिका इत्येकं क्षुद्रकाचकूप्या नाम । कल्किनी इति कल्किनी दात्र असिद् इतित्रीणि छेदन-साधनस्य नाम्नी । कल्किन्या तीव्रधारयेति पाकशास्त्रे नल: ।

खुरपी - खुरप्रो भूमिदारणम् ।। 274 ।।

खनती - खनकस्तु खन: पुंसि खनित्रमवदारकम् ।

कुदाल - भूमिदारणशस्त्रे तु कुद्दाल: परिकीर्त्यते ।। 275 ।।

कुल्हारी - काष्ठदारणशस्त्रे तु कुठार: परिकीर्त्यते ।

नहरनी - नखानां छेदने प्रोक्ता कविना नखरञ्जनी ।

टकुआ - वेधनी टङ्कनी तुल्ये कवीन्द्रै: परिकल्पिते ।। 276 ।।

सपटा - शणजे तु पटे शाणपट: प्राज्ञैरुदीर्य्यते ।

छनना - जालिनी कथ्यते प्राज्ञैर्यया दुग्धादि शोध्यते ।। 277 ।।

।। इति गृहोपकरणवर्ग: ।।

खुरेति खुरप्र इत्येकं भूमिदारणास्त्रविशेषस्य नाम । खनक इति खनक खन खनित्र इतित्रीणि अवदारणास्त्रविशेषस्य नामानि । भूमीति कुद्दाल इत्येकं भूमिदारणास्त्रविशेषस्य नाम । कुद्दालो भूमिदारणे इति मेदिनी । नखानामिति नखरञ्जनी इत्येकं नखरञ्जनाद्यस्त्रस्य नाम । वेधनीति वेधनी टङ्कनी इतिद्वे कागदे छिद्रादिविधातुः सूचिकाविशेषस्य नाम्नी । शणज इति शाणपट इत्येकं शणजपटस्य नाम । जालिनीति जालिनी इत्येकं दुग्धादिशोधनस्य नाम । जालिनीति पाकशास्त्रे नलः ।

॥ अथ परिधेयादिवर्गः ॥

| | |
|---|---|
| कपडा | - उद्दिश्यते कवीन्द्रेण कर्पटो वस्त्रवाससी । |
| सूती कपडा | - सौत्रन्तु फालं कार्पासं वादरञ्च प्रकीर्त्यते ॥ 278 ॥ |
| मसराईच कपडा | - अंशुकं वसनं मंजु-मसृणे वाससीष्यते । |
| मलमल | - मर्मरो वस्त्रभेदे स्यात् |
| मटिया कपडा | - वारिशः स्थूलशाटके ॥ 277 ॥ |
| पटोर | - पत्तोर्णञ्च पटोलञ्च पट्टवाससि कथ्यते । |
| रेशमी कपड़ा | - कौशेय-कृमिकोशोत्थवस्त्रे विद्वद्भिरिष्यते ॥ 280 ॥ |
| धोती | - अधोवस्त्रे तु धौतं स्यात् |
| साड़ी | - शाटी स्त्रीवाससीष्यते । |
| अंगौछा | - अङ्गोक्षा गात्रमार्जन्यामङ्गप्रोक्षाऽङ्गमार्जनी ॥ 281 ॥ |
| रूमाल | - नक्तकं करवस्त्रे स्यात् |
| पुराना कपड़ा | - जीर्णवस्त्रे पटच्चरः । |
| नया कपड़ा | - तन्त्रकं निष्प्रवाणि स्यात् |
| ओढ़ना | - निवीतं प्रावृतं भवेत् ॥ 282 ॥ |
| रजाई | - नीशारस्तत्प्रभेदे स्यात् |
| लोई | - वस्त्रभेदे तु रल्लकः । |

उदिति कर्पट वस्त्र वासस् इतित्रीणि वस्त्रसामान्यस्य नामानि । पटोऽस्त्री कर्पट इति रभसः । सौत्रमिति सौत्र फाल कार्पास वादर इति कार्पाससूत्रजवस्त्रस्य नामानि । फालं कार्पासवादरमित्यमरः । अंशुकमिति अंशुक वसन इतिद्वे सूक्ष्मसूत्रवस्त्रस्य नाम्नी, अंशुकमिति मेदिनी । मर्मर इति, मर्मर इत्येकं वस्त्रविशेषस्य नाम । मर्मरो वस्त्रभेदे इति व्याख्यासुधाकारधृतवचनम् । वराशिरिति वराशि इत्येकं स्थूल-सूत्रजवस्त्रस्य नाम । वराशिरित्यमरः । पत्तोर्णमिति पत्तोर्ण पटोल इतिद्वे पट्टवस्त्रस्य नाम्नी । पत्तोर्णमित्यनेकार्थसंग्रहः । पटोलश्च वस्त्रभेदे इति मेदिनी । कौशेयमिति कौशेय इत्येकं कृमिकोशजवस्त्रस्य नाम । कौशेयमित्यमरः । अघइति धौत इत्येकमन्तरीयवस्त्रस्य नाम । शाटीति शाटी इत्येकं स्त्रीपरिधेयवस्त्रस्य नाम । अङ्गोक्षेति अङ्गोक्षा गात्रमार्जनी अङ्गप्रोक्षा अंगमार्जनी इति चत्वारि गात्रमार्जनवस्त्रस्य नामानि । अङ्गानि उक्षति प्रोक्षति अनयेत्यङ्गोक्षा, एतेन अङ्गप्रोक्षाऽपि व्याख्याता । नक्तकमिति नक्तक इत्येकं करवस्त्रस्य नाम नक्तकमिति घर्मादिमार्जनकरस्थवस्त्रस्य नामेति व्याख्यासुधाकारः । जीर्णेति पटच्चर इत्येकं जीर्णवस्त्रस्य नाम । तन्त्रकमिति तन्त्रक निष्प्रवाणि इतिद्वे नवीनवस्त्रस्य नाम्नी । निवीतमिति निवीत प्रावृत इतिद्वे आच्छादनवस्त्रस्य नाम्नी । नीशार इति नीशार इत्येकं शीतादिवारकवस्त्रस्य नाम । वस्त्रेति रल्लक इत्येकं वस्त्रविशेषस्य नाम ।

फटाचिटा वस्त्र - वस्त्रे तु जर्जरे कन्थामामनन्ति विपश्चितः ।। 283 ।।

चादर (तौलौ) - संव्यानमुत्तरासङ्गः प्रावारः कथ्यते बुधैः ।

दुशाला - द्विशालश्चोर्णनीशारो निवीतभिदि कथ्यते ।। 284 ।।

अलमान - राङ्कवं लोमवस्त्रे स्यात्

खादी - खल्लो वस्त्रप्रभेदके ।

टुकडा (कपड़े का)-लक्तकः खण्डवस्त्रे स्यात्

झालर - आञ्चलो वस्त्रखण्डके ।। 285 ।।

बुरका - वरकाऽऽप्रपदीने तु स्यूतवस्त्रे निगद्यते ।

लहँगा - अर्द्धोरुकन्तु विबुधैश्चण्डातकमुदीर्य्यते ।। 286 ।।

झाँप - कथ्यते प्रच्छदपटं प्राज्ञैः प्रावारवाससि ।

खोल - प्रच्छदस्य पटे पुंसि निचोलः कथ्यते बुधैः ।। 287 ।।

अंगिया - अङ्गिका कञ्चुकी चैव

ब्लाउज - तद्भेदे चार्द्धचोलकम् ।

चोली - कूर्पासकस्तु चोली स्यात् चोलः कञ्चुकमित्यपि ।। 288 ।।

अँगरखा - अङ्गत्राणं तु विद्वद्भिरंगरक्षो निगद्यते ।

चपकन - अंगरक्षविशेषे तु ब्रूते तन्ववनं सुधीः ।। 289 ।।

सिरमानी - कविः शरीरत्राणीन्तु ब्रूते वस्त्रस्य संभिदि ।

वस्त्र इति कन्था इत्येकं जर्जरवस्त्रस्य नाम । संव्यानमिति संव्यान उत्तरासंग प्रावार इतित्रीणि संव्यानस्य नामानि । द्विशाल इति द्विशाल ऊर्णनीशार इतिद्वे ऊर्णनीशारस्य नाम्नी । राङ्कवमिति राङ्कव इत्येकं लोमघटितवस्त्रस्य नाम । राङ्कवमित्यमरः । खल्ल इति खल्ल इत्येकं हस्तनिर्मितवस्त्रस्य नाम । खल्लो वस्त्रप्रभेदे इति मेदिनी । लक्तकइति लक्तक इत्येकं वस्त्रखण्डस्य नाम। आञ्चलइति आञ्चल इत्येकं क्षुद्रवस्त्रखण्डस्य नाम । वरकेति वरक आप्रपदीन इतिद्वे शरीराच्छादकवस्त्रविशेषस्य नाम्नी । वरकं स्यूतवत्रेऽपीति रामाश्रमीकारः। आप्रपदीनमित्यमरः । अर्द्धोरुकमिति अर्द्धोरुक चण्डातक इतिद्वे वस्त्रभेदस्य नाम्नी, अर्द्धोरुकं चण्डातकमित्यमरः। कथ्यत इति प्रच्छदपट इत्येकं दोलिकाद्यच्छादकवस्त्रस्य नाम । प्रच्छदस्येति निचोल इत्येकमुपधानाद्यावरकस्त्रस्य नाम । अंगिकेति अंगिका कञ्चुकी इतिद्वे अंगिकाया नाम्नी । तद्भेद इति अर्द्धचोलक इत्येकं चोलभेदस्य नाम। अर्द्धचोलकमिति शब्दकल्पद्रुमः । कूर्पेति कूर्पासक चोली चोल कञ्चुक इति चत्वारि चोल्या नामानि । चोलश्चोलीति शब्दकल्पद्रुमः कूर्पासक इत्यमरः। अंगेति अङ्गत्राण अङ्गरक्ष इतिद्वे अङ्गरक्षस्य नाम्नी । अंगेति तन्ववनम् इत्येकमंगरक्षभेदस्य नाम । कविरिति शरीरत्राणी इत्येकमंगरक्षविशेषस्य नाम ।

बगलबन्दी - पार्श्वबन्धी वस्त्रभेदे

गञ्जी - गात्राञ्जी तत्प्रभेदके ॥ 290 ॥

कोट - कायोतः स्यात्तु कायत्रः

कुरता(झब्बा) - कायत्रा युतकं भवेत् ।

कमीज - अर्द्धोरुपा कवीन्द्रेण वस्त्रभेदे निगद्यते ॥ 291 ॥

ब्राउनकोट - अतिलम्बे त्वंगरक्षे बृहत्कायोत उच्यते ।

वाटरप्रूफ - वारिरक्षविशेषे तु वारिप्रुव उदीर्य्यते ॥ 292 ॥

पैण्ट - कटित्रन्तु कटित्राणम्

हाफपैण्ट - तद्भेदे तु कटित्रकम् । भाष्यतेऽर्द्धकटित्रञ्च

जंघीया - जंघीया मङ्क्षुणं भवेत् ॥ 293 ॥

सर्ट - वस्त्रभेदे शरीरत्रम्

दस्ताना - अंगुलित्रन्तु तद्भिदि ।

हाफसर्ट - क्लीबे चार्द्धशरीरत्रं शरीरत्रकमुच्यते ॥ 294 ॥

कौपीन(लंगोटा) - कौपीनं वस्त्रसंभेदे

जाकेट - उरस्त्रं वस्त्रभेदके ।

पायजामा - पादायामा तु पद्यामः

पैताबा - पादावो वस्त्रसंभिदि ॥ 295 ॥

पार्श्वेति पार्श्वबन्धी इत्येकं वस्त्रभेदस्य नाम । पार्श्वं बध्यते अनयेति पार्श्वबन्धी । गात्राञ्जीति गात्राञ्जी इत्येकं परिधेयवस्त्रभेदस्य नाम । गात्रमञ्जति रक्षति येति गात्राञ्जी घजन्तान्ङीप् । कायोतइति कायोत कायत्र इतिद्वे परिधेयवस्त्रविशेषस्य नाम्नी । उतःस्यूतवस्त्रविशेषः, कायस्य स इति कायोतः, कायपदं स्वावयवे औपचारिकम्, एतेन कायत्रोऽपि व्याख्यातः । कायेति युतक कायत्रा इतिद्वे वस्त्रभेदस्य नाम्नी । कायं त्रायते अनयेति कायत्रा-कायत्रशब्दयोः प्रवृत्तिनिमित्ताभेदेऽपि विलक्षणार्थबोधकत्वं शब्दस्वभावाद्बोध्यम् । अर्द्धोरुपेति अर्द्धोरुपा इत्येकं वस्त्रविशेषस्य नाम ।

अर्द्धमुरु पाति रक्षतीत्यर्द्धोरुपा । अतीति बृहत्कायोत इत्येकं वस्त्रभेदस्य नाम। अत्र बृहत्कायत्र इत्यप्यूह्यम् । वारीति वारिप्रुव इत्येकं वारिरक्षकवस्त्रविशेषस्य नाम । कटीति कटित्र कटित्राण इतिद्वे वस्त्रविशेषस्य नाम्नी । कटित्रं तु कटीवस्त्रे इति हेमचन्द्रः । तदिति कटित्रक अर्द्धकटित्र इतिद्वे अर्द्धकटित्रस्य नाम्नी । क्षुद्रं कटित्रं कटित्रकम् । जङ्घीयेति जंघीया मङ्क्षुण इतिद्वे जंघात्राणस्य नाम्नी। जङ्घाया इयं जंघीया, न चात्र छो दुर्लभः, आदिवृद्धित्वविरहात् नामधेयत्वेन तु क्रोडीकर्त्तुमशक्यम्, शब्दप्रकारकबोधजनकत्वव्यतिरकेण संज्ञात्वाभावात् । गहादित्वकल्पनन्त्वंप्रामाणिकम् इतिचेन्न, घटीय-सूत्रीयादिशिष्टप्रयोगदर्शनेन नामपदेन क्रियाप्रवृत्तिनिमित्तकादीनामपि संग्रहस्येष्टत्वात् अतएव धेयपदं कृतार्थम् । तादृशशिष्टप्रयोगाणां गहादित्वकल्पकत्वे तु ममाप्यभीष्टं प्रत्याख्यातुं न शक्यत एवेति बिबुधैरवधेयम् । जंघात्राणन्तु मङ्क्षुणमिति हारावली ।

पाकेट - प्रधानी स्यादङ्गिकादेः कोषाधाने बुधैर्मता ।

पगडी - शीर्षण्यञ्च शिरस्कञ्च क्लीबे चोष्णीषमुच्यते ॥ 296 ॥

लोहे की पगडी - शिरस्त्रं स्यात् शिरस्त्राणम्

कैप (टोपी) - कायपः स्यात् शिरस्किका ।

मुरेठा (साफा) - मूर्द्धवेष्टा शिरोवेष्टः

पट्टी - पट्टः स्याद्वेष्टनीभिदि । 297 ॥

टोप - हौणशिरस्कमुष्णीषभेदे विद्वद्भिरिष्यते । ,

गलबन्द (मफलर)- सूत्राली गलबन्धः स्यात्

मुकुट - किरीटं मुकुटं स्मृतम् ॥ 298 ॥

खडाऊँ - पादत्राणे तु काष्ठस्य पादुका परिकीर्त्यते ।

वस्त्रेति शरीरत्र इत्येकं वस्त्रभेदस्य नाम । अंगुलीति अङ्गुलित्र इत्येकं वस्त्रभेदस्य नाम । क्लीबइति अर्द्धशरीत्रक शरीरत्र इतिद्वे अर्द्धशरीरत्रस्य नाम्नी । कौपीनमिति कौपीन इति वस्त्रभेदस्य नाम । उरस्त्रमिति उरस्त्र इत्येकं वस्त्रभेदस्य नाम । पादेति पादायामा पद्याम इतिद्वे पादरक्षकवस्त्रस्य

नाम्नी । पादौ आयच्छति व्याप्नोतीति पादायामा एतेन पद्यामोऽपि विवृत: । पादाव इति पादाव इत्येकं वस्त्रविशेषस्य नाम । पादौ अवतीति पादाव: । प्राधानीति प्राधानी इत्येकमङ्गिकादे: कोषाधानस्य नाम । प्रकर्षेण आधीयते द्रव्यादि रक्ष्यते यत्रेति प्राधानी अधिकरणे ल्युट् । शीर्षण्यमिति शीर्षण्य शिरस्क उष्णीष इतित्रीणि उष्णीषस्य नामानि । शिरस्त्रमिति शिरस्त्र शिरस्त्राण इति द्वे शिरस्त्राणस्य नाम्नी । कायप इति कायप शिरस्त्रिका इतिद्वे लघुशिरस्कस्य नाम्नी । कायं पाति रक्षतीति कायप: । कायपदमत्राप्यौपचारिकम् । मूर्द्धेति मूर्द्धवेष्टा शिरोवेष्ट इतिद्वे शिरोवेष्टस्य नाम्नी । पट्ट इति पट्ट इत्येकं वेष्टनवस्त्रस्य नाम । पट्टो व्रणादिबंधिनी इति मेदनी । हौणेति हौणशिरस्क इत्येकं पाश्चात्यपरिधेयस्योष्णीषस्य नाम । सूत्रालीति सूत्राली गलबन्ध इतिद्वे गलबन्धस्य नाम्नी । सूत्रालीति हारावली । किरीटमिति किरीट मुकुट इतिद्वे राजपरिधेयशीर्षण्यस्य नाम्नी । पादेति पादुका इत्येकं काष्ठघटितपादत्राणस्य नाम ।

जूता - पादत्राणमुपानत् स्त्री पादू: पादरथी भवेत् ।। 299 ।।

फौजीबूट - कविभि: प्रोच्यते सैन्याऽनुपदीना तत्प्रभेदके ।

बूट - कविनाऽनुपदीना तु पादत्राणभिदि स्मृता ।। 300 ।।

पनही (देशी जूता ) - पन्नद्धी चैव पन्नद्धा देशीयोपानहि स्मृता ।

हाफ जूता - उपानत्कां स्त्रियामर्द्धोपानहं चक्षते बुधा: ।। 301 ।।

चट्टी - बुधैश्चरणरथ्यां तु पार्ष्णिपा परिकीर्त्यते ।

चप्पल - कविश्चरणपालञ्च ब्रूते चरणपामपि । 302 ।।

नेकटाई - ग्रीवाबन्धस्तु ग्रीवात्रं कैश्चद्ग्रैवेयकं स्मृतम् ।

छत्ता - आतपत्रं भवेच्छत्रमातपत्राणकारिणि ।। 303 ।।

।। इति परिधेयादिवर्ग: ।।

पादेति–पादत्राण उपानह पादू पादरथी इति चत्वारि उपानहो नामानि । कविभिरिति सैन्यानुपदीना इत्येकं सैन्योचितपादत्राणस्य नाम । कविनेति अनुपदीना इत्येकं पादूविशेषस्य नाम । पन्नद्धीति पन्नद्धी पन्नद्धा इतिद्वे

पादूविशेषस्य नाम्नी । पन्नद्धी पादरथीति त्रिकाण्डशेष: । पन्नद्धेति हेमचन्द्र: । उपानत्कामिति उपानत्का अर्द्धोपानह् इतिद्वे पादूविशेषस्य नाम्नी । बुधैरिति चरणरथा पार्ष्णिपा इतिद्वे पादूभेदस्य नाम्नी । कविरिति चरणपाल चरणपा इति पादत्रविशेषस्य नाम्नी । ग्रीवेति ग्रीवाबन्ध ग्रीवात्र ग्रैवेयक इतित्रीणि ग्रीवावस्त्रस्य नामानि । अत्र ग्रैवेयकपदोपादानमसङ्गतमिव प्रतिभाति, तस्य भगवतो भूषाविशेषे रुढत्वात् योगशक्तिमपेक्ष्य रूढे र्बलीयस्त्वात् इत्येवारुचिं कैश्चित्पदेन सूचयति प्रदीपकार: । ननु व्युत्क्रमेण सङ्गतिभङ्ग इतिचेन्न, स्मृतिविषयत्वे सति उपेक्षानर्हत्वरूपसंगते: स्फूर्तिपरवशतया तदनुरोधेन व्युत्क्रमेऽपि सङ्गतिसम्भवात् । आतपेति छत्र आतपत्र इतिद्वे छत्रस्य नाम ।

## ।। अथ शाकान्नवर्ग: ।।

| | |
|---|---|
| कच्चा साग | - शिग्रु-हरितके तुल्ये |
| करमी | - कडम्बी शतपर्वणि |
| गेनारी साग | - गान्धारी तुण्डली तुल्ये |
| पुदीना | - पुदिन: स्यात्पुनर्नवा ।। 304 ।। |
| पटुआ | - नाडीके पट्टशाक: स्यात् |
| रैंची (राई) | - राज्युक्ता राजिका बुधै: । |
| तिलकोड़ | - तुण्डिकेरी तु बिम्बी स्यात् |
| सरहच्ची | - सर्पाक्षी शाकसंभिदि ।। 305 ।। |
| पलाँकी | - पालङ्क्यं स्यात्तु पालङ्की |
| आदी | - शृङ्गवेरं तथार्द्रकम् । |
| आलु [पटाटो] | - अस्त्रियामालुरालूकम् |
| सूरन (ओल) | - ओल ओल्लश्च सूरण: ।। 306 ।। |
| कद्दू | - लाबुर्महाफला तुम्बी तुम्ब आलाबुरुच्यते । |
| करैल | - कारवेल्ल: कटिल्ल: स्यात् |
| प्याजु | - पलाण्डु र्मुखदूषण: ।। 307 ।। |

कोला - काशीफले तु कर्कारुः कूष्माण्डश्च बृहत्फला ।

इदमत्र विज्ञेयं प्राज्ञैः- शाकान्नवर्गे प्रायः सर्वे शब्दाः शब्दकल्पद्रुमोक्ता एव कविना निरदिश्यन्त । तत एव तत्तच्छब्दे प्रामाण्याय कोशोल्लेखो नातीवाश्यक इत्युपेक्ष्यते । यत्र तु किञ्चिद्वैलक्षण्यं तत्रैव तदुपष्टम्भकं निर्दिश्यते । शिग्रुरिति शिग्रु हरितक इतिद्वे अपाचितशाकस्य नाम्नी । कडम्बीति कडम्बी शतपर्वन् इतिद्वे कर्दमे जायमानस्य शाकस्य नाम्नी । गान्धारीति गान्धारी तुण्डली इतिद्वे शाकभेदस्य नाम्नी । पुदिन इति पुदिन पुनर्नवा इतिद्वे पुनर्नवाया नाम्नी । नाडीकमिति नाडीक पट्टशाक इतिद्वे पट्टशाकस्य नाम्नी । राजीति राजी राजिका इतिद्वे राजिकाया नाम्नी । तुण्डीति तुण्डीकेरी विम्बी इतिद्वे विम्ब्या नाम्नी । सपार्क्षीति सर्पाक्षी इत्येकं शाकभेदस्य नाम । पालङ्क्य इति पालङ्क्य पालङ्की इतिद्वे पालङ्कशाकस्य नाम्नी । शृंगेति शृंगवेर आर्द्रक इतिद्वे आर्द्रकस्य नाम्नी । अस्त्रियामिति आलु आलूक इतिद्वे आलोर्नाम्नी । स्यादालु र्भेलकन्दयोदित्यभिधानचिन्तामणि-परिशिष्टम् । ओलइति ओल ओल्ल शूरण इतित्रीणि ओलस्य नामानि । ओलश्च शूरणे पुंसीति मेदिनी । ओल इतिशब्दकल्पद्रुमः । लावुरिति लावु महाफला तुम्बी तुम्ब आलाबुइतिपञ्च अलाबोर्नामानि । कारेति कारवेल्ल कटिल्लः इतिद्वे कटिल्लस्य नाम्नी । पलाण्डुरिति पलाण्डु मुखदूषण इतिद्वे पलाण्डोर्नाम्नी । काशीति काशीफल कर्कारू कुष्माण्ड बृहत्फला इति चत्वारि काशीफलस्य नामानि ।

लसुन - रसोनो लशुनस्तुल्यौ

सकरकन्द - रक्तालुः कन्दसंभिदि ॥ 308 ॥

सलगम - स्थूलमूलन्तु वानेयम्

मेथी - बीजा मेथी तु मेथिका ।

गाजर - गृञ्जनं गाजरं तुल्ये

मूली (मूर) - मूलकं हस्तिदन्तकम् ॥ 309 ॥

वैगन (भाटा) - वृन्ताकं वङ्गणं क्लीवे भण्टाकी भण्टिका स्त्रियाम् ।

ननुआ (घेड़ा) - शाकभेदे महाजाली

पिडार - पिण्डारं शाकसंभिदि ।। 310 ।।

चठैल (टण्डोला) - कर्कोटकी पीतपुष्पी

छिमी - शिम्बा स्यात् शिम्विका तथा ।

झिगनी - झिङ्गिनी जिङ्गिनी प्रोक्ता सुनिर्यासा प्रमोदिनी ।। 311 ।।

सीम - कोलशिम्बी तु खङ्गा स्यात्

कैंता - ज्योत्स्ना जाली निगद्यते ।

परवल - पण्डोलश्च पटोलश्च

धनी - धन्याकं स्यात् धनीयकम् ।। 312 ।।

छोटा करेला - कारवेल्ली लघुः ख्याता

नोनिया - लोणी लोणा तु घोलिका ।

मिरचा - कथ्यते रक्तमरिचः कटुवीरा च पण्डितैः ।। 313 ।।

रसोनइति रसोन लशुन इतिद्वे लशुनस्य नाम्नी । रक्तालुरिति रक्तालु इत्येकं कन्दभेदस्य नाम । स्थूलेति स्थूलमूल वानेय इति द्वे स्थूलमूलाख्यशाकस्य नाम्नी । बीजेति बीजा मेथी मेथिका इतित्रीणि बीजाया नामानि । मेथी मेथिकेति पाकशास्त्रे नलः । गृञ्जनमिति गृञ्जन गाजर इतिद्वे गृञ्जनस्य नाम्नी । गृञ्जन गाजर इतिशब्दकल्पद्रुमः । मूलकमिति मूलक हस्तिदन्तक इतिद्वे मूलकस्य नाम्नी । वृन्ताकमिति वृन्ताक वङ्गण भण्टाकी भण्टिका इति चत्वारि भण्टिकाया नामानि । वङ्गण भण्टाकीति शब्दकल्पद्रुमः । शाकेति महाजाली इत्येकं शाकभेदस्य नाम । पिण्डारमिति पिण्डार इत्येकं शाकविशेषस्य नाम । कर्कोटकीति कर्कोटकी पीतपुष्पी इतिद्वे शाकभेदस्य नाम्नी । शिम्बा शिम्बा शिम्बका इतिद्वे शिम्बिकाया नाम्नी । झिङ्गिनीति झिङ्गिनी जिङ्गिनी सुनिर्य्यास प्रमोदिनी इति चत्वारि प्रमोदिन्या नामानि । शाकभेदस्य नाम्नी । कोलेति कोलशिम्बी खङ्गा इतिद्वे खंगाया नाम्नी । ज्योत्स्नेति ज्योत्स्ना नाली इति द्वे शाकभेदस्य नाम । पण्डोल इति पण्डोल

पटोल इति द्वे पटोलस्य नाम्नी । धन्याकमिति धन्याक धनीयक इतिद्वे धन्याकस्य नाम्नी । कारेति कारवेल्ली इत्येकं लघुकटिल्लस्य नाम । लोणीति लोणी लोणा घोलिका इतित्रीणि लोणाया नामानि । कथ्यत इति रक्तमरिच कटुवीरा इतिद्वे रक्तमरिचस्य नाम्नी ।

मुनिगा - मुण्डिका मुद्गपर्णी स्यात्

सोहिजन - शोभाञ्जन-शुभाञ्जनौ ॥ 314 ॥

खीरा - त्रपुसं स्यात् सुधावासा

अरुवी - राजालुस्त्वालुकी भवेत्

कञ्चु - कञ्चुका जञ्चुकेकार्थौ

पौरे [पोहका] - पोदिका पूतिका स्मृता ॥ 315 ॥

वथुआ - वास्तूकं क्षारपत्रे तु विद्वद्भिः परिकीर्त्यते ।

मुद्गेति मुद्गपर्णी मुंडिका इतिद्वे मुद्गाया नाम्नी । मुण्डिकेति पाकशास्त्रे नलः । शोभेति शुभाञ्जन शोभाञ्जन इतिद्वे शोभाञ्जनस्य नाम्नी । त्रपुसमिति त्रपुस सुधावासा इतिद्वे मूत्रफलाया नाम्नी । राजालुरिति राजालु आलुकी इतिद्वे आलुक्या नाम्नी । कञ्चुकेति कंञ्चुका कञ्चु इतिद्वे कञ्चोर्नाम्नी पोदिकेति पोदिका पूतिका इतिद्वे पोदिकाया नाम्नी । वास्तूकमिति वास्तूक क्षारपत्र दतिद्वे क्षारपात्रस्य नाम्नी ।

अनाज (फसल) - शदः प्रसव एकार्थौ पण्डितैः परिकीर्त्तितौ ॥ 316 ॥

धान - धान्यं व्रीहिः स्तम्बकरिः

चावल - कलमे शालितण्डुलौ

तुअर - रहडी तूवरोऽक्लीबे

कराव - कलायः खण्डिको भवेत् ॥ 316 ॥

गेहूँ - गोधूमः सुमने प्रोक्तः

बोरा - राजमाषस्तु वर्वटः

मकै - मकायस्तु महाकायः क्षेत्रेक्षुः कथ्यते बुधैः ॥ 318 ॥

बजरा - वर्जरी तु भवेन्नाली

चना - चर्णे स्याच्चणकश्चनः ।

कौन - प्रियङ्गुः कङ्गुरेकार्थौ

मूँग - मुद्गः सुफल उच्यते ॥ 319 ॥

खेसारी - खञ्जकारिस्तु सुस्ना स्यात्

ओइरी - ओडी नीवार इष्यते

मसुर - तुल्यौ मसूर मङ्गल्यौ

कोदो - अन्नभेदे तु कोद्रवः ॥ 320 ॥

कुलथी - कुलत्थश्च कुलित्थश्च कुलत्थी स्त्री निगद्यते ।

शदइति शद प्रसव इतिद्वे धान्यादिक्षेत्रोत्पन्नवस्तुनो नाम्नी । स्वामिने तु शदं दाप्य इति कुल्लूकभट्टधृतव्यासवचनम् । प्रसव इति मेदिनी-हेमचन्द्रौ । धान्यमिति धान्य व्रीहि स्तम्बकरि इतित्रीणि धान्यसामान्यस्य नामानि । कलम इति कलम शालि तण्डुल इतित्रीणि तण्डुलस्य नामानि । रहडीति रहडी तूबर इतिद्वे तूबर्य्या नाम्नी । कलायइति कलाय खण्डिक इतिद्वे खण्डिकस्य नाम्नी । गोधूम इति गोधूम सुमन इतिद्वे गोधूमस्य नाम्नी । राजेति राजमाष वर्वट इतिद्वे वर्वटस्य नाम्नी । मकायइति मकाय महाकाय क्षेत्रेक्षु इति त्रीणी मकायस्य नामानि । बर्जरीति वर्जरी नाली इतिद्वे नाल्या नाम्नी । चण इति चण चणक चन इतित्रीणि चनान्नस्य नामानि। प्रियङ्गुरिति प्रियङ्गु कंगु इतिद्वे कङ्गोर्नाम्नी । मुद्ग इति मुद्ग सुफल इतिद्वे सुस्नाया नाम्नी । ओडिति ओडी नीवार इतिद्वे नीवारस्य नाम्नी । तुल्याविति मसूर मङ्गल्य इतिद्वे मसूरस्य नाम्नी । अन्नेति कोद्रव इत्येकं धान्यभेदस्य नाम । कुलत्थ इति कुलत्थ कुलित्थ कुलत्थी इतित्रीणि कुलत्थस्य नामानि ।

जौ - यवो यवक एकार्थौ

जुवार - याबनालस्तु जुर्णलः ॥ 321 ॥

मडुवा - प्रोच्यते मण्डकः प्राज्ञै मण्डूकश्च मलीयसः ।

| | |
|---|---|
| चीन | - सुश्लक्ष्णा चीनकश्चीनः । |
| गमरी | - वृष्टिशालिस्तु षष्टिजः ।। 322 ।। |
| वेसन | - वेसनं चूर्णसंभेदे |
| आँटा | - समीदेऽपूप्य-चिक्कसौ |
| मेदा | - मण्डा तु समिता तुल्ये |
| तोरी | - तोरी तीक्ष्णफला भवेत् ।। 323 ।। |
| आसु | - आशुर्व्रीहिः समानार्थौ |
| अलसी | - अतिसी स्यान्मदोत्कटा |
| परथन | - पिष्टभेदे तु विबुधा आमनन्त्युपकारिकाम् ।। 324 ।। |

।। इति शाकान्नवर्गः ।।

यवइति यव यवस्य नाम्नी । यावेति यावनाल जूर्णल इतिद्वे जूर्णस्य नाम्नी । प्रोच्यत दति मडक मण्डूक मलीयस इतित्रीणि मण्डकस्य नामानि । सुश्लक्ष्णेति सुश्लक्षणा चीनक चीन इतित्रीणि चीनकस्य नामानि । चीनइति विश्वप्रकाशः । वृष्टीति वृष्टिशालि षष्टिज इतिद्वे वृष्टिजान्नस्य नाम्नी । वेसनमिति वेसन इत्येकं चूर्णविशेषस्य नाम । वेसनमिति हेमचन्द्र शब्दकल्पद्रुमादयः । समीदइति समीद अपूप्य चिक्कस इतित्रीणि अपूप्यस्य नामानि । चिक्कस इत्यभिधानचिन्तामणिः, यद्यप्ययं शब्दो यवक्षोदे कोशे निर्दिष्टः तथापि तस्योपलक्षणत्वं व्यवहारबलात्कल्प्यते । मण्डेति मण्डा समिता इतिद्वे चूर्णभेदस्य नाम्नी । गोधूमा धवला धौताः कुट्टिताः शोषितास्ततः, प्रोक्षिताश्च विनिःपिष्टाश्चालिताः समिताः स्मृता इति राजनिघण्टुः ।

तोरीति तोरी तीक्ष्णफला इतिद्वे सर्षपभेदस्य नाम्नी । आशुरिति आशु व्रीहि इतिद्वे व्रीहिविशेषस्य नाम । अतिसीति अतिसी मदोत्कटा इतिद्वे अतिस्या नाम्नी । पिष्टेति उपकारिका इत्येकं यया शष्कुल्यादि वेल्ल्यते तादृक्पिष्टविशेषस्य नाम । उपकारिकेति मेदिनी ।

।। फलपुष्पादिवर्गः ।।

मेवा - वानं शुष्के फले प्रोक्तम्

कुच्चाफल - शलाटुश्चाम इष्यते ।

अङ्गूर - मृद्वीका तु भवेद् द्राक्षा

किसमिस - स्यादबीजा तु काकली ॥ 325 ॥

अंजीर - अञ्जीरं फलभेदे स्यात्

बदाम - वदामः फलभेदके ।

स्यौ - फलभेदे तु सेवं स्यात्

अमला - धात्र्यामामलकी भवेत् ॥ 326 ॥

अमरा - आम्रातके स्यादाम्रातः

ककड़ी - उर्वारुः कर्कटि र्भवेत् ।

कमरख - कर्मरकः कर्मरगः

फुँटि - चिर्भटी स्फुटिरुच्यते ॥ 327 ॥

करौना - अविग्नः स्यात्करामर्दः

कथ - कपित्थं फलभेदकं ।

खजूर - खर्जूरी तु भवेत्खर्जूः

तरबूज - खर्बूजं स्यात्तरम्बुजम् ॥ 328 ॥

अत्र प्रकरणे वृक्षसाधारण्येनाभिधानानि निरदिश्यन्त प्रदीपकारैरत एव यथायथं प्रत्ययं विधाय स्वाभीष्टार्थे शब्दाः प्रयोक्तव्या विनेयैः । वानमिति वान इत्येकं शुष्कफलस्य नाम । वानं शुष्कफलम् इति मेदिनी-हेमचन्द्रौ । शलाटुरिति शलाटु इत्येकमशुष्कफलस्य नाम । आमे फले शलाटुरित्यमरः । मृद्वीकेति मृद्वीका द्राक्षा इतिद्वे मधुरसाया नाम्नी । स्यादिति अबीजा काकली इतिद्वे लघुद्राक्षाया नाम्नी । अञ्जीरमिति अञ्जीर इत्येकं फलभेदस्य नाम । अञ्जीरमिति शब्दकल्पद्रुमः । वदाम इति वदाम इत्येकं वादामस्य नाम, वदाममिति शब्दकल्पद्रुमः । फलेति सेव इत्येकं फलभेदस्य नाम । सेवमिति शब्दकल्पद्रुमः धात्र्यामिति धात्री आमलक इतिद्वे धात्र्या नाम्नी ।

आम्रातक इति आम्रातक आम्रात इतिद्वे आम्रातस्य नाम्नी । उर्वारुरिति उर्वारु कर्कटि इतिद्वे कर्कटीफलस्य नाम्नी । उर्वारुरितिरत्नकोष: । कर्गरक कर्मरङ्ग इति द्वे कर्मरङ्गस्य नाम्नी । चिर्भटीति चिर्भटी स्फुटि इतिद्वे स्फुटेर्नाम्नी । स्फुटिरिति शब्दकल्पद्रुम: । अविग्नइति अविग्न करामर्द इतिद्वे अविग्नस्य नाम्नी । कपित्थमिति कपित्थ इत्येकं फलभेदस्य नाम । खर्जूरीति खर्जूरी खर्जू इतिद्वे खर्जूरस्य नाम्नी । खर्बूजमिति खर्बूज तरम्बुज इतिद्वे खर्बूजस्य नाम्नी । फलं दत्तं तरम्बुजमित्युत्तरकामाख्यातन्त्रम् ।

अखरोट - फले क्लीबे तरौ पुंस्यखरोटाक्षोटपीलव: ।

नारिकेर - नारकेलिस्तु विबुधैर्नारिकेर उदीर्य्यते ।। 329 ।।

सुपारी - पूगी गुवाक गूवाकौ सूपारि: क्रमुको मता: ।

सरही आम - काननाम्रो घनस्कन्ध: कोशाम्र: स्यु: समार्थका: ।। 330 ।।

कलमी आम -बुधै राजफले राजाम्र: कामाह्व उदीर्य्यते ।

कटहर - कण्टकिफले तु पनस:

केला - रम्भा स्यात् कदली समा ।। 331 ।।

छोहारा - खर्जूरिकायां छोहारा गोस्तनी चापि कथ्यते ।

काजु - फलस्य भेदे विबुधै: काजूतकमुदीर्य्यते ।। 332 ।।

आता - आतृप्यं फलभेदे स्यात्

तेतडि (ईमली) - चिञ्चायां तिन्तिडी स्मृता ।

तूँति - मृदुसारे तूततूदौ

तेनु - तिन्दुकं फलभेदके ।। 333 ।।

दाड़िन - दाडिमो रक्तबीज: स्यात्

पिस्ता - पिस्तमंकोट उच्यते ।

फल इति अखरोट अक्षोट पीलु इतित्रीणि पीलुवृक्षस्य नामानि । नारीति नारिकेल नारिकेर इतिद्वे नारिकेरस्य नाम्नी । नारिकेलि-नारिकेराविति शब्दकल्पद्रुम: । पूगीति पूगी गुवाक गूवाक सूपारि क्रमुक इतिपञ्च

सूपारेनामानि । पूगे क्रमुकगूवाकावित्यभिधानचिन्तामणिः, गुवाकोऽपि च गूवाक इति तारपालः । काननाम्रइति काननाम्र घनस्कन्ध कोशाम्र इतित्रीणि वन्यचूतस्य नामानि । बुधैरिति राजफल राजाम्र कामाढ्व इतित्रीणि राजफलस्य नामानि । कण्टकीति कण्टकिफल पनस इतिद्वे पनसस्य नाम्नी । रम्भेति रम्भा कदली इतिद्वे रम्भाया नाम्नी । खर्जूरिकायामिति खर्जूरिका छोहारा गांस्तनी इतित्रीणि खर्जूरिकाया नामानि । फलस्येति काजूतक इत्येकं फलभेदस्य नाम । आतृप्यमिति आतृप्य इत्येकं फलभेदस्य नाम । आतृप्यमिति शब्दकल्पद्रुमः । चिञ्चायामिति चिञ्चा तिन्तिडी इतिद्वे अम्लिकाया नाम्नी । मृद्विति मृदुसार तूत तूद इतित्रीणि मृदुसारस्य नाम्नी । तूद इत्यमरः। तिन्दुकमिति तिन्दुक इत्येकं फलविशेषस्य नाम । तिन्दुकः स्फूर्जक इत्यमरः । दाडिम इति दाडिम रक्तबीज इतिद्वे दाडिमस्य नाम्नी । पिस्तमिति पिस्त अक्षोट इतिद्वे निचोलकस्य नाम्नी ।

| | |
|---|---|
| जामुन | - जाम्बवं जम्बु जम्बूः स्यात् |
| बरहर | - लकुचोऽडहुरुच्यते ॥ 334 ॥ |
| गुहंारी | - गोधावल्ली तु गोधाङ्घ्रिः |
| हरुसा | - परुषामरुपा भवेत् । |
| सरीफा | - सीताफलं कृष्णबीजम् |
| हरफा | - लवली तु घना स्मृता ॥ 335 ॥ |
| करहर | - कह्लारश्चैव शालूकम् |
| मखा | - मखान्नं वारिजे फले |
| वैर | - कर्कन्धूर्बदरी कोली तत्फलं बदरं स्मृतम् ॥ 336 ॥ |
| मूंगफली | - भूमिशिम्बा तु विबुधैस्त्रिबीजायां निगद्यते । |
| अनानास | - फलभित्स्यादनन्नासम् |
| अमरुद | - दृढबीजं तु पूरकम् ॥ 337 ॥ |
| पपीत | - अण्डखर्जूः कवीन्द्रेण प्रोच्यते मधुकर्कटी । |

नीबू - निम्बूकं निम्बुकं निम्बूः

कागजी नीबू - वह्निबीजे तु रोचकम् ॥ 338 ॥

जम्बीरी - जम्बीरं तत्प्रभेदे स्यात्

जाम्बवमिति जाम्बव जम्बु जम्बू इतित्रीणि जम्वुनां नामानि । लकुच इति लकुच अडहु इतिद्वे फलविशेषस्य नाम्नी । अडहुरिति स्वामी । गोधेति गोधावाल्री गोध्राङ्घ्रि इतिद्वे फलभेदस्य नाम्नी । परुषमिति परुष अरुसा इतिद्वे परुषस्य नाम्नी । सीतेति सीताफलस्य नाम्नी । लवलीति लवली घना इतिद्वे घनाया नाम्नी । कह्लारमिति कल्हार शलूक इतिद्वे शालूकस्य नाम्नी । मखान्नमिति मखान्न इत्येकं जलोत्पन्नफलविशेषस्य नाम । कर्कन्धूरिति कर्कन्धू बदरी कोली इति बदरीवृक्षस्य नामानि । तत्फलस्य तु बदरमित्येकं नाम । भूमिति भूमि शिम्बा त्रिबीजा इतिद्वे त्रिबीजाया नाम्नी । फलेति अनन्नास इत्येकं फलविशेषस्य नाम । अन्नासमिति शब्दकल्पद्रुमः । दृढेति दृढबीज पूरक इतिद्वे फलवशेषस्य नाम्नी । अण्डेति अण्डखर्जूर मधुकर्कटी इतिद्वे मधुकर्कट्या नाम्नी । निम्बूकमिति निम्बूक निम्बुक निम्बू इतित्रीणि निम्बूकस्य नामानि । वह्नीति वह्निबीज रोचन इतिद्वे रोचननिम्बकस्य नाम्नी । जम्बीरमिति जम्बीर इत्येकं निम्बूप्रभेदस्य नाम ।

कमली नींबू - कुरुम्बस्तस्य भेदभृत् ।

टाभनीबू - रञ्जकं वीजपूरं तु मातुलुङ्गक उच्यते ॥ 339 ॥

नारङ्गी - नागरंगे तु नारंगः

शंखद्राव - तद्भेदे मधुकर्कटी ।

मींठा नीबू - पित्तद्रावी तु विबुधैर्मधुरे निम्बुके स्मृतः ॥ 340 ॥

तूनि - तूणिः फलविशेषे स्यात्, अथ पुष्पमुदीर्य्यते ।

कुरुम्ब इति कुरुम्ब इत्येकं मिष्टनिम्बूप्रभेदस्य नाम । कुरुम्ब इति शब्दचन्द्रिका । रञ्जकमिति रञ्जक बीजपूर मातुलुङ्गक इतित्रीणि निम्बूविशेषस्य नाम । नागेति नागरङ्ग नारङ्ग इतिद्वे मिष्टनिम्बूप्रभेदस्य नाम्नी । नागरङ्गे तु

नारङ्ग इति वाचस्पतिः । तदिति मधुकर्कटी इत्येकं निम्बभेदस्य नाम। पित्तेति पित्तद्राविन् इत्येकं मधुरनिम्बूसामान्यस्य नाम ।

जुही - यूथिका मागधी यूथी

ओडहूल - बुधैरोण्ड्रो जपोच्यते ॥ 341 ॥

करवीर - चण्डातः करवीरश्च

कुन्द - कुन्दं माघ्यं समार्थकम् ।

कचनार - कोविदारः काञ्चनारः

केओला (केवडा) - जम्बुले केतकं भवेत् ॥ 342 ॥

केशर - केशरं कुङ्कुमं तुल्ये विद्वद्भिः परिकीर्त्तिते ।

मालती - मालती जातिरेकार्थे

चमेली - चम्बेली तूपजातिका ॥ 343 ॥

चम्पा - चाम्पकश्चम्पकस्तुल्यौ

धुतुर - धुस्तूरो मातुलस्तथा । धुत्तूरश्च समार्थाः स्युः,

कामिनी - मधुगन्धी तु कामिनी ॥ 344 ॥

कनैल - कर्णिकारः पुष्पभेदे

गुलाब - शतपत्रा तु पाटला ।

गेना - आहुत्यं स्यात् शरत्पुष्पा

यूथिकेति यूथिका मागधी यूथी इतित्रीणि यूथिकाया नामानि । बुधैरिति ओण्ड्र जपा इतिद्वे जपाया नाम्नी । चण्डात इति चण्डात करवीर इतिद्वे चण्डातस्य नाम्नी । कुन्दमिति कुन्द माघ्य इतिद्वे माघ्यस्य नाम्नी । कोविदार इति कोविदार काञ्चनार इतिद्वे पुष्पविशेषस्य नाम्नी । जम्बुल इति जम्बुल केतक इतिद्वे केतकस्य नाम्नी । केशरमिति केशर कुङ्कुम इतिद्वे कुङ्कुमस्य नाम्नी । मालतीति मालती जाति इतिद्वे जातेर्नाम्नी । चम्बेलीति चम्बेली उपजातिका इतिद्वे पुष्पविशेपस्य नाम्नी । चम्बेलीति शब्दकल्पद्रुमः । चाम्पेय इति चाम्पेय चम्पक इतिद्वे चम्पकस्य नाम्नी । धुस्तूर इति धुस्तूर

मातुल धुत्तूर इतित्रीणि कनकपुष्पस्य नामानि । मध्विति मधुमल्ली कामिनी इतिद्वे कामिन्या नाम्नी । कर्णिकार इति कर्णिकार इत्येकं पुष्पविशेषस्य नाम । शतेति शतपत्रा पाटला इतिद्वे पाटलाया नाम्नी । आहुत्त्यमिति आहुत्त्य शरत्पुष्पा इतिद्वे शरत्पुष्पाया नाम्नी ।

बेली - मल्लिका भूपदी भवेत् ॥ 345 ॥

मधुरी - बन्धूकं रागपुष्पं स्यात्

शैनी - पुष्पभेदे शमी स्मृता ।

सिंगारहार - शेफालिका तु शृङ्गारहार: प्राज्ञैर्निगद्यते ॥ 346 ॥

दनुफ - द्रोणपुष्पी पुष्पभेदे

तीरा - सिंसस्तद्भेद उच्यते ।

तगर - नन्द्यावर्ते कवीन्द्रेण तगर: परिकीर्त्यते ॥ 347 ॥

चन्द्रकला - कथ्यते विबुधैश्चन्द्रकला पुष्पप्रभेदेके ।

कली - कलिका कोरकस्तुल्यौ

गुच्छा - गुच्छक: स्तवको भवेत् ॥ 348 ॥

थोडी खिली कली - कुड्मलो मुकुलस्तुल्यौ

केतकी - केतकी विफला भवेत् ।

मल्लिकेति मल्लिका भूपदी इतिद्वे मल्लिकाया नाम्नी । बन्धूकमिति बन्धूक रागपुष्प इतिद्वे बन्धूकपुष्पस्य नाम्नी । पुष्पेति शमी इत्येकं पुष्पविशेषस्य नाम । शेफालिकेति शेफालिका शृङ्गारहार इतिद्वे शेफालिकाया नाम्नी । द्रोणेति द्रोणपुष्पी इत्येकं पुष्पविशेषस्य नाम । सिंसइति सिंस इत्येकं पुष्पभेदस्य नाम । नन्द्यावर्त्त इति नन्द्यावर्त्त तगर इतिद्वे तगरपुष्पस्य नाम्नी । तगरइति शब्दकल्पद्रुम: । कथ्यते इति चन्द्रकला इत्येकं पुष्पभेदस्य नाम । कलिकेति कलिका कोरक इतिद्वे पुष्पकोरकस्य नाम्नी । गुच्छक इति गुच्छक, स्तवक इति द्वे स्तवकस्य नाम्नी । कुड्मल इति कुडमल, मुकुल इतिद्वे मुकुलस्य नाम्नी । केतकीति केतकी, विफला इतिद्वे केतक्या नाम्नी ।

केसौर - कसेरुका कसेरुः स्यात्

तेकुना - कन्दभेदे त्रिपर्णिका ॥ 349 ॥

रामकेसौर - बुधै राजकसेरुस्तु कन्दभेदे निगद्यते ।

सारूक - जलालुकं स्यात् शालूकम्

सुथनी - पिण्डकन्द उदीर्य्यते ॥ 350 ॥

अल्हुआ - पिण्डीतके कवीन्द्रेण रवतालुः कन्दभेदभृत् ।

तत्रैव कविमूर्द्धन्यै रक्तपिण्डालुरुच्यते ॥ 251 ॥

कसेरुकेति कसेरुका कसेरु इतिद्वे कसेरोर्नाम्नी । कन्देति त्रिपर्णिका इत्येकं कन्दभेदस्य नाम । बुधैरिति राजकसेरुः इत्येकं कन्दभेदस्य नाम । जलालुकमिति जलालुक शालूक इतिद्वे शालूकस्य नाम्नी । पिण्डेति पिण्डकन्द पिण्डीतक इतिद्वे पिण्डकन्दस्य नाम्नी । रक्तालुरिति रक्तालु रक्तपिण्डालु इतिद्वे रक्तालोर्नाम्नी ।

॥ अथ देशवर्गः ॥

अनन्ते दुस्तरे हिन्दुसाहित्यसलिलाशये ।

नाम यद्यपि देशानां सर्वेषामेव विद्यते ॥ 352 ॥

पारम्पर्यात्ययेनाद्य तन्निर्णेतुं न शक्यते ।

श्रुतिस्मृतिपुराणादि-शास्त्रतत्त्वार्थवेदिनाम् ॥ 353 ॥

बुधानां मतमालोच्य तेषां नामानि निर्ब्रुवे ।

पृथ्वीमण्डल -

पृथिवीमण्डलं प्राज्ञैः पद्मरूपं निगद्यते ॥ 354 ॥

भद्राश्वं कुरुवर्षञ्च केतुमालञ्च भारतम् ।

वर्षाण्येतानि चत्वारि तत्पत्राणि चतुर्दिशि ॥ 355 ॥

जम्बूद्वीप -

पूर्वपश्चिमगोलार्द्ध-भेदाभ्यां भूमिमण्डलम् ।
आर्य्यवैज्ञानिका द्वेधा विभक्तमनुमन्वते ।। 356 ।।
पूर्वीयं तत्र गोलार्द्धं जम्बूद्वीपं निगद्यते ।
द्वीपान्यष्टौ तदेतस्मिन्नन्तर्भुक्तानि चक्षते ।। 357 ।।
ऐश्या च यवरूपश्च जम्बूद्वीपाङ्गतां गते ।

भारतवर्ष-

जम्बूद्वीपस्य वर्षेषु स्मृतं भारतमष्टमम् ।। 358 ।।
पुरा पाश्चात्यपौरस्त्य भेदेनेदं द्विधा कृतम् ।
तयोर्विभाजकः सिन्धु-नदः स्वादुजलाशयः ।। 359 ।।
लोहिताम्भोधिपर्य्यन्तं पश्चिमो भाग इष्यते ।
भागस्तु पश्चिमः प्राज्ञैः पारस्थानं निगद्यते ।। 360 ।।
तथैव पूर्वगो भागः सिन्धुस्थानमितीष्यते ।
हिन्दुस्थानाख्यया प्राज्ञैः सिन्धुस्थानं निरुच्यते ।। 361 ।।
पूर्वेण भारतं वर्षमार्य्यावर्त्त उदीय्यते ।
पश्चिमेन तु भागोऽयमार्य्यायणमुदीर्यते ।। 362 ।।
वसन्त्यार्य्यायणे देशे सर्वे ते म्लेच्छजातयः ।
आर्य्यावर्त्ते तु वर्त्तन्ते वेदधर्मपरायणा ।। 363 ।।
पारवश्यवशेनाद्य भारतवर्षस्य विस्तृतिम् ।
लोहिताम्भोधिपर्य्यन्तां व्यस्मार्षुर्हन्त हिन्दवः ।। 364 ।।
प्रशान्तसागरः प्राच्यां पीतवारिधिसङ्गतः ।
पश्चिमे लोहिताम्भोधिरुदीच्यां हिमवान् गिरिः ।। 365 ।।
विषुवो निधिमध्यस्थो याम्यां सीमाऽस्य कथ्यते ।

पृथ्वीति आर्य्यसर्वस्वभूते पुराणादिक-पुरातत्त्वमार्मिकानुबद्धनिबन्धादिकं च पर्य्यालोच्येदं प्रकरणमुद्धृतं प्रकाशकारैस्तत एव विशद्य तदुपष्टकं निर्देष्टुं न शक्यते। विशेषं जिज्ञासुभिः सरस्वतीवरदपुत्रविद्यावचास्पति श्री मधुसूदन झा निर्मिते इन्द्रविजये आर्य्यसाहस्रीयाख्ये तदेतन्निरूपितं द्रष्टव्यम्। हिन्दव इति हिन्दुधर्मप्रलोप्तारो जायन्ते चक्रवर्तिनः, हीनं दूषयत्येव हिन्दुरित्युच्यते प्रिय इति मेरुतन्त्रे प्रकाशे।

सर्गादौ भारतवर्षे प्रथमं सृष्टवान् विधिः ॥ 366 ॥

आर्य्यावर्त्त -

सहस्रेभ्यस्तु वर्षेभ्यः पारतन्त्र्यमुपागते।

(हिन्दुस्थान)

कुमारिकाऽभिधेये तु स्वैकदेशे महालघौ ॥367॥

भारतं वर्षमद्यत्वे नियतं कूटबुद्धिभिः।

खण्डो भारतवर्षस्य नवमो यः प्रकीर्तितः ॥ 368 ॥

कुमारिकाऽभिधेयः स आर्य्यावर्त्त उदीयते।

तत्रैव विदुषां मान्यैः हिन्दुस्थानं निगद्यते ॥ 369 ॥

एशिया -

ईशाख्यस्य मनोः पूर्वे यस्यां भमौ नृपालता।

अद्यत्वे खलु सा भूमिरैश्या प्राज्ञै र्निगद्यते ॥ 370 ॥

विष्णुक्रान्तस्तु प्राग्देशस्तत्रैव परिकीर्त्यते।

चीन - चीनो देशप्रभेदे स्यात्

जापान - मणिद्वीपस्तु तद्विदि ॥ 371 ॥

वर्मा - देशभेदे तु ब्रह्म स्यात्।

| | |
|---|---|
| मलाया | - मलयस्तद्भिदि स्मृतः । |
| सिलौन | - ताम्रपर्णं बुधैरुक्तं ताम्रपर्णी च सिंहलम् ॥ 372 ॥ |
| | केचित्सिंहलभेदैस्तू लङ्केत्याचक्षते बुधाः । |
| | लङ्कातः सिंहलं भिन्नमित्यार्षवचनाद्ध्रुवम् ॥ 373 ॥ |

सर्गादाविति कुमारिका आर्य्यावर्त्त हिन्दुस्थान इतित्रीणि भारतवर्षैकदेशस्य नामानि । वर्णव्यवस्थितिरिहैव कुमारिकाख्ये, शेषेपु चान्त्यजजना निवसन्ति सर्वे इति सिद्धान्तशिरोमणिः । ईशाख्यस्येति ऐश्या विष्णुक्रान्त इति द्वे देशसमुदायविशेषस्य नाम्नी । चीनइति चीन इत्येकं देशभेदस्य नाम । मानसेशाच्च दक्षिणे चीनदेशः प्रकीर्त्तित इति शक्तिसंगमतन्त्रे ।

| | |
|---|---|
| कालापानी (अण्डमन) | - इन्द्रद्युम्नो बुधैरण्डमणिद्वीप उदीर्यते । |
| जावा | - यवद्वीपो देशभेदे |
| सुमात्रा | - सोमत्रा सौम्य उच्यते ॥ 374 ॥ |
| मक्का | - मक्का यवनतीर्थे स्यात् । |
| अरब (काबुल) | - कम्बोजश्चारवः स्मृतौ ॥ |
| ईरान | - स्यात्पारस्यानमीराणमार्यायणमिदं त्रयम् ॥ 375 ॥ |
| खुरसान | - सुधियोत्तरभद्रे तु खुर्दस्थानं निगद्यते । |
| परसिया | - बुधैर्दक्षिणभद्रस्तु पारस्यः परिकल्प्यते ॥ 376 ॥ |
| आर्मीनिया | - अर्मकं देशभेदे स्यात् |
| बैलस्तान | - महावैलन्तु तद्भिदि ॥ 377 ॥ |
| अफगानिस्तान | - बुधैरपगणस्थानं देशभेदे निगद्यते । |
| फिलिस्तान | - असुराणां पणीनां यद् वासभूमिः पुरायुगे ॥ 378 ॥ |
| | पुरातत्त्वबुधैः सैव पणिस्थानं निगद्यते । |
| नीकोवार | - नागद्वीपस्तु विबुधैर्नागेश्वर उदीर्य्यते ॥ 379 ॥ |

फीलोपाइन दीप संघ- कथ्यते द्वीपसंघे तु गान्धर्वे पण्युपायनम् ।
बोर्नियो - वारुण: स्वर्णप्रस्थश्च देशभेदे निरुच्यते ।। 380 ।।

मक्केति मक्का इत्येकं यवनतीर्थस्थानस्य नाम । लङ्काप्रदेशमारभ्य मक्कान्तं परमेश्वरीति शक्तिसङ्गमतन्त्रम् । यद्यपि मेरुतन्त्र-शक्तिसङ्गमतन्त्रयो: प्रामाण्यं तत्रापशब्दभूयिष्ठतया सन्दिह्यते प्रामाणिकै: तथापि यावद् अप्रमाण्यं न निश्चितं तावत् तयोरुपष्टम्भकत्वे क्षतिविरह: । अत्रेदं बोद्धव्यम्- आर्य्यसंस्कृतिमपोहितुं दस्युभिरस्माकं प्राणायितं साहित्यं प्रसह्यापहृत्य भस्मसात्कृतं प्रलोभ्य स्वदेशे नीतं च, तावताप्यसन्तुष्टैस्तैर्य्यत् साहित्ये फल्गुतां परानुकृतिपरतां प्रदर्शयितुमपशब्दा अपार्थाश्च संनिवेशिता:, संस्कृते अभिनवग्रन्थाश्च निर्मापिता:, ततएव साहित्येषु स्वेषु क्वापि आर्य्यविपरीततत्त्वं दृश्यते । कम्बोजइति कम्बोज आरव इतिद्वे आरवदेशस्य नाम्नी । स्यादिति पारस्थान ईराण आर्य्यायण इतित्रीणि पारस्थानस्य नामानि । सुधियेति उत्तरभद्र खुर्दस्थान इतिद्वे उत्तरभद्रस्य नाम्नी । बुधैरिति दक्षिणभद्र पारस्य इतिद्वे पारस्यदेशस्य नाम्नी । आर्मकमिति आर्मक इत्येकं देशविशेषस्य नाम । महेति महाबैलइत्येकं देशविशेषस्य नाम । बुधैरिति अपगणस्थान इत्येकं देशविशेषस्य नाम । असुराणामिति पणिस्थान इत्येकं देशविशेषस्य नाम । नागेति नागद्वीप नगेश्वर इतिद्वे नागद्वीपस्य नाम्नी । कथ्यते इति गान्धर्व पण्युपायन इतिद्वे गान्धर्वदेशस्य नाम्नी । वारुणइति वारुण स्वर्णप्रस्थ इतिद्वे वारुणदेशस्य नाम्नी ।

कसेरू (सेलेवीस)- कशेरुमति देशे तु कशेरुशकलो भवेत् ।
यूनान - यावनो देशभेदे स्यात्
मलुक्का - भेदे तस्य गभस्तिमान् ।। 381 ।।
कैलडिया - कालकेयासुरावास: कालकेयो निगद्यते ।
तातार (तुर्की) - स्यात्तुरुष्कस्तारतरस्तुरुष्कस्थानमित्यपि ।। 382 ।।
श्याम - स्वतनूजाय शामाय रोमकाधीश रोमक: ।
यं देशं प्रददौ दायं शामो देश: स उच्यते ।। 383 ।।

योरोप - प्रत्यक्-पाश्चात्यदेशौ तु यवरूपे बुधैः स्मृतौ ।

इग्लैण्ड - इङ्गलण्ड्रो लण्ड्रदेशे

जर्मनी - शर्मण्यो देशसंभिदि ।। 384 ।।

इटली - रोमो रोमक एकार्थौ

फ्रांस - परांशो देशभेदके ।

ग्रीस - गिरिकायी देशभेदे विद्वद्भिः परिकीर्त्यते ।। 385 ।।

अफ्रीका - देशभेदेऽपरौकस्तु प्रवदन्ति मनीषिणः ।

अमरीका - भवेदमरिकादेशेऽमरौकश्च निगद्यते ।। 386 ।।

न्यूयार्क - नवार्कं विबुधास्तस्य राजधान्यां प्रचक्षते ।

कशेर्विति केशरुमत् कशेरुशकल इतिद्वे देशविशेषस्य नाम्नी । इन्द्रद्वीपः कशेरुश्चेति सिद्धान्तशिरोमणौ भास्कराचार्य्यः । यावनइति यावन इत्येकं देशभेदस्य नाम । भेदेइति गभस्तिमत् इत्येकं देशविशेषस्य नाम । ताम्रपर्णो गभस्तिमान् इति सिद्धान्तशिरोमणिः । कालकेयेति कालकेय इत्येकं देशविशेषस्य नाम । स्यादिति तुरुष्क तारतर तुरुष्कस्थान इतित्रीणि तुरुष्कस्थानस्य नामानि । स्वेति शाम इत्येकं देशविशेषस्य नाम । प्रत्यगिति यवरूप इत्येकं पाश्चात्यदेशसमुदायविशेषस्य नाम । इङ्गेति इङ्गलण्ड्र लण्ड्र इतिद्वे देशभेदस्य नाम्नी । अयञ्च देश इङ्गाख्य-लण्डाख्यदेशयोः समुदायरूपः कथ्यते । अधिक जिज्ञासुभिः शब्दकल्पद्रुमे द्रष्टव्यम् । शर्मण्येति शर्मण्य इत्येकं देशविशेषस्य नाम । रोम इति रोम रोमक इतिद्वे रोमदेशस्य नाम । रोमइति ज्योर्तिविदाभरणे कालिदासः । परांशइति परांश इत्येकं देशविशेषस्य नाम । परः उत्कृष्टः अंशोऽवयवो यस्यासौ परांशः । प्रांश इत्याधुनिकाः । गिरिकायीति गिरिकायिन् इत्येकं देशविशेषस्य नाम । देशेति अपरौकस् इत्येकं देशभेदस्य नाम । भवेदिति अमरिका अमरौकस् इतिद्वे देशविशेषस्य नाम्नी । नवार्कमिति नवः नूतनोऽर्कः सूर्यो यत्र तत्र नवार्कम् तच्च अमरौकोदेशस्य राजधान्या नाम ।

वार्त्तानिया - आवर्त्तनो देशसंघभेदे विद्वद्भिरिष्यते ।। 387 ।।

स्वेडन (नारबे) - कविना नारमणको देशभेदे निगद्यते ।

नोविया - मन्दरो देशभेदे स्यात्

जेमल्या - हरिणस्तत्प्रभेदके ॥ 388 ॥

एशिया (माइनर)-क्षुद्रैश्या दहरैश्या च स्वायम्भुव्वां प्रकीर्तिते ।

हेलमण्ड - हिरण्यती देशभेदे

भोटान - भोटांगस्तत्प्रभेदके ॥ 389 ॥

इजिप्त - मिश्रो देशविशेषे स्यात्

नेपाल - नेपालो देशभेदभृत् ।

तिब्बत - त्रिविष्टपं देशभेदे कीर्त्तयन्ति मनीषिण: ॥ 390 ॥

आर्यावर्तीयदेशानामथ नाम निगद्यते ।

मिथिला - मिथिला तीरभुक्ति: स्त्री विदेहभुवि कथ्यते ॥ 391 ॥

मुम्बई - मुम्बापुरी मोहमयी नगर्या भेद उच्यते ।

कलकत्ता - कालिकाता स्त्रियां प्राज्ञै: पुरीभेदे प्रकीर्त्यते ॥ 392 ॥

दिल्ली - देहल्यां पण्डितैरिन्द्रप्रस्थ: पुंसि निगद्यते ।

आवर्त्तन इति, आवर्त्तन इत्येकं देशसंघविशेषस्य नाम । कविनेति नारमणक इत्येकं देशभेदस्य नाम । मन्दरइति मन्दर इत्येकं देशविशेषस्य नाम । हरिणइति हरिण इत्येकं देशविशेषस्य नाम । क्षुद्रैश्येति क्षुद्रैश्या दहरैश्या स्वायम्भुवी इतित्रीणि देशभेदस्य नामानि । हिरण्यतीति हिरण्यती इत्येकं देशविशेषस्य नाम । भोटाङ्ग इति भोटाङ्ग इत्येकं देशविशेषस्य नाम । काशमीरन्तु समारभ्य कामरूपं तु पश्चिमे, भोटाङ्गदेशो देवेशीति शक्तिसंगमतन्त्रम् । मिश्रइति मिश्र इत्येकं देशभेदस्य नाम । नेपाल इति नेपाल इत्येकं देशभेदस्य नाम । नेपालक्षितिपालभालतिलके पङ्केन शङ्केत क इत्याप्तोक्ति: शब्दकल्पद्रुमश्च । त्रिविष्टपमिति त्रिविष्टप इत्येकं देशभेदस्य नाम । मिथिलेति मिथिला तीरभुक्ति इतिद्वे विदेहभुवो नाम्नी । मुम्बेति मुम्बापुरी मोहमयी इतिद्वे मुम्बादेव्यधिष्ठितनगरीविशेषस्य नाम्नी । कालिकेति कालिकाता इत्येकं वङ्गप्रान्तीयराजधान्या नाम । अततीत्याता कालिकाया:

सा कालिकाता अतधातुर्गत्यर्थतया प्राप्तावत्र विद्यते । देहल्यामिति देहली इन्द्रप्रस्थ इतिद्वे भारतवर्षीयराजधान्या नाम्नी ।

गुजरात - गुर्जरो गुज्जराटश्च

मारबाड़ - मरुभूमिर्मरुस्थलम् ।। 393 ।।

पटना - क्लीबे पाटलिपुत्रे तु पट्टणं परिकीर्त्यते ।

अथ तत्तत्प्रदेशस्य नाम वक्ष्ये पृथक् पृथक् ।। 394 ।।

मुलतान, लाहौर -मूलस्थानं, लवपुरं

पूना, विहार - विहार: पुण्यपत्तनम् ।

सिन्ध, पञ्जाब, मद्रास-सिन्धु: पञ्चनदो मद्र,

बङ्गाल, बडोदरा - देशो वङ्गो वटोदरम् ।। 395 ।।

कानपुर, आसाम, सी. पी.-कर्णपुरं कामरूपं संयुक्तप्रान्त इष्यते ।

जब्बलपुर, भोपाल - जयल्लभपुरं भूपाल:

काश्मीर - काश्मीर उच्यते ।। 396 ।।

उडीसा, राजपुताना- उत्कलो राजपुत्रीयो युक्तप्रान्त उदीर्य्यते ।

(यू.पी.)

।। इति देशवर्ग: ।।

गुर्जरइति गुर्जर गुज्जराट इतिद्वे गुर्जरदेशस्य नाम्नी । गुज्जराटो देशभेदे गुर्जरो देशतज्जयोरिति शब्दरत्नावली । मर्विति मरुभूमि मरुस्थल इतिद्वे मरुदेशस्य नाम्नी । क्लीब इति पाटलिपुत्र पट्टण इतिद्वे विहारप्रान्तीयराजधान्या नाम्नी । पट्टणमिति शब्दकल्पद्रुम: । अथेति अत: परं भारतवर्षीयतत्तत्प्रदेशस्यैकैकं नाम कथ्यते । अन्यत्सर्वं स्पष्टम् ।

।। अथ गृहवर्ग: ।।

घर - निशान्तं भवनं गेहं घर: सद्म निकेतनम् ।। 397 ।।

निकेतो वेश्म सदनमागारं गृहमुच्यते ।

| | |
|---|---|
| मन्दिर | - देवालये मन्दिरं स्यात् तद्भेदे मठ उच्यते ॥ 398 ॥ |
| गिर्जा | - पाश्चात्यदेवसदने प्रार्थनागृहमुच्यते । |
| राजमहल | - सौध प्रासाद इत्येष नृपालस्य गृहे भवेत् ॥ 399 ॥ |
| बंगला | - हर्म्यं स्याद्धनिनां वासे |
| नागोल | - नन्द्यावर्त्तन्तु तद्विदि । |
| मकबड़ा | - विच्छन्दको गेहभेदे |
| झोपड़ी | - पर्णशालोटजे भवेत् ॥ 400 ॥ |
| गेस्टहौस | - कथ्यतेऽतिथिशाला स्त्री प्राघुणानां निकेतने । |
| छात्रावास | - आवसथ्यस्तथा छात्रावासस्तुल्यौ प्रकीर्तितौ ॥ 401 ॥ |
| वीशी | - भोजनालय इत्येष गृहभेदे निगद्यते । |
| लौज | - विश्रान्तिगृहमर्थज्ञैर्विश्रमागारमुच्यते ॥ 402 ॥ |
| छाउनी | - सैन्यावासस्तु शिबिरम्, आमनन्ति विपश्चितः ॥ 403 ॥ |
| किला | - कोटं कोट्टञ्च दुर्गेऽर्थे, |

निशान्तमिति निशान्त भवन गेह घर सद्मन् निकेतन वेश्मन् सदन आगार गृह इति एकादश गृहस्य नामानि । घर इत्यस्य हन्तेरन् घश्चेत्युणादिसूत्रेण सिद्धिः, हन्यते गम्यतेऽतिथिभिरिति तत्त्वबोधनीकारः । देवेति देवालय इत्येकं तत्सामान्यस्य नाम । मन्दिर इत्येकं भगवच्चन्द्रशेखरभिन्नदेवालयस्य नाम । मठ इत्येकं भगवतः शङ्करस्य अधिष्ठानगृहस्य नामेति विवेक्तव्यम् । पश्चात्येति प्रार्थनागृह इत्येकं पाश्चात्यदेवसदनस्य नाम ।

सौधमिति सौध प्रासाद इतिद्वे नृपसदनस्य नाम्नी । हर्म्यमिति हर्म्य इत्येकं धनिकानां गेहस्य नाम । नन्द्येति नन्द्यावर्त्त इत्येकं गृहभेदस्य नाम । विच्छन्दक इति विच्छन्दक इत्येकं गेहविशेषस्य नाम । पर्णेति पर्णशाला उटज इतिद्वे पर्णकुट्या नाम्नी । कथ्यतइति अतिथिशाला इत्येकं प्राघूर्णिकभवनस्य नाम । आवेति आवसथ्य छात्रावास इतिद्वे छात्रावासस्य नाम्नी। भोजनेति भोजनालय इत्येकं पण्यभोजनालयस्य नाम । विश्रान्तीति

विश्रान्तिगृह इत्येकं विश्रमागारविशेषस्य नाम । सैन्येति सैन्यावास शिविर इत्येकं सैन्यावासस्य नाम्नी । आमनन्तीति कोट कोट्ट दुर्ग इति त्रीणि दुर्गस्य नामानि । कोट इटि दुर्गशब्दे मेदिनी । कोट्टं दुर्गे पुनः समे इत्यभिधानचिन्तामणि शब्दरत्नावल्यौ ।

थाना - उद्घाटो गृहसंभिदि ।

हाईकोर्ट - कोट्टाधिकरणो न्यायालयः पण्डितमण्डनैः ।। 404 ।।

वरिष्ठादिः प्रधानादिस्तुल्यार्थत्वेन भाषिताः ।

अस्पताल - आतुराणां गृहे प्राज्ञैश्चिकित्सालय उच्यते ।। 405 ।।

क्लब - गञ्जां गोष्ठीगृहे तुल्यवाच्ये वक्ति विचक्षणः ।

टकसाल - स्त्रियां टङ्कटशाला स्यात् मुद्रानिर्माणसद्मनि ।। 406 ।।

छापाखाना - मुद्रणस्य गृहे प्राज्ञैर्मुद्रणालय उच्यते ।

जच्चाखाना - जातवेश्मनि संप्रोक्तमरिष्टं सूतिकागृहम् ।। 407 ।।

जेल - बन्दीशाला तु कारा स्यात्

हिरासत - रोधगेहं तु तद्भिदि ।

बैंक - निक्षेपभवनं व्यङ्कः

सेल - शल्यं दण्डार्हसद्मनि ।। 408 ।।

कोपराइटिभ बैङ्क- सहकार्य्यादिको व्यङ्को निक्षेपभवनं समे ।

अजायब घर - प्रेक्षागारे सुधीमान्यैरद्भुतालय इष्यते ।। 409 ।।

अस्तबल - अश्वशाला मन्दुरा स्यात्

कैम्प - निवेशोऽस्थायिसंस्थिते ।

उद्घाटइति उद्घाट इत्येकं राजकीयगृहभेदस्य नाम । उद्घाट इतिशब्दकल्पद्रुमः । कोट्टेति वरिष्ठकोट्ट प्रधानकोट्ट वरिष्ठाधिकरण प्रधानाधिकरण वरिष्ठन्यायालय प्रधानन्यायालय इतिषट् महान्यायालयस्य नामानि । आतुराणामिति चिकित्सालय इत्येकमातुरालयस्य नाम । गञ्जामिति गञ्जा गोष्ठीगृह इतिद्वे गोष्ठीगृहस्य नाम्नी । गञ्जाशब्दो यद्यपि

कोशकारैर्मदिराशालायामेव निर्दिश्यते तथापि तदुपलक्षणं मत्वा गोष्ठीगृहसामान्ये प्रदीपकारैराख्यायते इतिप्रतिभाति । वस्तुतः सांप्रतिके गोष्ठीगृहे मदिरायाः प्राधान्येन तथात्वेऽपि न किञ्चिद्विरुध्यते इति ध्येयम् । स्त्रियामिति टङ्कटशाला इत्येकं मुद्रानिर्माणशालाया नाम । टङ्कटशालेति शब्दकल्पद्रुमोऽमरसारसुन्दरीकारश्च । मुद्रणस्येति मुद्रणालय इत्येकं गृहभेदस्य नाम जातेति अरिष्ट सूतिकागृह इतिद्वे जातवेश्मनो नाम्नी । बन्दीति वन्दीशाला कारा इतिद्वे काराया नाम्नी । रोधेति रोधगेह इत्येकं दण्डनिर्णयात्पूर्वं यत्र अभियुक्तो रक्ष्यते तस्य गृहस्य नामनी । निक्षेपेति निक्षेपभवन व्यङ्ग इतिद्वे निक्षेपभवनस्य नाम्नी । विशेषतोऽङ्क्यते नामादि यत्र स व्यङ्कः। शल्यमिति शल्य इत्येकं कारागतानां विशेषदण्डप्रदानाय निर्मितसंकीर्णगृहस्य नाम । शाल्यमिति मेदिनी-शब्दकल्पद्रुमौ । सहेति सहकारिर्व्यंक सहकारिनिक्षेपभवन इतिद्वे निक्षेपभवनविशेषस्य नाम्नी । प्रेक्षेति अद्भुतालय प्रेक्षागार इतिद्वे गृहभेदस्य नाम्नी । अश्वशाला मन्दुरा इतिद्वे अश्वशालाया नाम्नी । निवेशइति निवेश इत्येकमस्थायिवासगृहस्य नाम ।

औफिस (दफ्तर) – आप्यासस्तु भवेत्कार्य्यालयो लेख्यतलं तथा ॥ 410॥
तत्रैव कोशमर्मज्ञैर्लेख्यस्थानमुदीर्य्यते ।

कारखाना – आवेशनं शिल्पशाला

खोप – विटङ्कं पक्षिसद्मनि ॥ 411 ॥

डेंरा – तरिस्थाने तु पोतौकः

डौक – आवासो वास उच्यते ।

दुकान – आपणः स्यान्निषद्यायाम् ।

बाजार – विपणिः पण्यवीथिका ॥ 412 ॥

गृहात्मक बाजार – गृहाकारनिषद्यायामन्तरापण उच्यते

नापितशाला – खरकुट्युच्यते प्राज्ञैः स्त्रियां नापितशालिका ॥ 413 ॥

पार्लामेण्ट – मन्त्रणागृहभेदे तु पाल्यामन्त्र उदीर्य्यते ।

तिलिस्म – कथ्यते विस्मयगृहं विस्मापनगृहे बुधैः ॥ 414 ॥

पैखाना (संडास) - पुरीषालय इत्येष उत्सर्गगृहमुच्यते ।

प्याउ - प्रपा पानीयशाला स्यात्

भरार - भाण्डागारस्तु गेहभित् ।। 415 ।।

सट्टाघर - पणायागृहमित्येतत्सद्मभेदे निगद्यते ।

कम्पनी - कमापनी तु संभूयसमुत्थानं नपुंसके ।। 416 ।।

लिमिटेड कम्पनी - कंपानी च स्त्रियां मध्यमेतेषां तद्विशेषभित् ।

आप्यासमिति आप्यास कार्य्यालय लेख्यतल लेख्यस्थान इति चत्वारि कार्य्यालयस्य नामानि । आसनमासः उपवेशनमिति तदर्थः, आप्यः प्राप्यः स यत्रासौ आप्यासः, लेखाद्यर्थं प्राप्तव्यस्थितिक इति पर्य्यवसितोऽर्थः, लेख्यतल लेख्यस्थानमिति शब्दकल्पद्रुमः । आवेशनमिति आवेशन शिल्पशाला इतिद्वे शिल्पशालासामान्यस्य नाम्नी । आवेशन शिल्पशालेत्यभिधानचिन्तामणिः । विटङ्क इति विटङ्क इत्येकं पक्षिगृहस्य नाम । तरीति पोतौक इत्येकं तरिविश्रमस्थानस्य नाम । अकरान्तोऽप्योकशब्दो दृश्यते । आवासइति आवास वास इतिद्वे वासस्थानस्य नाम्नी । आपणइति आपण निषद्या इतिद्वे आपणस्य नाम्नी । विपणिरिति विपणि पण्यवीथिका इतिद्वे विपणेर्नाम्नी । गृहेति अन्तरापण इत्येकं गृहात्मकस्यापणस्य नाम । खरेति खरकुटी नापितशालिका इतिद्वे नापितशालाया नाम्नी । मन्त्रणेति पाल्यामन्त्र इत्येकं मन्त्रणागृहस्य नाम । पाल्यः पालनीयः आमन्त्रं मन्त्रणादिकं यस्यासौ पाल्यामन्त्रः, अवश्यानुष्ठेयमन्त्रणक इति भावार्थः । कथ्यत इति विस्मयगृह इत्येकं विस्मयप्रयोजकवस्तुजातरक्षणस्थानस्य नाम्नी । प्रपेति प्रपा पानीयशाला इतिद्वे प्रपाया नाम्नी । भाण्डेति भाण्डागार इत्येकं धान्यादिरक्षणगेहस्य नाम । पणायेति पणायागृह इत्येकं द्यूतगृहभेदस्य नाम ।

अत्र द्यूतगृहमित्यप्युच्यते शिष्टैः । कमिति कमापनी सम्भूयसमुत्थान कंपानी इतित्रीणि सम्भूयसमुत्थानस्य नामानि । कम् सुखम् धनाद्युपार्जन द्वारा आप्यते ऽनयेति तथोक्ता । कं सुखम् धनाद्युपार्जनद्वारा पाति रक्षति अनया सा कंपानी । सम्भूयसमुत्थानमिति तु बहुशो मनुयाज्ञवाल्क्यादौ राजस्वीकृतसंस्थाने श्रूयते अन्ये द्वे साधरणे बोध्ये ।

फैक्टरी (कारखाना) - कार्य्यशाला तथा पण्यकरी प्राज्ञैर्निगद्यते ॥ 417॥

कौंसिल - धारासभा तु कंशीलः कौशलं मन्त्रणागृहम् ।

प्राइमरी - प्रारम्भिकादिशाला स्त्री शालाभेदे प्रकीर्तिता ॥ 418 ॥

हाई स्कूल - अथ मध्यमशाला स्त्री शिक्षाशालस्य संभिदि ।

पाठशाला - विद्याप्रारम्भशाला तु पाठशाला निगद्यते ॥ 419 ॥

विद्यालय - विद्यालयस्तथा विद्यापीठं विद्वद्भिरिष्यते ।

कालेज - कालेजः स्यात्कलाशाला महाविद्यालयस्तथा ॥ 420 ॥

युनिवर्सिटी - विश्वविद्यालयः प्राज्ञैः शालाभेदे प्रकीर्त्यते ।

स्टेशन - इष्टासनं बुधैरिष्टसदनं परिकीर्त्यते ॥ 421 ॥

सराय - सरालयस्तथा पान्थालयः तुल्यौ प्रकीर्तितौ ।

अड्डा - अन्तरुष्यं स्थानभेदे प्रवदन्ति मनीषिणः ॥ 422 ॥

खंडहर - भग्नावशेष इत्येष जीर्णस्थाने उदीर्य्यते ।

पोस्ट औफिस - प्रापणालय इत्येष प्रापणाप्यास इष्यते ॥ 423 ॥

बुकिंग औफिस - शुल्कपत्रालयो निर्देशनीगेहञ्च कथ्यते ।

कार्यशालेति कार्य्यशाला पण्यकरी इतिद्वे पण्यकर्य्या नाम्नी । धारेति धारासभा कंशील कौशल मन्त्रणागृह इति चत्वारि मन्त्रणागृहस्य नामानि । कं शीलयति नियमादिनिर्माणद्वारा प्रापयतीति कंशीलः । कौशलशब्दस्तु बहुत्र प्रसिद्धः । प्रारम्भिकेति प्रारम्भिकशाला इत्येकं शिशूनां पाठशालाया नाम । अथेति माध्यमिकशाला इत्येकं किशोराणां पाठशालाया नाम । विद्येति विद्यायाः संस्कृतसम्बन्धिन्याः प्रारम्भिकशालायाः पाठशाला इत्येकं नाम । विद्येति विद्यालय विद्यापीठ इतिद्वे विद्यालयस्य नाम्नी । कालेज इति कालेज कलाशाला महाविद्यालय इतित्रीणि महाविद्यालयस्य नामानि । काले जायते उद्घाटितो भवतीति कालेजः । विश्वेति विश्वविद्यालय इत्येकं शिक्षालयभेदस्य नाम । इष्टेति इष्टासन इष्टसदन इतिद्वे धूम्रयानविश्रमस्थानस्य नाम्नी । सरेति सरालय पान्थालय इतिद्वे पान्थालयस्य

नाम्नी । सरतीति सर: पान्थ इति तदर्थ: । तस्यालय इत्यर्थ:, अन्तरुष्येति अन्तरुष्य इत्येकं गुप्तस्थानभेदस्य नाम । भग्नेति भाग्नावशेष इत्येकं जीर्णशीर्णस्थानस्य नाम । प्रापणेति प्रापणालय प्रापणाप्यास इतिद्वे पत्रादिप्रेषणालयस्य नाम्नी । शुल्केति शुल्कपत्रालय निर्देशनीगेह इतिद्वे निर्देशनीगृहस्य नाम्नी ।

पावर हौस - तडिद्गृहं तडिद्धर्म्यं शक्तिहर्म्यमपि स्मृतम् ।। 424 ।।

गैलरी - छायामार्गस्तु तद्भेदे भवेद्दर्शकमञ्चिका ।

गुमटी - गुप्ताटी गुर्वटी प्रोक्ता

सामियाना - मत्तालम्बे त्वपाश्रय: ।। 425 ।।

कनात - स्त्रियां यवनिका काण्डपटं कुटरुरित्यपि ।

अपटी केणिका प्राज्ञै: समानार्थतया स्मृता: ।। 426 ।।

तम्बू - पटवासे स्फूल-दुष्ये

चेम्बर - गृहभित्स्यात्सभागृहम् ।

अटारी - अट्टाल्यट्टालिका प्राज्ञैरट्टायां परिकीर्त्यते ।। 427 ।।

जकसन - कथ्यते मेलसदनं युक्तसदनं नपुंसके ।

सिनेट - शिष्टसभा सभाभेदे विद्वद्भि: परिकीर्त्यते ।। 428 ।।

प्रिवीकौंसिल - धारासभादयस्तुल्या भवेयु: प्रेष्ठपूर्वका: ।

पिनल कोर्ट - दण्डव्यवस्थापकं पूर्वं कृत्वा कोट्टं तु तद्भिदि ।। 429 ।।

तडिदिति तडिद्गृह तडिद्धर्म्य शक्तिहर्म्य इतित्रीणि विद्युद्गृहस्य नामानि । छायेति छायामार्ग दर्शनमञ्चिका इतिद्वे कञ्चनभेदमाश्रित्य दर्शकासनविशेषस्य नाम्नी । गुप्ताटीति गुप्ताटी गुर्वटी इति द्वे धूमशकटीयमार्गे यातायातार्थे कृतस्य गृहभेदस्य नाम्नी । अटति अनया आटी गुप्ता च सा गुप्ताटी । गुरुणा अट्यते या सा गुर्वटी । मत्तेति मत्तालम्ब अपाश्रय इतिद्वे मत्तालम्बस्य नाम्नी । स्त्रियामिति यवनिका काण्डपट कुटरु अपटी केणिका इतिपञ्च केणिकाया नामानि । पटेति पटवास स्फूल दुष्य इतित्रीणि पटवासस्य

नामानि । गृहेति सभागृह इत्येकं गृहभेदस्य नाम । अट्टालीति अट्टाली अट्टालिका अट्टा इतित्रीणि अट्टाया नामानि । कथ्यते इति मेलसदन मुक सदन इतिद्वे यत्र अनेका गन्त्र्यो विरुद्धाभ्यो दिग्भ्यो मिलन्ति तस्य नाम । मेलस्य संमेलनस्य सदनं मेलसदनम् । युनक्ति एकत्र मिलतीति युक् तस्य सदनमित्यर्थः । शिष्टेति शिष्टसभा इति सभाविशेषस्य नाम । धारेति प्रेष्ठधारासभा प्रेष्ठकंशील प्रेष्ठकौशल प्रेष्ठमन्त्रणागृह इति चत्वारि प्रधान-कंशीलस्य नामानि । दण्डेति दण्डव्यवस्थापककोट्ट इत्येकम् अधिकरण-विशेषस्य नाम ।

बरण्दा - निष्काशः स्याद् वरण्डश्च

ऊपर महल - चन्द्रशाला शिरोगृहम् ।

अन्तःपुर - अन्तःपुरे तु शुद्धान्तो महल्लश्च निगद्यते ॥ 430 ॥

प्लेटफार्म - कुट्टिमो भुवि बद्धायाम्

अँगनै - अङ्गणे प्राङ्गणाऽजिरे ।

बैठक (दिवानखाना) - आस्थानं कविमूर्द्धन्यैरुपस्थानगृहे स्मृतम् ॥ 431 ॥

ओसारा - प्रघाणः प्रघणोऽलिन्दः

चबुतरा - वेदी स्त्री वेदिका समे ।

चहारदिवाली - तुल्यो प्राकार-प्राचीरौ

छत - छदिः पटलमुच्यते ॥ 432 ॥

छतका कमरा - अट्टकं कोष्ठभेदे स्यात्

कमरा (कोठली) - प्रकोष्ठं कोष्ठमुच्यते ।

जंगला - वातायने गवाक्षो ना जङ्गालं स्यान्नपुंसके ॥ 433 ॥

डब्बा - गन्त्र्यादेः कोष्ठके प्राज्ञैः प्रकोष्ठकमुदीर्य्यते ।

तहखाना - क्षितिव्युदासो भूगर्भे

निष्काश इति निष्काश वरण्ड इतिद्वे निष्काशस्य नाम्नी । निष्काश इतिमहाभारतम्, वरण्डइति शब्दकल्पद्रुमः । चन्द्रेति चन्द्रशाला शिरोगृह

इतिद्वे चन्द्रशालाया नाम्नी । अन्तरिति अन्तःपुर शुद्धान्त महल्ल इतित्रीणि अन्तःपुरस्य नामानि । कुट्टिम इति कुट्टिम इत्येकं बद्धभूमेर्नाम । अङ्गणइति अङ्गण प्राङ्गण अजिर इतित्रीणि अङ्गनस्य नामानि । आस्थानमिति आस्थान उपस्थानगृह इतिद्वे आस्थानस्य नाम्नी । आस्थानमिति शूद्रकसभावर्णने बाणभट्टः । प्रघाणइति प्रघण प्रघाण अलिन्द इतित्रीणि अलिन्दस्य नामानि । वेदीति वेदी वेदिका इतिद्वे वेदिकाया नाम्नी । तुल्याविति प्राकार प्राचीर इति द्वे प्राकारस्य नाम्नी । छदिरिति छदिस् पटल इतिद्वे पटलस्य नाम्नी । अट्टकमिति अट्टक इत्येकं कोष्ठभेदस्य नाम । प्रकोष्ठ इति प्रकोष्ठ कोष्ठ इतिद्वे कोष्ठस्य नाम्नी । कोष्ठमिति प्रथमाध्यायै शुक्र-नीतिः । वातायन इति वातयन गवाक्ष जङ्गाल इतित्रीणि वातायनस्य नामानि । जङ्गाल इति शब्दकल्पद्रुमः । गन्त्र्यादेरिति प्रकोष्ठक इत्येकं गन्त्र्यादेः कोष्ठस्य नाम । क्षितीति क्षितिव्युदास इत्येकं भूगर्भविशेषस्य नाम । क्षितिव्युदास इति शब्दकल्पद्रुमः ।

| | |
|---|---|
| छज्जा | - चाले स्यात्करटं छदिः ।। 434 ।। |
| ईंटा | - इष्टिकेष्टेष्टका तुल्याऽ- |
| खिल | - र्गलिका द्वारयन्त्रके । |
| खुटरी | - गोपानसी तु वलिभी नागदन्तश्च कथ्यते ।। 435 ।। |
| मस्जिद | - मतस्थानं बुधैः प्रोक्तं यावने मतसद्मनि । |

।। इति गृहवर्गः ।।

चालमिति चाल करट छदिस् इतित्रीणि चालस्य नामानि । इष्टिकेति इष्टिका इष्टा इष्टका इतित्रीणि छादनद्रव्यविशेषस्य नाम । अर्गलिकेति अर्गलिका इत्येकं द्वारपिधानकाष्ठादेर्नाम । गोपानसीति गोपानसी वलिभी नागदन्त इतित्रीणि नागदन्तस्य नामानि । मतेति मतस्थान इत्येकं यावनमतस्थानस्य नाम ।

## ।। अथार्थवर्गः ।।

| | |
|---|---|
| द्रव्य | - नाणकं मुद्रिते द्रव्ये |
| रोकड़ | - क्रयभिद् रोक उच्यते ।। 436 ।। |
| कौड़ी | - वराटिका वराटः स्यात् |
| पाई छदाम | - पादिका काकणी समे ।। 437 ।। |
| अद्धी | - पणस्यार्द्धेऽर्द्धिका प्रोक्ता |
| पैसा | - पणकः पण उच्यते ।। 438 ।। |
| आना | - आण आणक एकार्थो |
| दुअन्नी | - द्व्याणी स्याद्व्याणकी तथा । |
| चौअन्नी | - चतुराणी स्त्रियां कार्षापणः स्याच्चतुराणकी ।। 439 ।। |
| अठन्नी | - अष्टाण्यष्टाणकी तुल्ये कथ्येते कविसत्तमैः । |
| रुपया | - रूप्यकं रूपको रूप्यं रूपञ्च परिकीर्त्यते ।। 440 ।। |
| असर्फी (गिन्नी) | - निष्को दीनार एकार्थौ प्रोक्तौ शब्दविचक्षणैः । |
| नोट | - पत्रात्मिकायां मुद्रायां पत्रमुद्रा निगद्यते ।। 441 ।। |
| चेक | - मुद्रापत्रन्तु मुद्रार्थपत्रे चायकमिष्यते । |

नाणकमिति नाणक इत्येकं राजचिह्नितद्रव्यस्य नाम । कूटकृन्नाणकस्य चेत्याग्नेयपुराणम् । क्रयेति रोक इत्येकं क्रयविशेषस्य नाम । रोकस्तु क्रयभिद्नौथ्योरिति मेदिनी । वराटकेति वराटिका वराट इतिद्वे वराटस्य नाम्नी । पादिकेति पादिका काकणी इतिद्वे पणचतुर्थांशस्य नाम्नी । इदानीन्तु पणतृतीयांशे एव व्यवह्रियेते पादिका-काकणीशब्दौ मुद्राव्यवहारस्य तथैव राजनियन्त्रिततत्वादितिबोध्यम् । काकणी पणतुर्य्यांश इति मेदिनी । पणस्येति अद्धिका इत्येकं पणार्द्धस्य नाम । पणक इति पणक पण इतिद्वे पणस्य नाम्नी । आणइति आण आणक इतिद्वे आणस्य नाम्नी । द्व्याणीति द्व्याणी द्व्याणकी इतिद्वे आणकद्वयस्य नाम्नी । चतुराणीति चतुराणी कार्षापण चतुराणकी इतित्रीणि आणकचतुष्टयस्य नामानि । कार्षापणः पणषोडशक

इति मेदिनी । अष्टाणीति अष्टाणी अष्टाणकी इतिद्वे आणकाष्टकस्य नाम्नी । रूप्यकमिति रूप्यक रूपक रूप इति चत्वारि रूप्यकस्य नामानि । निष्कइति निष्क दीनार इतिद्वे स्वर्णमुद्राया नाम्नी । पत्रेति पत्र मुद्रा इत्येकं पत्रात्मकमुद्राया नाम । अत्रार्थे कैश्चित् (नोट) लोटोऽपि प्रयुज्यते । तदिदं शब्दतन्त्रानभिज्ञतामेव व्यनक्ति लुटिवाच्यदेशविशेषरूपाधिकरणावच्छिन्नसंयोगौपयिकव्यापारे तत्प्रयोज्यधात्वर्थतावच्छेदकफलाधेयतायाः स्वाभिमतकर्तृत्वकर्मत्वान्यतरावच्छिन्नाधिकरणतानिरूपितत्वविरहात् । एवमेव परदादिशब्देऽपि बोध्यं सुधीभिः ।

प्रामिसरी नोट - राजर्णपत्रं विबुधैः पत्रभेदे निगद्यते ।। 442 ।।

कैश-थैली - कोशो द्रव्यञ्च तुल्यार्थे विद्वद्भिः परिकीर्त्यते ।

कर्ज-देन - ऋणं धारो भवेत्कर्जः

भाड़ा - स्तोमो भाटश्च भाटकम् ।। 443 ।।

उधार -पैंच - पर्य्युदञ्चनमुद्धारः प्रीतिदत्तं तथोच्यते ।

भत्ता - भृत्या भृतकमेकार्थे

बेतन - भर्मण्या वेतनं भृतिः ।। 444 ।।

स्त्रियां भरण्या कविभिस्तत्रैव परिकीर्त्यते ।

दाम, कीमत - उच्यते विबुधैं र्द्युम्नं वस्नो मूल्यं तथा क्रयः ।। 445 ।।

खेवा - आतरस्तरपण्यं स्यात् तथाऽनुतरमिष्यते ।

रोज, बोनि, मजदूरी- दिनव्याप्यश्रमप्राप्यं वेतनं दिनिका भवेत् ।। 446 ।।

गहना - गहना भूषणं भूषा तथाऽलंकार इष्यते ।

ग्रान्ट - राजसाहाय्यमर्थज्ञैर्दत्तसाहाय्यमुच्यते ।। 447 ।।

गिरबी बन्धक - बन्धकं रूप्यकं नीत्वा यदन्यत्र निधीयते ।

घूस - उत्कोचः स्यात्कोशलिकम्

राजेति राजर्णपत्र इत्येकं राजदत्तपत्रविशेषस्य नाम । कोश इति कोश द्रव्य इतिद्वे द्रव्यविशेषस्य नाम्नी । आयइति आय लाभ इतिद्वे लभ्यार्थस्य

नाम्नी । ऋणमिति ऋण धार कर्ज इतित्रीणि ऋणस्य नामानि । धार इति शब्दकल्पद्रुमः । कर्जयति व्यथयतीति कर्जः व्यथनार्थक-कर्जेः कर्त्तर्य्यचि घञि वा सिद्धिः । भाटकमिति स्तोम भाट भाटक इतित्रीणि भटकस्य नामानि । स्तोम दत्वा वसेत्तु य इति नारदः । भाटकभाटशब्दौ शब्दकल्पद्रुमे निर्दिष्टौ । पर्य्युदञ्चनमिति पर्य्युदञ्चन उद्धार प्रीतिदत्त इतित्रीणि उद्धारस्य नामानि । उद्धार इति शब्दकल्पद्रुमः । प्रीतिदत्तमिति 8 अध्याये मनुः । भृत्येति भृत्या भृतक इतिद्वे वेतनातिरिक्तलभ्यद्रव्यस्य नाम्नी । भर्मण्येति भर्मण्या वेतन भृति भरण्या इति चत्वारि वेतनस्य नामानि । उच्यत इति द्युम्न वस्न मूल्य क्रय इतित्रीणि मूल्यस्य नामानि । द्युम्नं वित्ते इति हेमचन्द्रः । आतरइति आतर तरपण्य अनुतर इतित्रीणि तरपण्यस्य नामानि । दिनेति दिनिका इत्येकं पारिश्रमिकविशेषस्य नाम, दिनिकेतिशब्दमाला । गहनेति गहना भूषणं भूषा अलङ्कार इति चत्वारि अलङ्कारस्य नामानि । गहनेति शब्दकल्पद्रुमः । राजेति राजसाहाय्य दत्तसाहाय्य इतिद्वे राज्ञा प्रदीयमानस्य साहाय्यविशेषस्य नाम्नी । वन्धकमिति बन्धक इत्येकं रूप्यकादानपूर्वकमन्यत्र रक्षितवस्तुनो नाम । उत्कोच इति उत्कोच कोशलिक इतिद्वे उत्कोचस्य नाम्नी । कोशलिकमिति हेमचन्द्रः ।

| | |
|---|---|
| चोरी का धन | - लोक्त्रं होड उदीर्य्यते ।। 448 ।। |
| जकात | - करभेदे कवीन्द्रेण यात्राकर उदीर्य्यते । |
| जुर्माना | - दमने त्वर्थदण्डः स्यात् |
| जौतुक-दहेज | - यौतुकं जरणं भवेत् ।। 449 ।। |
| धरोहर | - निक्षेपोपनिधी न्यासे |
| सूद-व्याज | - कुसीदं वृद्धिरुच्यते । |
| नकद | - तात्कालिकं तु नणकं टङ्को विद्विद्भिरिष्यते ।। 450 ।। |
| पावती | - प्राप्तिपत्रन्तु प्राप्तिः स्यात् |
| पेसगी | - पूर्वप्राप्ये तु पौर्विकम् । |
| पूँजी | - भाण्डं मूलधनं प्राज्ञैः स्मृतं परिपणं तथा ।। 451 ।। |

पूँजीवाद - मूलस्ववादिता सम्पद्वाद: कविभिरुच्यते ।

बायना - सत्यापनं तथा सत्यङ्कारं ब्रूते विचक्षण: ।। 452 ।।

महगी - महार्घता महामूल्यभावे आकस्मिके भवेत् ।

फीस - व्ययप्राप्ये तु शुल्कोऽस्त्री श्रमप्राप्ये तु निष्क्रिय: ।। 453 ।।

फण्ड - प्रकिया विदुषा मान्य: फण्ड: स्यादवसक्थिक: ।

मनीआर्डर - मुद्रादरो धनादेशो मुद्रादेशश्च कथ्यते ।। 454 ।।

लोप्त्रमिति लोप्त्र होड इतिद्वे स्तेयद्रव्यस्य नाम्नी । लोप्त्रं होड इति मनुयाज्ञवल्क्यादय: । करेति यात्राकर इत्येकं करविशेषस्य नाम । दमनइति अर्थदण्ड इत्येकं दमनद्रव्यस्य नाम । यौतुकमिति यौतुक जरण इतिद्वे यौतुकस्य नाम्नी । यौतुकमित्यमरसिंह: । निक्षेपेति निक्षेप उपनिधि न्यास इतित्रीणि न्यासस्य नामानि । कुसीदइति कुसीद वृद्धि इतिद्वे कुसीदस्य नाम्नी । तात्कालिकमिति तात्कालिक नणक टङ्क इतित्रीणि नणकस्य नामानि । प्राप्तीति प्राप्तिपत्र प्राप्ति इतिद्वे प्राप्तिपत्रस्य नाम्नी । प्राप्तिपत्रे प्राप्तिशब्द उपचर्य्यते । पूर्वेति पौर्विक इत्येकं पूर्वप्राप्यवेतनादेर्नाम । भाण्डमिति भाण्ड मूलधन परिपण इतित्रीणि मूलधनस्य नामानि । वणिङ्मूलधने भाण्डमिति वैजयन्ती । इतरौ शब्दकल्पद्रुमेऽभिहितौ । मूलेति मूलस्ववादिता सम्पद्वाद इतिद्वे परिपणवादस्य नाम्नी । सत्येति सत्यङ्कार सत्यापन इत्येकं पूर्वदत्तद्रव्यविशेषस्य नाम । सत्यापन सत्यङ्कार इति शब्दकल्पद्रुम: । महेति महार्घता इत्येकमाकस्मिकमहामूल्यभावस्य नाम । निष्क्रयइति निष्क्रिय इत्येकं पारिश्रमिकद्रव्यभेदस्य नाम । फंडइति फण्ड अवसक्थिक इतिद्वे द्रव्यविशेषस्य नाम्नी । फणिगतौ इत्यस्मात् अमन्ताड्ड इत्यनेनौणादिकेन सूत्रेण सिद्धि: । असक्थिक इतिशब्दकल्पद्रुम: । मुद्रेति मुद्रादर धनादेश मुद्रादेश इतित्रीणि धनादेशस्य नामानि । मुद्रामाद्रियते स्थानान्तरं प्रेषयितुमिति मुद्रादर: ।

तौल - तौलं तोले बुधै: प्रोक्तं

तोला - मानभेदं तु तोलक: ।

सेर - प्रस्थ: सेटकमेकार्थे

पाओ - पादः कुडव उच्यते । ।। 455 ।।

छटाक - षट्टङ्को मानसंभेदे

लग्गा - लगितं लघुरुच्यते

निमुठहाथ - रत्निः पुमान् मानभेदे

गण्डा - गण्डकः स्याच्चतुष्टयम् । ।। 456 ।।

घण्टा - घटी स्युर्घटिका प्रोक्ता होरा सर्वे समार्थकाः ।

पहर - यामः प्रहर एकार्थौ

दण्ड - तदर्द्धे दण्ड उच्यते । ।। 457 ।।

।। इति मानवर्गः ।।

तौलमिति तौल तोल इतिद्वे मितभावस्य नाम्नी । तौल तोलमिति शब्दकल्पद्रुमः । मानेति तोलक इत्येकं मानविशेषस्य नाम । प्रस्थ इति प्रस्थ सेटक इतिद्वे सेटकस्य नाम्नी । पादइति पाद कुडव इतिद्वे चतुर्थभगस्य नाम्नी । षट्टङ्क इति षट्टङ्क इत्येकं मानविशेषस्य नाम । लगितमिति लगित लघु इतिद्वे लघोर्नाम्नी । लघुः पञ्चकरात्मक इति शुक्रनीतिः, लगितमितिशब्दकल्पद्रुमः । रत्निरिति रत्नि इत्येकं मानविशेषस्य नाम । गंडकइति गण्डक इत्येकं चतुरवयवकस्य नाम । घटीति घटी घटिका घण्टा होरा इति चत्वारि होराया नामानि ।

।। अथ प्रकीर्णवर्गः ।।

अखाढ़ा - अक्षवाटो भूमिभेदे

कसरत - व्यायामो वपुषः क्रिया ।

कुस्ती, दङ्गल - नियुद्धं बाहुयुद्धं स्यात् ।

बयान - भाषाऽर्थिवचने स्मृता । ।। 458 ।।

उत्तरं प्रतिभाषा च प्रत्यर्थिवचने स्मृते ।

अंडा - अण्डो डिम्बः समौ प्रोक्तौ

अंगुली - स्त्रियामङ्गुरिरङ्गुरी । ।। 459 ।।

अतिसवाजी - अग्निक्रीडनकं प्राज्ञैरग्निखेला निगद्यते ।

इनक्वायरी - जिज्ञासा ज्ञातुमिच्छा स्यात्

इनक्वायरी ऑफिस- जिज्ञासालय उच्यते ॥ 460 ॥

तद्गृहे विदुषां श्रेष्ठैः

इस्पेक्सन - वीक्षा पर्य्येषणा समे ।

पड़ोस - प्रतिवेशः स्थानभेदे

क्रोध - तामसं क्रोध उच्यते ॥ 461 ॥

अॅग्रीमेन्ट - अग्रमन्त्रस्तु निर्बन्धः

अरथी - खाटिः शवरथी भवेत् ।

क्लोरोफार्म - संज्ञाहारः क्रूरकार्मः

कंकरीट - ककुष्टं राशिकारिणि । ॥ 462 ॥

अक्षेति – अक्षवाट इत्येकं व्यायामस्थानस्य नाम । व्यायामइति व्यायाम इत्येकं शरीरक्रियाविशेषस्य नाम । नियुद्धमिति नियुद्ध बाहुयुद्ध इतिद्वे मल्लयुद्धस्य नाम्नी । भाषेति भाषा इत्येकं वादिवचनस्य नाम । उत्तर प्रतिभाषा इतिद्वे प्रतिवादिवचनस्य नाम्नी । अर्थिनो वचनं भाषा स्यात्प्रत्यर्थिन उत्तरमिति वैजयन्ती । अंडइति अण्ड डिम्ब इतिद्वे अण्डस्य नाम्नी । डिम्बइति शब्दकल्पद्रुमः ।

गैरण्टी - सुरक्षावचनं प्राज्ञैर्विलेखा कथ्यते स्त्रियाम् ।

गैस - वायुवाष्पे तु वाष्पं स्यात्

चैलेञ्ज - आह्वानं स्याद्विग्रहः ॥ 463 ॥

अत्तर - गन्धद्रव्यं गन्धसारः ।

घून - काष्ठकीटो घुणः स्मृतः ।

धूपवत्ती - धूपवर्त्ती स्त्रियां प्राज्ञैरिष्यते धूपवर्तिका ॥ 464 ॥

गली (स्ट्रीट) - रथ्या प्रतोली विशिखा

| | |
|---|---|
| घाट | - घाटो घट्ट उदीर्य्यते ।। 465 ।। |
| चिट्ठी | - चिटी दलं चिटिः पत्रं चिट्टी स्याच्चिट्टका स्त्रियाम् । |
| खाँसी (उकासी) | - उत्काशः क्षुवथुस्तुल्यौ |
| जिला | - मण्डलं तप्प उच्यते । |
| जाल | - जालं कूटं समानार्थे |
| तालीपीटना | - करर्द्धिः करतालिका ।। 466 ।। |
| डिपार्टमेन्ट | - विभागः प्रोच्यते कक्षा |
| जंगल | - जङ्गलं विपिनं वनम् । |
| पारशल | - परशालः पोटली स्यात् |
| जजमेण्ट | - शीर्षकं धर्मनिर्णयः ।। 467 ।। |

सुरक्षेति सुरक्षावचन विलेखा इतिद्वे सुरक्षावचसो नाम्नी । वाष्पित वापुवाष्प वाष्प इतिद्वे वाष्पस्य नाम्नी । आह्वानमिति आह्वान अभिग्रह इति युद्धार्थमाह्वानस्य नाम्नी । गन्धेति गन्धद्रव्य गन्धसार इतिद्वे सुरभिद्रव्यस्य नाम्नी । काष्ठेति घुण इत्येकं काष्ठकीटस्य नाम, काष्ठकीटो घुण इत्यभिधानचिन्तामणिः । धूपेति धूपवर्ति धूपवर्तिका इति गन्धवर्तिकाया नाम्नी । रथ्येति रथ्या प्रतोली विशिखा इतित्रीणि मुख्यमार्गाद्बहिर्गतानां लघुतरमार्गाणां नामानि । घाटइति घाट घट्ट इतिद्वे जलाशयीयकृत्रिमतीरस्य नामानि । घाट इति शब्दकल्पद्रुमः । चिटीति चिटी दल चिटि पत्र चिट्टी चिट्टिका इतिषट् चिट्या नामानि । उत्काशइति उत्काश क्षुवथु इतिद्वे श्लेष्मरोगस्य नाम्नी । मण्डलमिति मण्डल तप्प इतिद्वे प्रान्तीयविभागस्य नाम्नी । जालमिति जाल कूट इतिद्वे छलस्य नाम्नी । जालमिति शब्दकल्पद्रुमः । कूटभेदेन कारितमिति हारीतः । करर्द्धिरिति करर्द्धि करतालिका इति करशब्दस्य नाम्नी । विभागइति विभाग कक्षा इतिद्वे कक्षाया नाम्नी । जङ्गलमिति जङ्गल विपिन वन इतित्रीणि कान्तारस्य नामानि । जङ्गलमिति शब्दकल्पद्रुमः । परशालमिति परशाल पोटली इतिद्वे पोटलिकाया नाम्नी । परं परदेशं गन्त्रादिद्वारा शलति गच्छतीति परशालः । शलतेः कर्मण्यण् ।

शीर्षकमिति शीर्षकं धर्मनिर्णय इतिद्वे न्यायनिर्णयस्य नाम्नी । शीर्षकमिति शब्दकल्पद्रुमः ।

टेलीग्राम - विद्युद्ग्रामस्तडिद्वार्ता त्वरितादिगमस्तथा ।

पैर - टङ्गा टङ्गः समानार्थौ

डाक - द्राक्कं द्रागिदुदीर्य्यते । ॥ 468 ॥

डींग - स्त्रियामतिकथाऽत्युक्तिः

जंजीर - शृङ्खलाऽन्दुक उच्यते ।

पुरीष - गूथं पुरीषं लेण्ड्रे स्यात्

नमूना (सेम्पल)- आदर्शः प्रतिरूपकम् ॥ 469 ॥

तमादी - आतिवेलिकमित्येतद् वेलाऽतिक्रम उच्यते ।

तैयारी - संभारः सज्जने प्रोक्तः संभृतं सज्जितं त्रिषु ॥ 470 ॥

फाँसी - तुल्या उत्पाश उद्बन्धः

सुरंग - सुरंगा छिद्रसंभिदि ।

पॉलिस - स्नेहनी धातुलेपः स्यात्

पानका बीड़ा - वीटी वीटिस्तु वीटिका ॥ 471 ॥

मैनरोड, बड़ी सडक - राजमार्गः प्रधानादिमार्गः स्यादुपनिष्करम् ।

बत्ती - वर्तिका वर्तिरेकार्थे

बारात - वरयात्रा वरोत्सवः ॥ 472 ॥

विद्युदिति विद्युद्ग्राम, तडिद्वार्त्ता, त्वरितागम इतित्रीणि विद्युत्संदेशस्य नामानि । विद्युतां ग्रामः समुदाय इत्यर्थः । त्वरितं गमो गमनं यस्यासौ त्वरितगमः । टङ्गेति टङ्गा टङ्ग इतिद्वे जंघाया नाम्नी । टङ्गेति शब्दकल्पद्रुमः । टङ्ग खनित्रे जंघायामित्यभिधानचिन्तामणिः । द्राक्कमिति द्राक्क द्रागित् इतिद्वे समागतपत्रादेर्नाम्नी । द्रागेव द्राक्कम् द्राक्पदं शीघ्रप्रापणीयपत्रादावौपचारिकम् । द्राक् शीघ्रमेति गच्छतीतिं द्रागित् । स्त्रियामिति अतिकथा अत्युक्ति इतिद्वे अतिशयोक्ते र्नाम्नी । शृङ्खलेति शृंखला अन्दुक इतिद्वे बन्धनद्रव्यस्य नाम्नी ।

गूथमिति गूथ पुरीष लेण्ड्र इतित्रीणि पुरीषस्य नामानि, गूथं पुरीषमित्यभिधानचिन्तामणि:, लेण्ड्रमिति मेदिनी । आदर्शइति आदर्श, प्रतिरूपक इतिद्वे प्रतिच्छवेर्नाम्नी । आतीति आतिबेलिक बेलातिक्रम इतिद्वे कालातिपातस्य नाम्नी । संभार इति संभार सज्जन इतिद्वे संनाहस्य नाम्नी । संभृत सज्जित इतिद्वे संनद्धस्य नाम्नी । तुल्याविति उत्पाश उद्बन्ध इतिद्वे ऊर्ध्वबन्धस्य नाम्नी । सुरङ्गेति सुरंगा इति भूविवरस्य नाम । निर्गच्छेत्सुरंगयेति कौटिलीयार्थशास्त्रम् । स्नेहनीति स्नेहनी धातुलेप इतिद्वे चिक्कणीकरणस्य नाम्नी । वीटीति बीटी वीटि वीटिका इतित्रीणि ताम्बूलबीटिकाया नामानि । राजेति राजमार्ग उपनिष्कर प्रधानमार्ग इतित्रीणि मुख्यमार्गस्य नामानि । वर्त्तिकेति वर्त्तिका वर्ति इतिद्वे वर्तिकाया नाम्नी । वरेति वरयात्रा वरोत्सव इतिद्वे वरयात्राया नामानि ।

| | |
|---|---|
| इजलास (बैंच) | - धर्मासने तु विबुधैर्न्यायासनमुदीर्य्यते । |
| रुई | - बंग: कार्पास एकार्थौ |
| मेढ़क | - व्यंगो मण्डूक उच्यते ।। 473 ।। |
| म्युनिसिपल बोर्ड | - स्यान्मण्डलपालयित्री मार्गादिसमितौ स्त्रियाम् । |
| कारपोरेशन | - कार्य्यपौरेशनं मार्गरक्षासंस्थानमुच्यते ।। 474 ।। |
| मोनोग्राम | - मिश्रग्रामो मनुग्रामो मिश्राक्षरमुदीर्य्यते । |
| सीसा | - सीसकाचौ समानार्थौ |
| रास्ता | - वाटो मार्ग: पथि स्मृतौ ।। 475 ।। |
| लगेज | - यात्रोकपकरणं प्राज्ञैरुपस्कर उदीर्य्यते । |
| लेटरबॉक्स | - पत्रधानी स्त्रियां पत्रपात्रिकायां निगद्यते ।। 476 ।। |
| सिगरेट | - शीघ्रेतो धूम्रपानी स्यात् |
| हड्डी | - हड्डमस्थि प्रकीर्त्यते । |
| स्प्रीट | - सुरापरो मद्यसार: |
| टोल | - पल्ली ग्रामक उच्यते ।। 477 ।। |

सोडा वाटर - क्लीबे क्षारजलं प्राज्ञैः क्षारवारि निगद्यते ।

उपनगर - गृह्या तु शाखानगरम्

शूली - शूलिका शूलमुच्यते ।। 478 ।।

धर्मेति धर्मासन न्यायपीठ इतिद्वे न्यायासनस्य नाम्नी । बंगमिति बंग कार्पास इतिद्वे तूलस्य नाम्नी । बंगः कार्पास इति मेदिनी । व्यंग इति व्यंग मण्डूक इति भेकस्य नाम्नी । व्यंग इतिशब्दरत्नावली । स्यादिति मण्डलपालयित्री मार्गसमिति इतिद्वे मार्गसमितेर्नाम्नी । कार्य्येति कार्य्यपौरेशन इत्येकं मार्गविधानादिकार्य्यकर्तृसंस्थानस्य नाम । पौराणां नागरिकाणमीशनं शासनं पौरेशनं कार्य्यं कर्त्तव्यं पौरेशनञ्च कार्य्यपौरेशनम् । मिश्रेति मिश्रग्राम मनुग्राम मिश्राक्षर इतित्रीणि मिश्रग्रामाक्षरस्य नामानि । मनोर्वर्णस्य ग्रामः समुदायो मनुग्रामः । सीसेति सीस काच इतिद्वे सीसस्य नाम्नी । सीसस्य लघुनालार्थे इति शुक्रनीतिः, काचं मणिं काञ्चनमेकसूत्रे इति शिष्टोक्तिः । वाटइति वाट मार्ग इतिद्वे पथो नाम्नी । यात्रोपकरण इति यात्रोपकरण उपस्कर इतिद्वे यात्रोपयोगिवस्तुजातस्य नाम्नी । पत्रेति पत्रधानी पत्रपात्रिका इति पत्राधानपेटिकाया नाम्नी । शीघ्रेति शीघ्रेत धूम्रपानी इतिद्वे धूम्रपानसाधनद्रव्यस्य नाम्नी । शीघ्रमितः अन्तर्गत इति शीघ्रेतः, गत्यर्थादेतेः कर्त्तरि क्तः । हड्डमिति हड्ड अस्थि इति अस्थ्नो नाम्नी । हड्डमिति शब्दकल्पद्रुमः । सुरेति सुरापर मद्यसार इति सुरासारभूतस्य नाम्नी । पल्लीति पल्ली ग्रामक इतिद्वे ग्रामखण्डस्य नाम्नी । पल्ली ग्रामखण्डे इति मेदिनी, ग्रामस्यायमवयवो ग्रामकः । क्लीब इति क्षारजल क्षारवारि इतिद्वे पाश्चात्यपानीयस्य नाम्नी ।

हलदी - हलद्दी स्याद्धरिद्रायां

पाकड - पर्कटः प्लक्ष उच्यते ।

मत्स्य - मच्छो मत्स्यो भवेन्मीने

छींक - छिक्का वायुविकारजा ।। 479 ।।

कमीशन - विशेषसमितिः कामेशनं विद्विद्भिरिष्यते ।

कमीशन - लभ्यांशे स्याच्छ्रमफलम्

ऊस - ऊषः स्यात्क्षारमृत्तिका ॥ 480 ॥

कलेवा, जलखै - कल्यावर्त्तः प्रातराशः

पेशाब-मूत्र - प्रस्रावो मूत्रमुच्यते ।

आरि - क्षुद्रे बन्धे भवेदालिः

बांध - विशाले सेतुरिष्यते ॥ 481 ॥

मलवेग - उत्थानं मलवेगे स्यात्

मालगुजारी - मालस्वं क्षेत्रकर्षणी

रसीद - लेख्यं स्वाक्षरितं तुल्ये

पौधा - क्षुपः स्यान्ना लघूद्भिदि ॥ 482 ॥

इजहार - पुंसि प्रमाणीकारस्तु स्पष्टीकरणमुच्यते ।

ड्राफ्ट - पाण्डुलेखः पाण्डुलेख्यम्

गृह्येति गृह्या शाखानगर इतिद्वे उपनगरस्य नाम्नी । शूलिकेति शूलिका शूल इतिद्वे शूलस्य नाम्नी । हलद्दीति हलद्दी हरिद्रा इतिद्वे हरिद्राया नाम्नी । हलद्दीति राजनिघण्टुः । पर्कटइति पर्कट प्लक्ष इतिद्वे प्लक्षस्य नाम्नी । मच्छइति मच्छ मत्स्य मीन इतित्रीणि मीनस्य नामानि । मच्छइति शब्दरत्नावली । छिक्केति छिक्का इत्येकं वायुविकृतिभेदस्य नाम । विशेषेति विशेषसमिति कामेशन इतिद्वे कार्य्यभारप्राप्तशिष्टसमितेर्नाम्नी । काममिष्टं कार्ये कर्मणि ईशनं प्रभुत्वं यत्र तत् कामेशनम् । लभ्यांशइति श्रमफल इत्येकं पुरस्कारविशेषस्य नाम । ऊषइति ऊष इत्येकं क्षारमृत्तिकाया नाम्नी । कल्येति कल्यावर्त्त प्रातराश इतिद्वे स्वल्पाहारस्य नाम्नी । प्रस्राव इति प्रस्राव मूत्र इतिद्वे मूत्रस्य नाम्नी । क्षुद्रइति आलिइति क्षुद्रबन्धस्य सेतुरिति महाबन्धस्य नाम । उत्थान इत्येकं मलवेगस्य नाम । मालेति मालस्व क्षेत्रकर्षणी इतिद्वे क्षेत्रकरस्य नाम्नी । लेख्यमिति लेख्य स्वाक्षरित इतिद्वे हस्ताक्षरितस्य नाम्नी । क्षुपइति क्षुप इत्येकं लघूद्भिदो नाम । पुंसीति

प्रमाणीकार स्पष्टीकरण इतिद्वे निरूपणस्य नाम्नी । पाण्ड्वति पाण्डुलेख पाण्डुलेख्य इति द्वे संशोध्यलेखाय पूर्वलेखस्य नाम्नी ।

| | | |
|---|---|---|
| आँच | - | आतापो वह्नितापने ।। 483 ।। |
| कन्सेसन | - | अनुग्रहविशेषे तु काम्याशंसनमिष्यते । |
| पिकेटिंग | - | धर्मरोधो न्यायरोधे |
| स्टेट | - | लघुराज्ये तु राज्यकम् ।। 484 ।। |
| हरताल | - | हट्टताडो न्यायहेतोः कार्य्यत्याग उदीर्य्यते । |
| कचड़े का स्थान | - | अवकरस्थलमर्मज्ञैः कर्दमाट उदीरितः ।। 485।। |
| कचड़ा | - | पूये द्रव्येऽवकरः स्यात् |
| पोठी | - | प्रोष्ठी पाठीन उच्यते । |
| इन्जेक्सन | - | अथान्तर्योजनी सूचीक्रियाऽन्तर्जसनं भवेत् ।। 486 ।। |
| कुरान | - | मतग्रन्थविशेषे तु कुराणः परिकीर्त्यते । |
| कोयला | - | इङ्गलोऽङ्गार एकार्थौ |
| खढ, घास | - | खढं घासः समार्थकौ ।। 487 ।। |
| खेलौना | - | भवेत्क्रीडनकं क्रीडासाधने प्रेक्षणास्पदे । |
| तमाशा | - | बुधैः प्रेक्षणकं प्रोक्तम् |
| गरममसाला | - | सौरभो गन्ध उच्यते ।। 488 ।। |
| गार्डेनपार्टी | - | बुधैरादरगोष्ठी स्त्री क्लीब आपानमुच्यते । |
| गर्वनमेण्ट | - | राज्यं शासनतन्त्रं स्यात् |
| गेन्द | - | गेन्दुकः कन्दुकः समौ ।। 489 ।। |
| खटमल, माकड़ | - | उद्दंशो मत्कुणः खट्वामलस्तुल्यार्थवाचकाः । |
| अल्टीमेटम | - | बुधैरन्तिममन्तव्ये प्रोक्ता चरमसूचना ।। 490 ।। |

आतापइति आताप इत्येकं बह्नितापस्य नाम । अनुग्रहेति काम्याशंसन इत्येकं कृपाविशेषस्य नाम । काम्यस्य आशंसनं स्वीकारः । धर्मेति धर्मरोध

न्यायरोध इतिद्वे न्यायार्थमवरोधस्य । हट्टेति हट्टताड कार्य्यपरित्यागस्य नाम ताडनं ताड: हट्टस्य ताडो हट्टताड: ताडनञ्च पिधानादिरूपम् । अवेति कर्दमाट इत्येकं दूषितद्रव्यादिप्रक्षेपस्थानस्य नाम । कर्दमाटइति त्रिकाण्डशेष:। पूय इति अवकर इत्येकं प्रेक्षप्यद्रव्यस्य नाम । अवकर इति शब्दकल्पद्रुम:। प्रोष्ठीति प्रोष्ठी पाठीन इतिद्वे मत्स्यविशेषस्य नाम्नी । प्रोष्ठीति शब्दकल्पद्रुम:, पाठीन इति मेदिनी । अथेति अन्तर्योजनी सूचीक्रिया अन्तर्जसन इतित्रीणि सूच्या अन्त:प्रवेशस्य नामानि । मतेति कुराण इत्येकं यवनमतग्रन्थस्य नाम । कुत्सित: वेदविरुद्धो राणो वचनं यत्रासौ कुराण: । इङ्गालइति इङ्गाल अङ्गार इतिद्वे दग्धकाष्ठस्य नाम्नी । इमौ शब्दौ साग्नौ निरग्नौ च दृश्येते, 'अङ्गारचुम्बितमिव व्ययमान' भारते, कलङ्कस्तत्र यो व्रजति मलिनाङ्गारतुलनाम् इति मुकुट: । इङ्गालमिवायश: परे इतिश्रीहर्ष: । अंगारस्यैव ग्रन्थस्येति शुक्रनीति: । खढमिहि खढ घास इतिद्वे तृणस्य नाम्नी । खढघासाविति शब्दकल्पद्रुम: । भवेदिति क्रीडनक इत्येकं पुत्तलिकादेर्नाम । बुधैरिति प्रेक्षणक इत्येकं दृश्यखेलाया नाम । सौरभमिति सौरभ गन्ध इति सुरभीकरणद्रव्यस्य नाम्नी । सौरभमिति शब्दकल्पद्रुम: । पिनष्टि गन्धमिति मुद्राराक्षसम् । बुधैरिति आदरगोष्ठी आफन इतिद्वे उद्यानभोज्यस्य नाम्नी । राज्यमिति राज्य शासनतन्त्र इतिराजतन्त्रस्य नाम्नी । गेन्दुकइति गेन्दुक कन्दुक इतिद्वे कन्दुकस्य नाम्नी । गेन्दुक इत्यमरसिंह: । उद्दंशइति उद्दंश मत्कुण खट्वामला इतित्रीणि खट्वामलाया नामानि ।

| | | |
|---|---|---|
| खानापीना | - | एकयोक्त्या भेवत्खानपानं भक्षणपानयो: । |
| खुर अस्तुरा | - | खुर: क्षुर: भवेत्तुल्य: |
| कुहासा | - | कुज्झटि: स्त्री कुहेलिका ।। 491 ।। |
| पट्टी | - | वेष्टनी पट्टिका पट्टी |
| पेड़ | - | गच्छो वृक्षस्तरु: समा: । |
| गाली | - | गालि गल्यौ स्त्रियां पुंसि गालिक: परिकीर्त्यते ।। 491 ।। |
| चिट | - | पत्रिकायां चिट: पत्री |

दाढी - दाढायां दाढिका भवेत्

भीड़ - संघट्टाऽऽमर्दसंमर्दाः

बकरा-छागर - वर्करश्छागलो भवेत् ।। 493 ।।

करप्यु - रोधघण्टां सुधीश्रेष्ठो ब्रूते संयमघटिण्काम् ।

पूठ गता - प्राज्ञैः पटी प्रावरणं परिच्छद उदीर्यते ।। 494 ।।

रिपोर्ट - गुणदोषादिकं पत्रं क्लीबे विवरणं भवेत् ।

केवाला - क्रयलेख्यं कवीन्द्रेण प्रोक्तं विक्रयपत्रकम् ।। 495 ।।

तमसुक - लेख्यभेदे बुधैश्चक्रवृद्धिपत्रं निगद्यते ।

दस्तावेज - हस्ताक्षरितलेख्ये स्यात् लेख्यं स्वाक्षरितादिकम् ।। 496 ।।

मखमल - आधिलेख्यं लेख्यभेदे

फर्जी - कूटलेख्यन्तु लेख्यभित् ।

बुधैरिति अन्तिममन्तव्य अन्तिमसूचना इतिद्वे चरमाभिसन्धेर्नाम्नी । एकयोक्त्येति खानपान इत्येकं भक्षणपानयोर्नाम । इतरे खानपानेन वाक्प्रदानेन पण्डिता इतिगारुडनीतिसारे 109 अध्याये । खुरइति खुर क्षुर इतिद्वे केशच्छेदनशस्त्रस्य नाम्नी । नापितस्य खुर इति शब्दरत्नावली । कुज्झटिरिति कुज्झटि कुहेलिका इति द्वे कुज्झटे र्नाम्नी । वेष्टनीति वेष्टनी पट्टिका पट्टी इतित्रीणि ब्रणादिपट्टिकाया नामानि । अत्र पट्टशब्दोऽपि दृश्यते पट्टो व्रणादिबन्धने इतिमेदनीतिवचनात् । गच्छइति गच्छ वृक्ष तरु इतित्रीणि शाखिनो नामानि । गच्छइति हेमचन्द्रः । गालीति गाली गालि गालिक इतित्रीणि अवाच्यस्य नामानि । पत्रिकायामिति पत्रिका चिट पत्री इतित्रीणि पत्रिकाया नामानि । चिट परप्रेष्ये इत्यस्मादिगुपधत्वात्कः । दाढायामिति दाढ़ा दाढ़िका इतिद्वे कपोलस्थकेशस्य नाम्नी । दाढ़िका दट्रिका दाढा इत्यभिधानचिन्तामणिः । संघट्टेति संघट्ट आमर्द संमर्द इतित्रीणि जनसंमर्दस्य नामानि । वर्करइति वर्कर छागल इतिद्वे अजस्य नाम्नी । रोधघंटामिति रोधघण्टा संयमघण्टिका इतिद्वे घण्टिकाया नाम्नी ।

| | | |
|---|---|---|
| कानून | - | विधानं नियमो धारा |
| आँठी-गुल्ठी | - | बीजमष्टिः स्त्रियां भवेत् ॥ 496 ॥ |
| कालम | - | स्तम्भो विभाजिका पृष्ठखण्डिका सदृशार्थकाः । |
| अर्डिनेन्स | - | आज्ञाशंसः पुमान् धीरैरादृतेशनमुच्यते ॥ 497 ॥ |

प्राज्ञैरिति पटी प्रावरण परिच्छद इतित्रीणि आवरणस्य नामानि । गुणेति गुणदोषपत्र विवरण इतिद्वे गुणदोषनिर्देशकपत्रस्यनाम्नी । क्रयलेख्यमिति क्रयलेख्य विक्रयपत्रक इतिद्वे विक्रयपत्रस्य नाम्नी । गृहक्षेत्रादिकं क्रीत्वा तुल्यमूल्याक्षरान्वितम्, पत्रं कारयते यत्र क्रयलेख्यंदुच्यतेइति प्रायश्चित्ततत्त्वे बृहस्पतिः । लेख्येति चक्रवृद्धिपत्र इत्येकं लेख्यभेदस्य नाम । चक्रवृद्धिपत्रमिति मनुव्याख्याकारादयः । हस्तेति स्वाक्षरितलेख्य हस्ताक्षरितलेख्य इतिद्वे लेख्यविशेषस्य नाम्नी । आधीति आधिलेख्य इत्यकं लेख्यभेदस्य नाम । अधिलेख्यमिति शब्दकल्पद्रुमः । कूटेति कूटलेख्य इत्येकं छललेख्यस्य नाम विधानमिति विधान नियम धारा इतित्रीणि धर्मस्य नामानि । बीजमिति बीज अष्टि इतिद्वे बीजस्य नाम्नी । अष्टिरिति शब्दकल्पद्रुमः । स्तम्भ विभाजिका पृष्ठखण्डिका इतित्रीणि स्तम्भस्य नामानि । आज्ञेति आज्ञाशंस आदृतेशन इतिद्वे अस्थायिविधानस्य नाम्नी । आज्ञां सुरक्षितशक्तिकृतमादेशमाशंसतीत्याज्ञाशंसः, आदृतम् सुरक्षितशक्त्या स्वीकृतमीशनं प्रभुत्वं येन तत् आदृतम् ।

तत्तदर्थस्याभिधानमेकैकमथ वक्ष्यते ।

| | |
|---|---|
| वसीयतनामा, असगनी | - वसुपत्रं स्कन्दचापो |
| बुआरी, परसना | - बोदालः परिवेषणम् ॥ 499 ॥ |
| खाता, गाँती, | - गणनापुस्तकं गात्री |
| स्लिप, कवै, तारीख | - लिपिकं कवयी मितिः । |
| दरवार, बीमा | - द्वारवारोऽभयीकारः |
| लॉटरी, दफ्तरी | - पत्रीक्रीडा पटीकरः ॥ 500 ॥ |

| | |
|---|---|
| तगादा, नालिस | - त्वरापिका पूर्ववादो |
| बगीचा, नीलाम | - वाटिका घोषविक्रय: । |
| तमीज, दस्तुरी | - शीलं श्रमपुरस्कार: |
| उमीदवार, पर्दा | - आशंसुरवगुण्ठनम् ।। 501 ।। |
| विदाई, पगदण्डी, प्रूफ | -विदायैकपदी पूर्व्व |
| पास बुक | - रूपं निक्षेपपुस्तिका । |
| ब्रेक, वाऊचर | - वारिका गणनापत्री |
| मेजुरेटी, रिजर्ब | - मताधिक्यं सुरक्षितम् ।। 502 ।। |
| शर्बत, बटन | - शर्करोदकवर्त्तन्यौ |
| इस्तहार-खपरा | - घोषणापत्र-खर्परौ । |

अथ पष्ठ्यन्तपदानन्तरं सर्वत्रैव "नाम" इतिपदमनुषञ्जनीयम् ।

वसुपत्र इति मृत्युपत्रस्य, स्कन्दचापइति वस्त्राद्याधानवंशखण्डादे: वोदालइतिमीनविशेषस्य, परिवेषण इति क्रियाविशेषस्य, लिपिक इति पत्रखण्डस्य । कवयीइति मत्स्यविशेषस्य, कवयीति शब्दकल्पद्रुम: मितिइति तारिकायास्तिथेश्च । द्वारवारइति राजसभाया: । अभयीकार अभयवचनस्य । पत्रीक्रीडा इति पत्रक्रीडनकस्य । पटीकर इति कार्य्यालीयभृत्यविशेषस्य त्वरापिकेति प्रदत्तद्रव्यापिकाया: । पूर्ववादइति वादिनो वचनस्य । वाटिकेति उद्यानस्य । घोषविक्रयइति घोषणापूर्वकविक्रयस्य । शीलइति स्वभावविशेषस्य । श्रमुपरस्कार इति श्रमप्राप्यद्रव्यविशेषस्य । आंशसु इति इच्छावत: । अवगुण्ठन इति आवरणस्य । विदाय इति यात्राकाले दत्तधनादे: विदायं देहि संप्रीत्येति ब्रह्मवैवर्त्तम् । एकपदी लघुमार्गस्य । पूर्वरूप इति संशोधनार्थं मुद्रितस्य । निक्षेपपुस्तिकेति निक्षेपभवनात्प्राप्तगणनापत्रस्य । वारिकेति वारकयन्त्रस्य । गणनापत्रीति क्रीतवस्तुमूल्यपत्रस्य । अत्र व्ययचार इत्यपि कश्चित् । मताधिक्यइति संख्याधिक्यस्य । सुरक्षित इतिकार्यविशेषस्य कृते रक्षितवस्तुन: । शर्करोदक इति शर्करामिश्रितजलस्य । वर्त्तनीति

वस्त्रसंयोजकस्य । घोषणापत्रइति राजसूचनाविशेषस्य । खर्परइति गृहच्छादनद्रव्यविशेषस्य ।

बाढ़, लग्गी, हीरा - पूर आकर्षणी हीरा
बद्धी, कारकौआ, कुत्ता - बर्द्धी काकोल कुक्कुराः ।। 503 ।।
इलायची, अमचूर, गंभारी - एलाऽऽम्रचूर्ण गम्भारी
सर्कूलर, चौक - परिपत्रं चतुष्पथम् ।
टेंगरा, गरै, मारी - घर्घटो गडको मारी
दीबाली, ऊद, डेंजर - दीपाल्युद्रभयावहाः ।। 504 ।।
बड़ीइलायची, तितीर, सर्दी - पृथ्वीका तित्तिरश्छर्दिः ।
नकसा, चौपाटी - मानचित्रं चतुष्पटीं ।
तम्बाकू, पंगानोन वृथाघूमना - तमाखुः पांशवोऽटाट्या
हुण्डी, झाम, काँची - हुण्डी झामक दूषिकाः ।। 505 ।।
ब्रस, भांग, - लोममार्जनिका भङ्गा
हथियार, खजरी, चिट - हस्तर्ह खञ्जरी चिटः ।
रजिस्टड, कब्रगाह - राजेष्टितं शवस्थानम्
कबाछु, खोंगी - कपिकच्छुः कुवेणिका ।। 506 ।।
फेहरिस्त, बेकारी, करतल - सारिण्यकर्मता पाणिवादो
भाकुर, खिखिर - भण्डूकखिंखिरौ ।
केशजन्तु, बीड़ी, पोस्ता - लिक्षो वीटी सूक्ष्मबीजं
झाँटि, भेड़ा, छुछन्दर - झटिभेडौ छुछुन्दरी ।। 507 ।।
छाल, मैंना, सिंगीमाछ - छल्लिर्मरुवकः शृङ्गि
वारी, वादुर, झाड़ - र्वाटी वातूरि झारवः ।

पूरइति पूरइति जलोद्रेकस्य, आकर्षणी इति आकर्षणयष्टेः । हीराइति रत्नविशेषस्य, हीरेति मेदिनी । वर्द्धीइति सूत्रविशेषस्य, वर्द्धीति मेदिनी ।

